M. T. B. COLLEGE, SURAT
Manuscripts Library
Satre
No. Ref. / Sur. 27
Title: Prayoga Ratna

	Prayoga Ratna	: Title
	Nārāyana Bhatta son	: Author
	of Rameshwar Bhatta	: Editor
		: Year, Vols.
		: Publisher
27		: Remarks

27

॥ श्रीगणेशाय नमः ॥ ॥ श्रीरामं सपरिवारं गणेशं च सरस्वतीं । आम्नायान्तद्विधा
त्रॄन्नत्वा पितरं गुरुं ॥ १ ॥ भट्टरामेश्वरसुतो भट्टनारायणः सुधीः । प्रयोगरत्नं कुरुते कान्तं
शिष्टेष्टसिद्धये ॥ २ ॥ ग्रंथेस्मिन्गुणगणवल्लभ्य अतेचेत्तत्संग्रंथं गुणगणावृतमाह कोन तत्त्वेन
शिरसि कृतांजलिस्तया चेत्तेनोक्तं तत्त्वदसहितो अतेमया यात् ॥ ३ ॥ अथ संस्काराः ते
चाष्टाचत्वारिंशत् तथा च गौतमः गर्भाधानपुंसवनसीमंतोन्नयनं जातकर्मनामकरण
मन्नप्राशनचौलोपनयनं । चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पंचानां यज्ञानामनु
ष्ठानं अष्टकापार्वणश्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्त पाकसंस्थाः अग्न्याधेय
मग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबंधः सौत्रामणीति सप्त हविर्य ना०प्र० १
ज्ञसंस्थाः अग्निष्टोमोत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोतिरात्रोप्तोर्याम इति सप्त सोमय
ज्ञसंस्थाः इत्येते चत्वारिंशत्संस्काराः अष्टावात्मगुणाः दया सर्वभूतेषु क्षांतिरनसूया शौचम
नायासो मांगल्यमकार्पण्यमस्पृहेति यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाश्च स

ब्रह्मणः सायुज्यमाप्नोतीति पार्वणः पार्वणस्थालीपाकः श्राद्धममावास्यादि श्रावणीत
त्रकर्मसर्पबलिः श्रावणाकर्म आग्रहायण्यामार्गशीर्षपौर्णिमा तत्र कर्म प्रत्यवरोहणं वेति चैत्री
तत्र कर्म ईशानबलिः आश्वयुजी तत्र कर्म आश्वयुजीकर्मेति हरदत्तो माधवश्च अंगिरसा
तु पंचविंशति संस्कारा उक्ताः पंचविंशति संस्कारैः संस्कृता ये द्विजातयः ते पवित्राश्च योग्या
श्च श्राद्धादिषु सुयंत्रिताः आद्द्राहात् याजनादौ गर्भाधानपुंसवनसीमंतो बलिरेव च
बलिर्विष्णुबलिः जातकर्मनामकर्म निष्क्रमोन्नप्राशनं परं चौलकर्मोपनयनं तद्व्रतानां चतु
ष्टयं तच्छब्देन प्रसिद्धत्वात् वेदग्रहणं तद्व्रतानां वेदव्रतादि स्यर्थः स्नानोद्वाहौ चाग्रयणमष्टका
च यथातथं श्रावण्यामाश्वयुज्यां च मार्गशीर्ष्यां च पार्वणं उत्सर्गश्चाप्युपाकर्म महायज्ञाश्च नि
त्यशः संस्कारा नियता ह्येते ब्राह्मणस्य विशेषतः इति श्रावण्यां श्रवणाकर्म सादिदं सर्वबलि
स्वैव नियतानि ते ॥ एतेषां पंचविंशतीनां नैमित्तिकवार्षिकमासिकानि सभेदेन चातुर्विध्य
मापस्तंबः नैमित्तिकाः षोडशोक्ताः समुद्वाहावसानकाः सप्तैवाग्रयणाद्यास्तु संस्कारा
वार्षिका मताः मासिकं पार्वणं प्रोक्तं महायज्ञानां च वार्षिकं महायज्ञास्तु नित्याः स्युः सप्ता

यच्चाग्निहोत्रविदिति तत्र गर्भाधानाद्या उपनयनांताः षट्संस्काराः नियताः नतु स्नानाद्याः ते
न ब्रह्मचर्यादेव व्रजेदिति दिनविरुध्यते एते च द्विजानामेव समंत्रकाः स्त्रीशूद्राणां तु अमं
त्रकाः ब्रह्मक्षत्रियविट्शूद्राः वर्णास्त्वाद्यास्त्रयो द्विजाः निषेकाद्याः श्मशानांतास्तेषां वै मं
त्रतः क्रियाः इति वैजवापोक्तेः अत्र तेषामेव मंत्रतः क्रियाभिधानाद् शूद्रस्य मंत्रकाभाव इति स्वपति
॥ अत एव संस्कारानधिकृस्यमः शूद्रोपि वैविधः कार्यो विनामंत्रेण संस्कृतिः इति इति
संस्काराः ॥ ॥ अथ स्वस्तिवाचनं ॥ ॥ तत्र पल्लवं तमंतउच्यते ॥ व्यासः ॥ सर्वेष्वयं बधमाने
ष्वाद्यं अग्निणा न स्वस्तिवाचयेत् ॥ धर्मकर्मणि मांगल्ये संग्रामेद्भुतदर्शने ग्रहदोषपरिशां
तौ ॥ अथ स्वस्तिवाचनमदृष्टिमर्तेषु ॥ वृद्धिर्विवाहोनिला अपसंस्कारः ॥ प्रतिष्ठाहोमेनेष्टं तत
कर्मणाम्पाद्यं तयोः कुर्यादिति ॥ अथ मलायतस्मृतिः ॥ वैदिके तांत्रिके चाही तिनः पुष्पार्थमुष्य
तेशौनकः ॥ पुण्याहवाचनविधिं वक्ष्यामो यथाविधिमयोक्त्वा कर्मणामादावंते चोद ना०प० २
यसिद्धयेरति ॥ तत्र कर्मप्रयोगांतर्गतमिति केचित् ॥ बहवस्तु प्रयोगबहिर्भूतमि
ति आद्यपक्षे कर्मप्रयोगसंकल्पं कृत्वा कार्यं द्वितीये तु तत्कृत्वा कर्मसंकल्पः ॥ अ

थ प्रयोगः ॥ ॥ प्रयोगपारिजातानुसारेणोच्यते ॥ यजमानः ॥ कृतमंगलादिः ॥ स्नानं कृत्वा दर्भपाणि
॥ शुचिर्भूत्वा मंगलसंभारं संभृत्य स्वलंकृते गृहे गोमयोपलिप्ते भूमौ सोत्तरच्छदे भद्रासने उद
ङ्मुखं उपविश्य स्वदक्षिणपार्श्वे पत्नीं तद्दक्षिणतः ॥ संस्कार्यं उदङ्मुखमुपवेश्य पुरतो गवल्लिके
पुंजीभूतेषु अस्त्वपरिमितस्य धान्यस्योपरि दक्षिणतो न्यस्य सुवर्णरजतता
म्रमन्यमासनमकलुषं मनोहरमलंकृतं ॥ सुपुण्यजलपूरितं मपद्मवितिधाय
सूत्रवेष्टितोत्तरकलशं निक्षिप्य तदुपरि सितं तंदुलापूरितं सफलं पात्रं निधाय तस
वचनसमर्थान् तद्दिवसे श्राद्धादिषु भुक्तवतो निषिद्धप्रतिग्रहनिवृत्तान्
यान् दर्भपवित्रपाणीन् पुण्यान् ब्राह्मणान् प्राङ्मुखानासने उपविश्य गंधपुष्पादिभिरभ्य
र्च्य यथाचारं सुमुखश्चैकदंतश्च गणपतिं स्मृत्वा उत्तरकलशे रेवता वा
हयेत् ॥ तद्यथा ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रिताः ॥ मूले तत्र स्थितो ब्रह्मा मध्ये मातृ
गणाः स्मृताः ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा ॥ ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥

श्री॥ अथ तु यजमानस्य दुरितक्षयकारकाः॥ लक्ष्मीनाः समावाह्य कलशे देवतास्ततः
एतान्मंत्रस्थितान्देवानानादिर्भिमांगल्यं विधिवृद्धये हरिः॥ यत्र योगेश्वरः कृष्णो यत्र पा
र्थो धनुर्धरः॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥ अनन्याश्चिंतयंतो मां ये जनाः पर्युपा
सते॥ तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं॥ स्मृते सकलकल्याणभाजनं यत्र जायते॥ पुरु
षं तमजं नित्यं व्रजामि शरणं हरिं॥ सर्वेष्वारंभकार्येषु त्रयस्त्रिभुवनेश्वराः॥ देवा दिशंतु नः सि
द्धिं ब्रह्मेशानजनार्दनाः॥ सर्वदा सर्वकार्येषु नास्ति तेषाममंगलं। येषां हृदिस्थो भगवान्मं
गलायतनं हरिः॥ तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव। विद्याबलं दैवबलं त
देव लक्ष्मीपते तेंघ्रियुगं स्मरामि॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधके॥ शरण्ये त्र्यंब मं.ना० ३
के गौरि नारायणि नमोस्तु ते। ह्लादि यथा चापविला लक्ष्मीनारायणं नत्वा॥ ॐ दुर्गायै न
मः॥ ॐ वास्तुपुरुषाय नमः॥ ॐ मातृभ्यो नमः॥ ॐ पितृभ्यो नमः॥ ॐ आचार्येभ्यो नमः॥ ॐ सर्वेभ्यो
नमः॥ ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः इति प्रणम्य वादि चतुर्णां नमां तताभ्यां॥ सर्वेभ्यः सेकं नत्वा

प्राणानायम्य देशकालौ संकीर्त्य अमुककर्मकर्तुं मादौ सिद्धिद्व्यभ्युदयसिद्ध्यर्थं आशास्य परमे
श्वरप्रीत्यर्थं सभिब्राह्मणैः स्वस्ति पुण्याहवाचनं करिष्य इति संकल्पयेत्॥ ततः सर्वब्राह्मणैः
णाः प्राङ्मुखास्तिष्ठेयुः॥ तद्दक्षिणतः कर्ता रकलशं बिभ्रदुदङ्मुखस्तिष्ठेत्॥ कर्तुर्दक्षिण
पार्श्वे सकलाया उदङ्मुखस्तिष्ठेत्। पत्न्यपि तिष्ठेत्॥ अथ कर्ता शिवा आपः सन्त्वित्युक्त्वा सौमनस्य
मस्त्विति वाचयित्वा अक्षतमित्युक्त्वा अक्षतं चारिष्टं चास्त्विति वाचयित्वा दक्षिणाजानु भूमौ
निक्षिप्य दृष्ट्वा स्वस्ति दक्षिणाः पान्त्विति वाचयित्वा बृहद्धेयमित्युक्त्वा बहुधेयं चास्त्विति वा
चयित्वा॥ तत्कलशं पूर्ववन्निधाय दक्षिणजानु भूमौ निपात्य दशपुरुषः अग्नये स्वादिसूक्तं जपित्वा अ
प्रासूक्तं लिप्यते॥ अग्ने द्यावा पृथिव्योः समिधा ते अग्ने दधा हुयते इति॥ अग्ने जग संपूर्व निवचसा वेदयामस्य
प्रियं श्वहट दक्षः प्रियं श्रद्दीर दामनः॥ प्रियं नो जेषु यज्वस्विदं मकृदितं कृधि यथादेवा असुरेषु श्रद्धा
मुग्रेषु चक्रिरे॥ एवं नो जेषु यज्वस्वस्माकमुदितं कृधि॥ अश्रद्धे वा यजमाना वायुगोपा उपासते
श्रद्धां हृदय्या याकृत्य श्रद्धया विंदते वसु श्रद्धां प्रातर्हवामहे श्रद्धां मध्यंदिनं परि श्रद्धां सूर्यस्य निम्रुचि श्र
द्धे श्रद्धापयेह नः॥ इति श्रद्धासूक्तं जपित्वा पुनस्तत्कलशं मातायां त्या यो दशपुरुषो मनःसमाधीय

नमित्युक्त्वा समाहितमनसः स्म इति तैरुक्ते प्रसीदंतु भवंतः इत्युक्ते प्रसन्नाः स्म इति तैस्तेह
उक्ते सर्वैः सह शांतिरस्तु। पुष्टिरस्तु। तुष्टिरस्तु। वृद्धिरस्तु इत्युक्ते॥ अविघ्नमस्तु। आयुष्यमस्तु।
आरोग्यमस्तु। स्वस्ति शिवं कर्मास्तु। कर्मसमृद्धिरस्तु। धर्मसमृद्धिरस्तु। पुत्रसमृद्धिरस्तु। वेद
समृद्धिरस्तु॥ शास्त्रसमृद्धिरस्तु। इष्टसंपदस्तु। इति पंचदश वाक्यान्युक्त्वा अस्य कर्मदेवता।
त्मको भूत्वा भगवान् प्रजापतिः प्रीयतामित्युक्त्वा प्रीयतां। भगवान् कर्मदेवतात्मकः प्रजाप
तिरिति तैर्वाचयित्वा पुण्याहं वाचयिष्ये इत्युक्त्वा वाच्यतामिति तैरुक्ते॥ उद्गातेव शकुने सा
म गायसि ब्रह्मपुत्र इव सवनेषु शंससि॥ वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा
वद विश्वतो नः शकुने पुण्यमावद॥ इति मंत्रं सर्वैः सह पठित्वा पुण्याहं भवंतो ब्रुवंत्विति स्वयं मं
द्रस्वरेणोक्त्वा ॐ पुण्याहमिति तथा उक्ते पुनरेवं मध्यस्वरेणोक्त्वा तथैव तैरुक्ते पुनरे
वोच्चस्वरेणोक्ते तथैव तैरुक्ते॥ स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार
क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु। इति मंत्रं सर्वैः सह पठित्वा ॐ ऋद्धिं भवंतो ब्रुवंत्विति त्रि
र्वदेदुक्ते ॐ ऋध्यतामिति तैस्तथैव प्रत्युक्ते सामात्यः प्राङ्मुख उपविश्य॥ ततः तच्छिद्रिकलशोदकं

ना०५०
४

विप्रालेनाम्रपल्लवेनिना यजमानं सामात्यं मंत्रैरभिषिंचेयुः। ते च मंत्राः तत्सवितुर्वरेण्यमित्य
स्य विश्वामित्रः सविता गायत्री अभिषेके विनियोगः॥ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो
यो नः प्रचोदयात्॥ आपो हि ष्ठेति तिसृणां सूक्तस्याम्बरीषः सिंधुद्वीप आपो गायत्री पंचमी व
र्धमाना सप्तमी प्रतिष्ठा मयोभुवस्ता न ऊर्जे दधातन महे रणाय चक्षसे यो वः शिवतमो रसस्तस्य
भाजयतेह नः। उशतीरिव मातरः॥ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ॥ आपो जनयथा
च नः॥ शन्नो देवीरभिष्टय आपो भवंतु पीतये॥ शंयोरभिस्रवंतु नः॥ ईशाना वार्याणां क्षयंतीश्च
र्षणीनां। अपो याचामि भेषजं॥ अप्सु मे सोमो अब्रवीदंतर्विश्वानि भेषजा। अग्निं च विश्वशंभुवं॥
आपः पृणीत भेषजं वरूथं तन्वे ३ मम। ज्योक् च सूर्यं दृशे॥ इदमापः प्रवहत यत्किं च दुरितं मयि॥ य
द्वाहमभिदुद्रोह यद्वा शेप उतानृतं॥ आपो अद्यान्वचारिषं रसेन समगस्महि॥ पयस्वानग्न आ
गहि तं मा संसृज वर्चसा॥ आ नो भद्रा इति दशर्चस्य सूक्तस्य राहूगणपुत्रो गोतमो विश्वेदेवाः पंच
घा सप्तमी नगसः। षष्ठी विराट्स्थाना शिष्टास्त्रिष्टुभः॥ आ नो भद्राः क्रतवो यंतु विश्वतोऽदब्धासो
अपरीतास उद्भिदः। देवा नो यथा सदमिद्वृधे॥ असन्नप्रायुवो रक्षितारो दिवे दिवे। देवानां भद्रा सु

मतिर्जुग्यतां देवानां रातिरभिनोनिवर्त्ततां॥ देवानां सख्यमुपसेदिमा वयं देवान आयुः प्रतिरंतु
जीवसे॥ तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्त्रिधं॥ अर्यमणं वरुणं सोममश्वि
ना सरस्वती नः सुभगा मयस्करत्॥ तन्नो वातो मयोभुवातु भेषजं तन्माता पृथिवी तत्पिता द्यौ
ः तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवं॥ तमीशानं जगतस्तस्थुषस्प
तिं धियंजिन्वमवसे हूमहे वयं॥ पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥ स्व
स्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्प
तिर्दधातु॥ पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः॥ अग्निजिह्वा मनवः
सूरचक्षसो विश्वे नो देवा अवसागमन्निह॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः
॥ स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः॥ शतमिन्नु शरदो अंति देवा यत्रा नश्च ना०मं० ५
क्रा जरसं तनूनां। पुत्रासो यत्र पितरो भवंति मा नो मध्या रीरिषतायुर्गंतोः॥ अदितिर्द्यौरदि
तिरंतरिक्षमदितिर्माता स पिता स पुत्रः। विश्वे देवा अदितिः पंचजना अदितिर्जातमदितिर्जनित्वं
॥ अपनः शोशुचदघमिति सर्वस्य कुत्सोऽग्निर्गायत्री॥ अभिषे० अपनः शोशुचदघमग्ने शुशुग्ध्या

रयिं॥ अपनः शोशुचदघं सुगातुया वसूया च यजामहे॥ अपनः॥ अपनः प्रयद्भंदिष्ठ एषां प्रास्माका
सश्च सूरयः। अपनः॰ प्रयत्ते अग्ने सूरयो जायेमहि प्रते वयं॥ अपन०॥ प्रयदग्नेः सहस्वतो विश्वतो
मुखाति नावेव पारय॥ अपनः०॥ स नः सिंधुमिव नावयाति पर्षा स्वस्तये॥ अपनः०। एतोन्विंद्रमि
ति शक्त्रयस्य आंगिरसस्तिरश्चीन्द्रोनुष्टुप्। अभिषे० एतोन्विंद्रं स्तवाम शुद्धं शुद्धेन साम्ना॥
शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान्ममत्तु॥ इंद्र शुद्धो न आगहि शुद्धः शुद्धाभिरूतिभिः। शु
द्धो रयिं नि धारय शुद्धो ममद्धि सोम्यः॥ इंद्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे। शुद्धो वृत्राणि जि
घ्नसे॥ शुद्धो वाजं सिषाससि॥ स्वादिष्टयेति दशर्चस्य मधुछंदाः॥ पवमानः सोमो गायत्री॥ अभि
षे०॥ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इंद्राय पातवे सुतः॥ रक्षोहा विश्वचर्षणिरभि योनि
मयोहतं द्रुणा सधस्थमासदत्॥ वरिवोधातमो भव मंहिष्ठो वृत्रहंतमः। पर्षि राधो मघोनां॥ अ
भ्यर्ष महानां देवानां वीतिमंधसा॥ अभि वाजमुत श्रवः॥ त्वामच्छा चरामसि तदिदर्थं दिवे दिवे।
इंदो त्वे न आशसः॥श॥ पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता॥ वारेण शश्वता तना॥ तमीम
ण्वीः समर्य आ गृभ्णंति योषणो दश॥ स्वसारः पार्ये दिवि॥ तमीं हिन्वंत्यग्रुवो धमंति बाकुरं

इतिवारयंमधुश्चुतं॥३॥ ममधामाउतश्रियं तिधेनवःत्रिस्तु। सोममिंद्रायपातवे॥ अस्मे
सिंद्रोमदेष्ठा विश्वाहत्र आपिमिंजि घ्रसे। अरोमधान्वमहंते॥२॥ तरत्समंदीतित्र्यकस्यवत्सु
ष्टयस्यअवत्सारः पवमानसोमोगायत्री अभिषेके विनियोगः॥ तरत्समंदीधावतिधा
रासुतस्यांधसः। तरत्समंदीधावति। उस्रावेदवसूनांमर्त्तस्यदेव्यवसः। तरत्समंदी०॥
ध्वस्रयोःपुरुषंत्योरासहस्राणिदद्महे। तरत्समंदी। आययोस्त्रिंशतंतनासहस्राणि
चदद्महे। तरत्स० शुचिवोहव्यामिति मंत्रस्यवसिष्ठोमरुतस्त्रिष्टुप्॥ अभि० शुचीवोहव्यामरुतःशु
चीनांशुचिंहिनोम्यध्वरंशुचिभ्यः॥ ऋतेनसत्यमृतसापआयंशुचिजन्मानःशुचयःपावकाः॥
पदंतियत्रेतित्रिवर्गस्यपरमस्याध्यायवसिष्ठऋषिः॥ त्रिष्टुप्नामेकादशानांपवित्रमसिष्टा तृषी॥ ना०म० ६
पवमानसोमोगायत्री॥ यत्तेपवित्रमर्चिषि पातिद्वे अग्निर्देवसिउत्राभ्यांदेवसवितरितिसवितद्देव
सावित्रिभिःऋषिस्सग्निसवितदेवसापुनंतुमामितिविश्वदेवीःअनाप्यसेतिपुरउष्णिक्॥ पुनं
तुमामितियेःपावमानीरितिपावमानीर्येअध्येतिचानुष्टुभः। अभिषेके०। यदंतियच्चदूर
केभयंविंदतिमामिह। पवमानवितज्जहि॥ पवमानःसोअद्यनःपवित्रेणविचर्षणिः।

यःपोतासपुनातुनः। यत्तेपवित्रमर्चिष्यग्नेविततमंतरा॥ ब्रह्मतेनपुनीहिनः। यत्तेपवित्रमर्चिव
दग्नेतेनपुनीहिनः॥ ब्रह्मसवैःपुनीहिनः। उभाभ्यांदेवसवितःपवित्रेणसवेनच। मांपुनीहिवि
श्वतः॥ त्रिभिष्ट्वंदेवसवितवर्षिष्ठैःसोमधामभिः। अग्नेदक्षैःपुनीहिनः। पुनंतुमांदेवजनाःपुनं
तुवसवोधियाविश्वेदेवाःपुनीतमाजातवेदः। पुनीहिमा प्रप्यायस्वप्रस्यंदस्वसोमविश्वेभिरंशु
भिः। देवेभ्यउत्तमंहविः। उपप्रियंपनिप्नतंयुवानमाहुतीवृधं॥ अगन्मबिभ्रतोनमः। अलाय्य
स्यपरशुर्ननाशतमायवस्यदेवसोम। आखुंचिदेवसोमयःपावमानीरध्येत्यृषिभिः। संभृतंर
सं। सर्वंसपूतमश्नातिस्वदितंमातरिश्वना॥ पावमानीर्योअध्येत्यृषिभिःसंभृतंरसं। तस्मैसर
स्वतीदुहेक्षीरंसर्पिर्मधूदकं॥ अग्निःशुचिव्रततमइतिविरूपोग्निर्गायत्री॥ अभिषेके विनियो
गः॥ अग्निःशुचिव्रततमःशुचिर्विप्रःशुचिःकविः। शुचीरोचतआहुतः समुद्रज्येष्ठा इति ऋचां
चतुष्टयस्यवसिष्ठआपस्त्रिष्टुप्॥ अभिषे०॥ समुद्रज्येष्ठाःसलिलस्यमध्यात्पुनानायंत्य
निविशमानाः॥ इंद्रोयावज्रीवृषभोरराद ता॥ आपोदेवीरिहमामवंतु॥ याआपोदिव्याउतवा

ना॰प्र॰ ५ स्वंवंतिरवनित्रिमाउ तवाषाः स्वयंजाः समुद्रार्थापाः शुचयः पावकास्ता आपो देवीरिहमामवं
तु यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यंजनानां मधुश्चुतः शुचयो याः पावका
स्ता आपो देवीरिहमामवंतु यासु राजा वरुणो यासु सोमो विश्वेदेवा यासूर्जं मदंति वैश्वानरो
यास्वग्निः प्रविष्टस्ता आपो देवीरिहमामवंतु ॥ यासां राजा वरुणो याति मध्ये सत्यानृते । अव
पश्यंजनानां मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिहमामवंतु । यासु राजा वरुणो
यासु सोमो विश्वेदेवा यासूर्जं मदंति वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो देवीरिहमामवंतु
॥ आयंतामिति ऋक्त्रयस्य समर्षयो विश्वेदेवा अनुष्टुप् ॥ अभिषेके विनियोगः ॥ आमिहदेवता
यतां मरुतां गणाः ॥ आयंतां विश्वा भूतानि यथा यमरपा असत ॥ आपइद्वा उ भेषजीरापो अ अं॰ले॰ ७
मीवचातनीः ॥ आपः सर्वस्य भेषजीस्तास्ते कृण्वंतु भेषजं ॥ हस्ताभ्यां दशशाखाभ्यां जिह्वा
वाचः पुरोगवी । अनामयित्नुभ्यां त्वोपस्पृशामसि । इमा आपः शिवतमा इति ऋक्त्रयं । इमार
आपः शिवतमा इमाः सर्वस्य भेषजीः इमा राष्ट्रस्य वर्द्धनीरिमा राष्ट्रभृतो मताः । याभिरिंद्रमभ्य

षिंचत्प्रजापतिः सोमं राजानं वरुणं यमं मनुं । ताभिरद्भिरभिषिंचामि त्वामहं राष्ट्रस्य त्वमभिराजो भवेह ॥
महांतं त्वा महीनां सम्राजं चर्षणीनां देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् । देवस्य त्वा सवि
तुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां । अग्नेस्तेजसा सूर्यस्य वर्चसेंद्रस्येंद्रियेणाभिषिंचामि
बलाय श्रियै यशसेन्नाद्याय । ॐ भूर्भुवस्वः इत्येताभिर्व्याहृतिभिः ॥ कुशाग्रैः सपत्नीं वर
मभिषिंचेयुः ॥ ततः सुवासिनीभिर्नीराजनं कार्यं यथाचारं ततो ब्राह्मणानां वैदिकमंत्राशिषो ग्राह्या
कर्मांतेपि पुनरेवं कार्यमिति जयपंतादिसंमतः प्रयोगपारिजातकारप्रयोक्तः ॥ पुण्याहवाचनवि
धिः ॥ अथ हेमाद्रौ दानखंडे ॥ ध्वजकृत्सगद्यपरिशिष्टेनोक्तः सकलसाधारणशिष्टाचारआ
सम्प्रपुण्याहवाचनप्रयोगः कृतमंगलस्नानः ॥ स्नातः कृतः कृताचमनः प्राङ्मुखो यजमानो व
स्त्रालंकृतैपीठे उपविश्य पत्नीं स्वदक्षिणतः प्राङ्मुखीमुपवेश्य संस्कार्यं चेत्तथैवोपवेश्य । ॐ सु
मुखश्चैकदंतश्चैस्मारिः शुक्लांबरधरं॰ अभिमतार्थ॰ सर्वमंगलमांगल्ये॰ सर्वदासर्वकार्येषु
॰ सर्वेषुकालेषु समस्तदेशे॰ तदेवलग्नं॰ यत्रयोगेश्वरः कृष्णो सर्वेष्वारब्धकार्येषु इतिश्लोका

नयपिताभ्यां लक्ष्मीनारायणाभ्यां नमः उमामहेश्वराभ्यां नमः ॥ शचीपुरंदराभ्यां नमः ॥ मातापित
भ्यां नमः ॥ इष्टदेवताभ्यो नमः ॥ ग्रामदेवताभ्यो नमः ॥ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥ आचमनप्रा
णायामौ कृत्वा देशकालौ संकीर्त्य अमुकफलसिद्ध्यर्थं श्वो वाद्य वा अमुककर्म करिष्ये तदंगतया विहि
तं पुण्याहवाचनादिक करिष्ये इति संकल्पयेत् ॥ यदा तु प्रयोगबहिर्भूतं पुण्याहवाचनाद्यंगं तदा
मुकफलसिद्ध्यर्थं अमुकफलसिद्ध्यर्थं अमुककर्मकर्तृमंगभूतमादौ पुण्याहवाचनादिकं क
रिष्य इति प्रत्येकसंकल्पः ॥ प्रधानसंकल्पस्तु सर्वकृत्यानादौ नरववाद्यो वा कार्यः ॥ ततः कर्त्ता स्व
पुरतः ॥ महीद्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां ॥ पिपृतां नो भरीमभिः इति मंत्रात् स्वदक्षिणो
त्तरतो भूमिं स्पृष्ट्वा ॥ ॐ ओषधयः ॥ संवदंते सोमेन सह राज्ञा ॥ यस्मै कृणोति ब्राह्मणस्तं राजन्पार ना॰प्र॰ ६
यामसीति तथैव तंडुलपुंजौ कृत्वा आकलशेषु धावति पवित्रे परिषिंचते उक्थैर्यज्ञेषु वर्धते ॥
इति पुंजोपरि द्वौ सलक्षणौ धातुमयौ मृन्मयौ वा कलशौ निधाय ॥ इमं मे गंगे यमुने सरस्व
ति शुतुद्रि स्तोमं सचता परुष्ण्या ॥ असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥

इति तीर्थजलेन प्रसेकं पूरयित्वा ॥ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ॥ ईश्वरीं सर्वभूतानां
तामिहोपह्वये श्रियं ॥ इति गंधं कलशयोः प्रक्षिप्य चंदनादिना तावनुलिप्य ॥ पुष्पमालाभूषितौ र
तौ कृत्वा ॥ पूर्णा दर्वि परापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो ॥ इति तंडुलौ
भ्यां सफलाभ्यां पात्राभ्यां कलशयोराननपिधानात् । सर्वत्र प्रतिकलशं मंत्रावृत्तिरुत्तरसंस्थाश्च
॥ पुण्याहवाचने चैव यः कुर्यात्कलशार्चनं ॥ दक्षिणस्थस्थितश्चैव उत्तरस्तु चरस्तथा ॥ शन
चालयेद्दक्षिणस्थं उत्तरस्थं तु चालयेत् ॥ अन्यथा धर्महानिः स्यादेष धर्मः सनातनः ॥ तत्त्वाया
मि शुनःशेपो वरुणस्त्रिष्टुप् कलशे वरुणावाहने विनियोगः ॥ ॐ तत्त्वा यामि ब्रह्मणा वंदमान
स्तदाशास्ते यजमानो हविर्भिः ॥ अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ॥ इत्युत्त
रकलशे वरुणमावाहयेत् चंदनादिभिः पूजयेत् ततः उत्तरकलशे देवता आवाहयेद्यथा ॥ कलशस्य
मुखे विष्णुः कंठे रुद्रः समाश्रितः । मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सा
गराः सप्त सप्तद्वीपा वसुंधरा ॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अंगैश्च सहिताः

सर्वे कलशांतु समायान्तु ता॥ अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा॥ आयांतु मम मंत्रांस्ते दुरि
तक्षयकारका इति। ततस्तत्कलशे अक्षताः॥ इति॥ ततस्तत्कलशे अक्षताः॥ इति निक्षिपेत्॥
मातृदेवो भव पितृदेवो भव आचार्यदेवो भव॥ अतिथिदेवो भव॥ ततः अवनिकृतजानुमंडल
:कमलमुकुलसदृशमंजलिं कृत्वा शिरस्यवधारयद् दक्षिणेन पाणिना सुवर्णपूर्णकलशं धा
रयित्वा आशिषः संतु। दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च॥ तेनायुःप्रमाणेन पुण्या
हं दीर्घमायुरस्तु॥ शिवा आपः संतु॥ सौमनस्यमस्तु॥ अक्षतं चारिष्टं चास्तु॥ गंधाः पांतु सुमं
गल्यं चास्तु॥ अक्षताः पांतु आयुष्यमस्तु। पुष्पाणि पांतु॥ सौश्रियमस्तु॥ ताम्बूलाः पांतु ऐश्वर्यम
स्तु। दक्षिणाः पांतु बहुदेयं चास्तु दीर्घमायुः शान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो वित्तं ब ना॰भ॰
हुपुत्रं चायुष्यं चास्तु। अद्य सर्वत्र श्री पुण्याहमस्त्विति प्रतिवचनं देयं कृत्वा सर्ववेदयज्ञक्रियाक ९
रणकर्मारंभाः शुभाः शोभनाः प्रवर्तन्ते॥ तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं ब
हुऋषिमतं संविज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये विप्राः वाच्यतामिति वदेयुः॥

वसुन्धरस्त्रापि यथा योगं प्रयुज्यतां॥ ततो यजमानः॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभि
र्यजत्राः॥ स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः॥ इसेका ऋक्॥ द्रविणोदा द्रविणस
स्तुरस्य द्रविणोदाः सनरस्य प्रयंसत्॥ द्रविणोदा वीरवतीमिषं नो द्रविणोदा रासते दीर्घमा
युः॥ सविता पश्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात्सविता नः सुवतु सर्वता
तिं सविता नो रासतां दीर्घमायुः॥ नवोनवो भवति जायमानो ह्नां केतुरुषसामेत्यग्रं॥ भागं देवे
भ्यो विदधात्यायन्प्रचन्द्रमास्तिरते दीर्घमायुः॥४॥ उच्चा दिवि दक्षिणावंतो अस्थुर्ये अश्वदाः॥
सह ते सूर्येण॥ हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोम प्रतिरंत आयुः॥५॥ आपउंदंतु जीवसे
दीर्घायुत्वाय वर्चसे यस्त्वा हृदा कीरिणा मन्यमानो मर्त्यं मर्त्यो जोहवीमि जातवेदो यशो अस्मासु धे
हि प्रजाभिरग्ने अमृतत्वमश्यां॥ यस्मै त्वं सुकृते जातवेद उलोकमग्ने कृणवः स्योनं॥ अश्विनं सपु
त्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति सं त्वा सिंचामि यजुषा प्रजामायुर्धनं च। व्रतनियमत
पःस्वाध्यायक्रतुदमदानविशिष्टानां ब्राह्मणानां मनः समाधीयतां विप्राः समाहितमनसः

स्म॥ यजमानस्य शांतिरस्तु पुष्टिरस्तु॥ तुष्टिरस्तु॥ अविघ्नमस्तु॥ आयुष्यमस्तु॥ आरोग्यमस्तु
॥ शिवं कर्मास्तु। कर्मसमृद्धिरस्तु। दृष्टसंपदस्तु॥ अरिष्टनिरसनमस्तु यत्पापं तत्प्रतिहतम
स्तु॥ यच्छ्रेयस्तदस्तु॥ उत्तरे कर्मण्यविघ्नमस्तु॥ उत्तरोत्तरमहरहरभिवृद्धिरस्तु॥ उत्तरोत्तराः क्रि
याः शुभाः शोभनाः संपद्यंतां॥ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां॥ तिथि
करणमुहूर्तनक्षत्रे सग्रहे सदैवते प्रीयेतां॥ अग्निपुरोगा विश्वेदेवाः प्रीयंतां॥ इंद्रपुरोगा मरु
द्गणाः प्रीयंतां॥ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंतां॥ माहेश्वरीपुरोगा उमामातरः प्रीयंतां॥ ब्रह्म
ब्राह्मणाश्च प्रीयंतां॥ श्रीसरस्वत्यौ प्रीयेतां॥ श्रद्धामेधे प्रीयेतां॥ भगवती कात्यायनी प्रीयतां॥
भगवती वृद्धिकरी प्रीयतां॥ भगवंतौ विघ्नविनायकौ प्रीयेतां॥ भगवान्स्वामी महासेनः सप ना॰भ॰ १०
त्नीकः ससुतः सपार्षदः सर्वस्थानगतः प्रीयतां॥ हरिहरहिरण्यगर्भाः प्रीयंतां॥ सर्वाग्राम
देवताः प्रीयंतां सर्वाः कुलदेवताः प्रीयंतां॥ हताश्च ब्रह्मद्विषः हताः परिपंथिनः॥ हता अ
स्य कर्मणो विघ्नकर्तारः॥ शत्रवः पराभवं यांतु शाम्यंतु घोराणि शाम्यंतु पापानि॥ शाम्यंत्वि

तयः शुभानि वर्द्धंतां॥ शिवा आपः संतु॥ शिवा ऋतवः संतु॥ शिवा ओषधयः संतु॥ शिवा वन
स्पतयः संतु॥ शिवा अतिथयः संतु॥ अहोरात्रे शिवे स्यातां॥ निकामे निकामे नः पर्जन्यो वर्षतु फ
लवत्यो न ओषधयः पच्यंतां॥ योगक्षेमो नः कल्पतां॥ शुक्रांगारकबुधबृहस्पतिशनैश्चररा
हुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयंतां॥ भगवान्नारायणः प्रीयतां॥ भगवा
न्पर्जन्यः प्रीयतां॥ भगवान्स्वामी महासेनः॥ पुण्याहकालान्वाचयिष्ये वाच्यतां॥ उद्गातेव शकुने
साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि॥ वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकु
ने भद्रमा वद विश्वतो नः शकुने पुण्यमा वद॥ याज्यया यजति प्रति वै याज्या पुण्यो वै लक्ष्मीः पु
ण्यामेव लक्ष्मीं संभावयति पुण्यां लक्ष्मीं संस्कुरुते॥ यस्य पुण्यं नक्षत्रं तद्भद्र कुर्वीतोपव्युषं॥ यदा
वै सूर्य उदेति॥ अथ नक्षत्रं नैति यावति॥ तत्र सूर्यो गच्छेत्॥ यत्र जघन्यं पश्येत्॥ तावति कुर्वीत
यत्कारी स्यात्पुण्याह एव कुरुते एतानि यमनक्षत्राणि यान्येव देवनक्षत्राणि तेषु कुर्वीत यत्का
री स्यात्॥ पुण्याह एव कुरुते॥ मघं सहकुटुंबिने॥ महाजनान्नमस्कुर्वाणायाशीर्वचनमपेक्ष

मायायामकुकर्मणः पुण्याहं भवंतो ब्रुवंतितित्रित्रिर्वदेत् ॥ ॐ पुण्याहमिति त्रिर्विप्राः ॥ ॐ स्वस्तये
वायुमुपब्रवामहे सोमं स्वस्ति भुवनस्य यस्पतिः ॥ बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय ॥ आदित्या
सो भवंतु नः ॥ आदित्सउरुष्यनायः पथ्येवेनः स्वस्त्याप्रयंतिपथ्यास्वस्तिमभ्युद्यतिस्वस्त्युद्यति
॥ स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो
बृहस्पतिर्दधातु ॥ जुष्टो देवा वसवः सोम्यासश्चतस्रो देवीरजराः श्रविष्ठाः ते यज्ञं पान्तु रज
सः पुरस्तात् ॥ संवत्सरीणममृतं स्वस्तिमघं सहकुटं विनेमहाजनानमस्कुर्वाणाया ॥
शार्वचनमपेक्ष्य मायामास्मिकर्मणः स्वस्तिं भवंतो ब्रुवंतितित्रिः ॥ आयुष्मते स्वस्तीति प्रतिवच
नं त्रिः ॥ अध्यामस्तोमं सनुष्यामवा तमानोमंत्रं सरथेहोपयातं यशोमपक्षेम धृष्णोष्टं तराभृताग्नी
अश्विनो कामममप्राः ॥ सर्वामृद्धिमृध्यामिति तवैनेत्तसैवपुरस्तात्सर्वं भवंतुं रौतिमं ध्यातोश्चरे
रूपरिष्टाद्यः अस्सर्वतोत्क्षद्वणाहं परिभूयसर्वामृद्धिमश्नोतिय एवं वेद ॥ अध्यासमहमेनं मसो
पद्यामित्रं देवं मित्रधेयं न्नो अस्तु अनुराधान्हविषा वर्धयंतः ॥ शतंजीवेम शरदः सुवीराः ॥

ना॰भ॰
१२

त्राणित्राणि वै देवानामृद्धानि त्रिणि छंदांसि त्रीणि सवनानि त्रय इमे लोकाः ॥ अध्यामेव तद्वीर्य एषु
लोकेषु प्रतितिष्ठति ऋद्धिमृध्यासमस्मिन्नमुककर्मणः ॥ ऋद्धिं भवंतो ब्रुवंतितिति त्रिः ॥ ॐ ऋध्यतामिति
प्रतिवचनं त्रिः ॥ ॐ श्रियै जातः श्रिय आनिरियाय श्रियं वयो जरितृभ्यो दधाति ॥ श्रियं वसाना
अमृतत्वमायन्भवंति सत्या समिता मितः ॥ श्रिय एवैनं तच्छ्रियामादधाति संततमृचा वषट्कृत्यं संत
तं संधीयते ॥ प्रजया पशुभिर्य एवं वेद यस्मिन्ब्राह्मणः श्रीर्धर्वमेतदमुं च लोकमिदं च सर्वं ॥ त
न्नो नक्षत्रमभिजिद्विजित्तसश्रियं दधात्वहृणीयमानं ॥ अहेर्बुध्नियं मंत्रं मे गोपायय मृषयस्त्र
यीविदा विदुः ॥ ऋचः सामानि यजूंषि ॥ सा हि श्रीरमृता सतां ॥ एतैर्मंत्रैर्नीराजनं कारयंति ॥ मद्धामि
त्रादिस्वर्वत ॥ अमुककर्मणः ॥ श्रीरस्त्विति भवंतो ब्रुवंतितित्रिर्ब्रूयात् ॥ ॐ अस्तु श्रीरिति त्रि
र्विप्राः ॥ वर्धनं परिपूर्णमस्तु ॥ शिवं कर्मास्तु ॥ गोत्राभिवृद्धिरस्तु ॥ प्रजापतिः प्रीयतां ॥ मुक्तेभिर
गेरजंप्रातनत्वात् क्रतुं पुनातः कविभिः पवित्रैः शोचिर्वसानः पर्यापुरुषाणि श्रियं घममाज्ये ॥ बृ
हतीरनृताः ॥ तदस्यैघर्म्मे कोमिमानोमरुतः ॥ परिविष्टो रोमरुत्नस्यावसनरहे ॥ आविसि

तस्य कामप्रदो विश्वे देवाः सभासद इति। ततउत्तरकलशं दक्षिणहस्ते दक्षिणकलशं वामहस्ते गृही
त्वा तां भां धारयन्पश्यंतं तेषां पात्रे निषिंचेदभिमंत्र्य॥ ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अ
नमीवो भवा नः। यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे। वास्तोष्पते प्र
तरणो न एधि गयस्फानो गोभिरश्वेभिरिंदो। अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जु
षस्व। वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या। पाहि क्षेम उत योगे वरं नो
यूयं पात स्वस्तिभिः सदा नः। अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशेव एधि न
ः शिवं शिवं ततः कर्तुर्यजमानः पत्नीमुपवेश्य पतितज्जलेन पल्लव। उर्वाभिरुद्ररुद्रैर्वा विप्रा अ
भिषिंचेयुस्तिष्ठंतः। तत्र मंत्राः। समुद्रज्येष्ठा इति ऋचश्चतस्रः। त्वामिह देवा इति श्लोकत्रयं० ना॰भ॰
इमा आपः शिवतमा इत्येतेन तृचेन। देवस्य त्वेति यजुषा॥ ॐ भूर्भुवः स्वरित्येताभिर्व्याहृति १२
भिः इंद्रियं वा एतदस्मिन्लोके यद्दधि इत्यादि ब्राह्मणेन॥ सुरास्त्वामभिषिंचंतु इत्यादिपौराण
श्लोकान्पठंस्तमभिषिंचेत्। सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः। वासुदेवो जगन्नाथः

स्तथा संकर्षणो विभुः। प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते॥ आखंडलोऽग्निर्भगवान्यमो वै निरृ
तिस्तथा। वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः। ब्रह्मणा सहिताः सर्वे दिक्पालाः पातु मे
सदा। कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा वपुः शांतिस्तुष्टिः कांतिश्च
मातरः। एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः॥ आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजा
ः। ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च तर्पिताः। देवदानवगंधर्वा यक्षराक्षसपन्नगाः। ऋष
यो मनवो गावो देवमातर एव च॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः। अस्त्राणि सर्व
शास्त्राणि राजानो वाहनानि च॥ औषधानि च रत्नानि कालस्यावयवाश्च ये। सरितः सागराः शै
लास्तीर्थानि जलदा नदाः। एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये॥ ॥ इति पौराणश्लोकाः
॥ ॥ तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजं
शन्नो अस्तु द्विपदे शं चतुष्पदे॥ इति मंत्रांते अमृताभिषेकोऽस्त्विति वदेयुः। ततः आचार्यप्रमुख
स्नादिदानं तत्संनिधानं च एवं वेदकृद्विशिष्टौ कौशिकाचार्यप्रासंगिकीकृत्यपुण्याहवाचनमुक्तं

॥ ॥इति श्रीमद्दिव्यकुटुम्बिकुलश्रीरामेश्वरभट्टसुतश्रीनारायणभट्टविरचिते प्रयोगरत्ने संस्क
रकर्मणि पुण्याहवाचनप्रयोगः॥ ॥अथ लोकानुसारेण नक्षत्रपक्षमाश्रित्य अंकुरा
र्पणप्रयोगः॥ ॥गर्भाधानादिनामकर्मान्तकर्माणि हित्वा॥ अत्र अन्नप्राशनादिविवाहान्तापत्यसं
स्कारेषु तन्त्रेषु च नवागारप्रवेशादिशुभकर्मसु सर्वोंऽकुरार्पणं कुर्यात्। तद्यथा। देशका
लौ स्मृत्वा अमुककर्मसाफल्यनिरंतरशुभत्वसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थमंकुरार्पणं
करिष्य इति संकल्प्य शुद्धभूमिं गोमयेनोपलिप्य रंगवल्ल्यादिनिरलंकृत्य तत्र सिताक्षतान् प्र
कीर्य किंचिदूर्ध्वभारं नववैणवपात्रं सूत्रेणावेष्ट्य। तदेव पालिकाख्येन संस्थाप्य। वल्मीकमृदं हस्त
पक्वमृत्तिकां गोमयचूर्णं च तत्र प्रक्षिप्य पालिकामूलेष्वितरतंडुलैः पूरयित्वा ऊर्ध्वं किंचिद्राम्बस्थाद्विरा
श्वत्थपत्राणामुपरि शुभमुहूर्तेन दक्षिणपात्रे निक्षिप्य तत्र सितरक्तहरिद्वर्णानि पुष्पाण्यप ना॰प्र॰ १३
वकीर्य। मध्यादिपंचस्थानेषु पंचदेवानावाहयेत्॥ तत्र ब्रह्मयज्ञानेन कुलो ब्रह्मा त्रिष्टुप्। ब्र
ह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः स बुध्न्या उपमा अस्य विष्ठाः सतश्च यो

निमसतश्च विवः। अनेन पालिकामध्ये ब्रह्माणमावाहयेत्॥ यत इंद्र भयामहे आगाथो गर्भ इंद्रो
बृहस्पतीयत इंद्र भयामहे ततो नो अभयं कृधि। मघवञ्छग्धि तव तन्न ऊतिभिर्वि द्विषो विमृधो जहि
। अनेन पूर्वभागे इंद्रमावाहयेत्। नाके सुपर्णं भार्गवो वेनो यम स्त्रिष्टुप्। नाके सुपर्णमुपपत्तिवांसं
संगिरो वेनानामकृपंत पूर्वीः। शिशुं रिहंति मतयः। पनिप्नतं हिरण्यपर्णं शकुनं श्रामणि स्थां। मंत्रां
तरं स्वतं हृदा वेनतो अभ्यचक्षत त्वा हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भ — — अने
न दक्षिणभागे यमं। तत्त्वा यामि शुनःशेपो वरुणस्त्रिष्टुप्। तत्त्वा यामि ब्रह्म
णा वंदमानस्तदाशास्ते यजमानो हविर्भिः। अहेळमानो वरुणेह बोध्युरुशंस मान आयुः प्र
मोषीः। अनेन पश्चिमे वरुणं। सोमो धेनुं राहूगणो गोतमः। सोमस्त्रिष्टुप्। सोमो धेनुं सोमो अ
र्वंतमाशुं सोमो वीरं कर्मण्यं ददाति। सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै। अनेनोत्त
रे सोममावाहयेत्॥ ततो ब्रह्मणे नमः आसनमित्यादिभिर्गन्धाद्युपचारैः पंचदेवाः संपूज्य
सर्वपालिकापश्चिमतः आज्यं स्वस्ति ष्टत्रुपतिष्ठेत॥ इन्द्रा पतिन्नमस्यामि सर्वकामफलप्रदा

न॥ कुर्वंस्तु सफलं कर्म कुर्वंस्तु सततं शुभमिति॥ ततः श्वेततंडुलांस्तोयेन प्रक्षाल्य प्राच्यादिदिक्षु चतुर्दि
क्षु बीजप्रतिनिधित्वेन समंत्रं वापयेत्॥ तत्र॥ यतइंद्रोसादयश्चत्वारो मंत्राः प्रागुक्ताः॥ ॥ इति
श्री॰ सद्योकुमारार्पणविधिः॥ ॥ अथाभ्युदयिकश्राद्धविधिः॥ ॥ तत्र गर्भाधानादिषु गर्भसंस्कारे
षु जातकर्मादिषु पुत्रसंस्कारेषु अग्न्याधानादिषु श्रौतकर्मसु श्रावणाकर्मादिषु वापीकूपत
डागारामाद्युद्यापनादिषु स्मार्तकर्मसु श्रवणाकर्मादिषु वापीकूपतडागारामाद्युद्यापना
दिषु देवप्रतिष्ठायां वा नप्रस्थाश्रमसंन्याससंस्कारे तुलापुरुषादिमहादानादौ नवग्रहमख
होमे महानाम्न्यादिवेदव्रतेषु राज्याभिषेके शांतिकपौष्टिकेषु सर्वेषु च उपाकर्मोत्सर्जनयोरप्ये
के॰ नवीनयोर्वा अन्नयोरप्यन्नप्राप्ये वा विधेकार्यं॥ इदमाभ्युदयिकश्राद्धं वक्ष्यमाणं च मातृका
पूजनमेकस्यानेकसंस्कारेषु एकैकतंत्रेषु युगपदुपस्थितेषु सर्वादौ सकृदेव तंत्रेण कार्यं॥ न
तु प्रतिसंस्कारमावृत्त्या॰ यथा देवाद् कृतजातकर्मादिकस्योपनयनकाले जातकर्माद्युत
स्थाने देशांतरगतस्य मृतबुध्या कृतौर्ध्वदैहिकस्य पुनर्जातकर्मादिसंस्काराणां विहितानां

ना॰भ॰
१५

युगपदनुष्ठाने॰ कर्मनाशाजलस्पर्शादीनां प्रायश्चित्तं तथा पुनःसंस्काराणां युगपदनुष्ठा
ने वा॰ तदुक्तं ब्रह्मपुराणे॥ गणेशः क्रियमाणानां मातृभ्यः पूजनं सकृत्॥ सकृदेव भवेच्छ्रा
द्धमादौ न पृथगादिभिरिति॥ तत्राभ्युदयिकश्राद्धे कर्त्रेमि मानुषो दैवश्च द्विविधमातरश्चा देव्य
आः॥ तत्र मानुष्यो मातृपितामहि प्रपितामह्यः॥ मातामही मातृपितामही मातुः प्रपिता
मह्य इति षट्॥ पितृष्वसा मातृष्वसा चेति गौर्याद्याः षोडश॰ ब्राह्म्याद्यास्तथा सप्त गक्षे
त्रगणा॥ दक्षिणेन॰ ब्राह्म्याद्याः॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥ वाराही च तथे
न्द्राणी चामुंडाः सप्त मातरः॥ दुर्गां क्षेत्राधिपतिं गणाधिपतिं च पूजयेत्॥ तथा च कात्यायनः
॥ कुड्यलग्ना वसोर्धाराः पंच धारा घृतेन तु॥ कारयेत्सप्त वा धारा नातिनीचा न चोच्छ्रिताः॥ गौ
री पद्मा शची मेधा सावित्री विजया जया॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः॥ धृतिः पु
ष्टिस्तथा तुष्टिरात्मदेवतया सह॥ इति॥ आत्मदेवता॥ आत्मकुलदेवता॥ आयुष्याणि सर्वाणि त
थैव जपेत्तत्र समाहितः॥ आयुष्याणि आनो भद्रा इत्यादीनि॰ ततो वृद्धिश्राद्धं नवदैवत्यं पार्वण

त्रयात्मकं। तत्र क्रममाहाश्वलायनाचार्यः। मातापितामही चैव संस्तथा प्रपितामही॥ पित्रादयस्त्र
यश्चैव मातुः पित्रादयस्त्रयः। एते नवार्चनीयाः स्युः पितरोऽभ्युदये द्विजैरिति। यत्तु हेध्ववासिष्ठः
नांदीमुखे विवाहे च प्रपितामहपूर्वकं। नामसंकीर्तयेद्विद्वानन्यत्र पितृपूर्वकमिति स्मृत्यर्थ
साराच्च। वृद्धमुखास्तु। पितरो वृद्धिश्राद्धेषु भुंजत इति तच्छाखांतरविषयकं। आश्वलायना
नां तु आनुलोम्येन मात्रादिक्रमेणैव॥ आश्वलायनाचार्यवचनात्। यत्तु ब्रह्मपुराणे पितापि
तामहश्चैव तथैव प्रपितामहः। त्रयो ह्यश्रुमुखा ह्येते पितरः संप्रकीर्तिताः। तेभ्यः पूर्वे त्रयो ये तु
ते तु नांदीमुखाः स्मृता इति। तस्य हा प्रकरणे पवित्रमो दर्शपौर्णमासादिनिमित्तकश्राद्धविषयं
। तत्प्रकरणपाठादित्येवं हेमाद्र्यादय उचितं इह च नांदीमुखसंज्ञका न मात्रादीनुद्दिश्योक्ताः। विष्णु ना॰ मं॰ १५
पुराणोक्तं मातामहानुक्रम्य। नांदीमुखान्पितृन्नादौ न पर्येत्वयतो गृहीतास्तु तैः। ब्रह्मपुराणे॥
जन्मादिष्वनुक्रम्य पितृन्नांदीमुखान्नाम तर्पयेद्विधिपूर्वकमित्युक्तेः। वृद्धपाराशरेण तु। देवानाम
पि नांदीमुखेनमुक्तम् अत्र। नांदीमुखे मोदेवेभ्यः प्रदक्षिणं कुशास्तृणामिति वृद्धिश्राद्धे देवकार्य॥

कर्मादौ पूर्वेद्युर्मातृपार्वणमिति॥ असामर्थ्ये भवेत् पूर्वेद्युरेवाह्निमात्रकं। मध्याह्ने प्रेतकं। अप
पराह्ने मातामहानां। असामर्थ्ये संभवे आह हि मनुः। अलाभे मातामहानांश्राद्धं कालानां नांदी
श्राद्धत्रयं बुधः। पूर्वेद्युरेव कुर्वीत सर्वाह्नि मातृपूर्वकमिति। इदं च महत्सु कर्मसु पूर्वेद्युः अल्पेषु
तु कर्माहएव श्राद्धं। पुत्रजन्मनि तु दिवा रात्रौ वा भुक्तवतो यद्वा सिद्धाभावात् पुत्रजन्मानंतरमेव का
र्यं॥ अत्र संकल्पे विशेषः संग्रहे। शुभाय प्रथमानेन ह्यासंकल्पमाचरेत्॥ नवसप्तपदिवाकु
र्यान्निहरो दोषो न जायते॥ अत्र सप्तम्यर्थे त्वनामरूपाणामगोत्रिणां॥ अत्रान्नं चातिद्युम्ननांदी
श्राद्धे नलव्रत। कारिका संबंधनाम रूपं पाणिवर्ज्यैरत्र कर्मणि॥ अत्र सत्यवसू विश्वेदेवौ॥ त
त्र ते देविशेषमात्रादीनां प्रत्येकं द्वौ द्वौ। एवं विंशतिब्राह्मणाः। यद्वा मात्रादीनां त्रयाणां द्वौ द्वौ ए
वं मध्ये। अत्रनापसव्यं॥ तिलस्थाने यवाः पुष्पस्थाने स्नाहादा हृः। समज्ञानुनिपातनाभ्यां
वः भस्मात्रदानमाज्यस्थलएवेकुर्यात्। प्रदक्षिणमुपचारोऽत्र ज्ञेयः। क्रियेसादयो विशेषाः
थांतरतो ज्ञेयाः। पिंडदाने कुलदेशाचारतो व्यवस्था। भविष्यपुराणे। पिंडनिर्वपणं कुर्या

न्नवाकुर्यान्नराधिप। वृद्धिश्राद्धं महाबाहो कुलधर्मानवेक्ष्य तु॥ पिंडदानं प्रसेविद्धो वसिष्ठेन
क्तः॥ राधिककर्कंधुसंमिश्रान्पिंडान्दद्याद्यथाक्रमं। कर्कंधु बदरीफलं। तथा एकैकस्मै पिंड
द्वयं देयं॥ एकं नाम्ना परं तूष्णीं दद्यात्सिद्ध्यर्थं बुधः इति। चतुर्विंशतिमतान्॥ अमेचबहवोवि
शेषाग्रेयास्तरतो ज्ञेयाः दाक्षिणात्यानां विस्तृतवृद्धिश्राद्धाचाराभावान्नेह प्रोक्ताः॥ अथाभ्युद
यिके कर्तृनिर्णयः॥ सप्रायणीये। नांदीश्राद्धे पिता कुर्यादाद्ये पाणिग्रहे पुनः। अतऊर्ध्वं
प्रकुर्वीत स्वयमेव तु नांदिकं॥ द्वितीयपाणिग्रहादौ वर एव कुर्यादित्यर्थः॥ अथ कात्यायन
स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु॥ पिंडानोद्वहनात्तेषां तस्याभावे तु तत्क्रमात्॥ तेषां
सुतानां मोक्षार्थं भावात्मयमे विवाहपर्यंतं॥ पिता स्वपितृभ्यः पिंडान्नत दुपलक्षितं वृद्धिश्राद्धं
तु कुर्यादिति॥ तस्य पितुरभावे तस्य संस्कार्यस्य पितृव्यादयः क्रमस्तेन क्रमेण पितृव्यभ्रात्रादिस्व
तुलादिः॥ श्राद्धं दद्यात्स्वपितृभ्य इति हेमाद्रिणामाहं॥ जीवत्पितृकस्तु पितृपितुर्मात्रादिभ्यो
वृद्धिश्राद्धं कुर्यात्॥ वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति॥ येभ्य एव पिता दद्यात्तेभ्यो दद्या

त्स्वयं सुतः॥ एतत्साग्निकविषयमित्येके विज्ञानेश्वर॥ पितरि जीवति यः श्राद्धं कुर्यात्स ये
भ्यः पिता कुर्यात्तेभ्यः कुर्यात्॥ पितरि पितामहे च प्रपितामहे च जीवति नैव दद्यादिति श्रुत्वा
यत्तु मृधवाशिष्टे तु॥ जीवत्पितासुतसंस्कारे मातृमातामहस्योः कुर्यात्तस्याजीवत्सां माता
महस्यैव कुर्यादिति॥ अथास्य वशिष्ठप्रचुराचारपरिग्रहातः॥ संकल्पविधिना प्रयोगः॥ तदुपन
यनादिमहत्सुकर्मसु पूर्वेद्युः जातकर्मादि॥ अल्पेषु कर्मसु तदहरेव नांदीश्राद्धं कुर्यात्
तत्रैव संगोमयोपलिप्ते रंगमालादिभिरलंकृते॥ श्राद्धस्थले प्रतिमा व क्षतपुंजेषु दिक्षु ताती
युवाम्यपात्रामं संकल्पपूर्वकं मातृपितामही प्रपितामही माता महामातृपितामही मान्प्र
पितामही पितृपामाता च सारवा॥ अग्रिमानुक्रमात्प्रथासं भवं वयस्यो सर्वोक्ता विनाय
काद्याः गौर्यादिषोडशमातृः ब्राह्म्यादिसप्तमातृः दुर्गाक्षेत्रपालगणाधिपतिं च प्रत्ये
कं कांडानुसमयेन पदार्थानुसमयेन वा प्रणवादिनमोंतनाममंत्रैरावाहनादिभिर
भ्यर्चयेत्। यथा॥ ओं भद्राहूति दशानां गौतमो राहूगण ऋषिः। विश्वे देवा देवता॥ अ

घाः पंच जगत्यः षष्ठी विराट् सप्तमी जगती नव तिस्रः त्रिष्टुभः आयुष्य सूक्ते जपे विनियो
गः॥ ॐ आयं गौर्पा दिशो उद्गोरो मातृ सोनमो ॐ ब्रा स्पारि सप्तमातृस्योन महति संक्षेपेषा
समुदितरूपेण सर्वयेत॥ ततः ओं नो भद्रा इत्यादि शांतं जीवकार दीव वर्द्धमानाः इमं तहमं
तानृतात मुपवसतान्॥ ओ तमिंद्रा अग्निसविता बृहस्पतिः॥ तान्पुषाह विषमं पुनर्दुः॥ ओ
हार्बत्ता विंदत्वा पुनरागाः॥ पुनर्नवसिवूनितक्ष॥ सर्वमायुष्मते विंदं समभूषणा जिनं देवजे
तस हावानांत कृतारं रथानां अरिष्टनेमिं पृतनाजमाशुं स्वस्तयेताक्ष्यं मिहाहुवेम॥
इंदुस्येव रातिमाजो हुवानाः स्वस्तये नावमिवारुहेम॥ उ ध्यौनिष्ट ध्वीबकृलेगभीरेमावामेतो
रापरे तेो रिषाम सद्युम्निद्युः श्रवसा पंच कृष्टीः सूर्य इव ज्योतिषापस्तान सहस्रसातः शत
सा अस्परं हिनस्मावृरूं नेमयुवति नर्ह्यार्याः॥ महित्रीणामवोस्तु द्युक्षं मित्रस्यार्यम्णः॥ दुरा
धर्षं वरुणस्य॥ नहि तेषाममा चनना ध्वसु वारणेषु। ईशे रिपुरघशंसः॥ यस्मैपुत्रासो अ
दितेः प्रजीवसेमर्त्याय। ज्योतिर्यच्छंत्यजस्रं॥ तल्लूयोरा वृ॰ महतेकरोमि। तत्रोपदाति

प्राङ्मुख स्तिष्ठा दिसंकाल्पं। सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखाः मातृपितामहप्रपिता
मह्यो मुकगोत्राः नांदीमुखः पितृपितामहप्रपितामहाः अमुकगोत्राः नांदीमुखाः मातामह
हमातुः पितामहमातुः पितामहमातुः प्रपितामहा अमुकगोत्रा सपत्नीकाः एतानुद्दिश्य
संकल्पविधानेन नांदीश्राद्धं करिष्य इति संकल्प्य लक्षितलक्षणान् विंशतिसंख्याकान् अष्ट
संख्याकान् वा लक्षणान् सर्वत्र युः सद्यो वा देवपक्षे द्विपरिश्रारकौरोकार्यस्तं बुध्वा न्मातेषां पादान्
प्रक्षाल्य प्राङ्मुखानुपवेश्य पवित्रविभक्तो कार्यजुदर्भयुग्मासनं प्रदाय पाद्यं प्रदायक्षणं दत्वा
क्षिता यथा अमंत्रकमावाह्य गंधपुष्पधूपदीपाच्छादनाभरणानि प्रथमयादिद्दिदत्वा मधु
रद्रव्यसहितमन्नस्तमन्नं परिष्टृथिवी तेपात्रमित्यादि चतुर्थ्यंता साहाह्यं न ममेति सर्व
त्र संकल्पस्यापस्नेगायतेति पंचानां कण्वपो सितः सौभगायत्री जपे विनियोगः॥ एताः पंचर्च
श्राव्य पितातेरु॥ अग्नयोझानादौ कृतेहस्तप्रक्षालनादिकं कृत्वा द्राक्षामलके तत्र श्लक्ष्यंवा दक्षिणां
दत्वा माता पितामही चैव तथैवप्रपितामही॥ पितृपितामहश्चैव तथैव प्रपितामहः॥ माता

महस्त्वपिता च प्रपिता महकादयः॥ एते भवन्तु नः॥ प्रतापेष्ठे तु च मंगलं॥ इत्युक्त्वा कृतांजलिः सं
प्रार्थ्य प्रणिपत्य सज्ञात्वणा निसृज्य चम्मगोयाहिर्विसर्जयेत्॥ अथातो पिंडसंश्रसः॥ शिष्टे क्रिय
माणो वृद्धिश्राद्धप्रयोगः॥ पूर्ववड्डीर्यादी ब्राह्मणादीनां च सृज्ञां कृत्वा सउर्वा कुशानक्षत्रानजलं
चादाय सत्यवसुसंज्ञका विश्वेदेवा भूर्भुवः स्वः इदं वः पाद्यं॥ मातृपितामहीप्रपितामह्यः नांदी
मुख्यः भूर्भुवः स्वः इदं वः पाद्यं पितृपितामहप्रपितामहा नांदीमुखाः सपत्नीकाः भूर्भुवः स्वः इदं वः
पाद्यं पितृपितामहप्रपितामहा नांदीमुखाः सपत्नीकाः भूर्भुवः स्वः इदं वः पाद्यं इत्युक्त्वा सर्वत्र
पात्रे सउर्वाक्षतं जलं क्षिपेत्॥ एवमेव पुनः सत्यादीन् विश्वान् देवान् मात्रादीः पित्रादीन् मातामा
हादीश्च त्रीन् त्रीन् संबुध्योक्त्वा पूर्ववत्॥ आहूतिभिरिदमासनं गंधाधूपचारकल्पनं स्वाहा न मम इति
दुर्वाक्षतं गंधपुष्पजलानि सकृत्पात्रे निक्षिपेत्॥ ततो विनायकाद्यागो पाद्याहि उभ्यो मातरो ब्रा
ह्मणादिसमावरस्य भूर्भुवः स्वः इदं दास्यमानं वा युग्मब्राह्मणभोजनपर्याप्तममत्रं यथाशक्ति
सोपस्करममृतरूपेण स्वाहा न मम इति दुर्वादीनि निक्षिपेत्॥ एवं विश्वेभ्यो देवेभ्यो मात्रादिभ्यः पित्रा
दिभ्यो मातामहादिभ्यः सपत्नीकेभ्यः संबुध्य दद्यात्॥ अन्नाभावे अत्र पदस्थाने इदं दास्यमानं

ना॰श्रा॰ १९

वासोपस्करमाममिति वदेत्॥ तत्र चतुर्गुणं द्विगुणं समं वा॥ अन्नाभावेपि युग्मब्राह्मणभोजनपर्या
प्तमामं चतुर्गुणं द्विगुणं समं वा। हिरण्यं वा हिरण्यप्रतिनिधिभूतं द्रव्यं वेति वदन् दानं संक
ल्पयेत्॥ एवं द्रव्यः संकल्पयेत्। तत उपांशु गायत्रीइति पंचर्चः॥ उपास्मै गायता नरः पवमानाये
न्दवे॥ अभि देवाँ इयक्षते॥ अभिते मधुना पयोऽथर्वाणो अशिश्रयुः देवं देवाय देवयु॥ स नः पव
स्व शं गवे शं जनाय शमर्वते॥ शं राजन्नोषधीभ्यः॥ बभ्रवे नु स्वतवसे अरुणाय दिविस्पृशे॥ सोमा
य गाथमर्चत॥ हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन॥ मधावाधावता मधु॥ एताः पंचर्चः॥ आ
वर्तयित्वा कृतस्य हृदि श्वासं स्पृशन् नासिकापुटेन श्वासं मुक्त्वा तत्रातिनिधिमत्वेन द्रव्यं वा दक्षिणां संप्रद
द्यात्॥ नमम इत्युक्त्वा॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव। यत्कामास्ते जुहुमस्तन्नो
अस्तु वयं स्याम पतयो रयीणां॥ इति मंत्रं जप्त्वा॥ अनेन नांदीश्राद्धेन नांदीमुखदेवताः प्रीयंतां॥ इ
ति वदेत्॥ मातापितामहाश्चैवेति पूर्वमुक्तं॥ श्लोकद्वयं जपेत्॥ ततः आचारतः किंचित्॥ इडामग्ने पु
रुदंसं सनिं गोः शश्वत्तमं हवमानाय साध॥ स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्व
स्मे॥ इति मंत्रं जपन् संकल्पपात्रेण संघट्टयन्॥ शाष्टं कुर्यादिति॥ ततो मातृका विसर्जयेत्॥ जीवेम

तकस्यनमात्पार्वणं जीवुक्मातामहस्यनमातामहपार्वणं ॥ कारजेपातं ॥ जीवत्पितृकस्तुयेभ्य एव पि
तादद्यात्तेभ्योदद्यादित्युक्तमेव ॥ श्री ॥ नट० वृद्धिश्राद्धप्रयोगोनिर्णयसहितः ॥ ॥ अथकौतुकबंधप्र
योगः ॥ ॥ सचप्रत्युराचाराभावाक्षेपताः सक्तादिमात्रगृहीत्वा लिख्यते ॥ अथयन्तेनकृः अथकौ
तुकबंधस्यप्रयोगोत्रनिगद्यते ॥ विवाहादिशुभेकार्येरात्रौवापिदिवातथा ॥ सांकुरेपालिकायु
क्तेस्थंडिलेश्रीहरिं स्मरेत् ॥ सहस्रत्रनकांस्यनसोदकुंभनिधायच ॥ २ ॥ आचार्योदर्भमयकूर्चं
उपवेदकुंभेनिधायसाक्षतनकांस्यपात्रेपंचरत्नाकृतकार्पाससूत्रंनिधायतत्समीपेप्राङ्मुखं
यजमानमुपवेश्यसकुशहस्तेऽत्र ॥ सहकुंभोदकेनतत्सूत्रंमंत्रैरभिषिंचेत्तत्रमंत्राः ॥ भू
र्भुवः स्वरितिसमस्तव्याहृतेः प्रजापतिः प्रजापतिः प्रजापतीर्बृहती ॥ तत्सवितुर्विश्वामित्रः सवि
तागायत्री सूत्रप्रोक्षणेविनियोगः ॥ एवमुत्तरत्र ॥ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं । हो ना०भं०
तारंरत्नधातमं ॥ ऋग्वेदः ॥ इषेत्वोर्जेत्वावायवस्थदेवोवः सविताप्रार्पयतुश्रेष्ठतमायकर्मणे ॥ १९
आप्यायध्वमघ्न्यादेवभागमूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवाअयक्ष्मामावस्तेनईशतमाघ
शंसोरुद्रस्यहेतिः परिवोवृणक्तु ध्रुवाअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि ॥

॥ यजुर्वेदः ॥ अग्नआयाहिवीतयेगृणानोहव्यदातये । निहोतासत्सिबर्हिषि । सामवेदः ॥ शन्नोदेवीरभि
ष्टयआपोभवंतुपीतये । शंयोरभिस्रवंतुनः ॥ अथर्वणवेदः ॥ आपोहिष्ठेतिनवर्चस्यसूक्तस्यांब
रीषः सिंधुद्वीपआपोगायत्री । पंचमीवर्धमाना सप्तमीप्रतिष्ठाऽत्र्यसेद्वेअनुष्टुभौसूक्तप्रोक्षणे
विनियोगः ॥ एतान्बिंदुमांगिरसस्तिस्रश्चिरिंद्रोनुष्टुप् ॥ सूत्रप्रोक्षणेविनियोगः ॥ ऋतंचेतितृच
स्याघमर्षणोभाववृत्तोनुष्टुप्सूत्रप्रोक्षणेविनियोगः ॥ ऋतंचसत्यंचाभीद्धात्तपसोऽध्यजायत । ततो
रात्र्यजायत ॥ ततः समुद्रोअर्णवः । समुद्रादर्णवादधिसंवत्सरोअजायत ॥ अहोरात्राणिविदधद्वि
श्वस्यमिषतोवशी । सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् ॥ दिवंचपृथिवींचांतरिक्षमथोस्वः ॥
अश्वारूपमित्यस्यवामदेवोमरुतोजगतीसूत्रप्रोक्षणेविनियोगः ॥ अश्वारूपमरुतापवमानवमावा
सुमनआपर्वनस्तुते ॥ घर्मस्तुभ्योदेवआपृष्टयज्वनेद्युम्नश्रवसेमहिनम्णमर्चत ॥ स्वस्तिनो
मिमीतामित्यस्यात्रेयोविश्वेदेवास्त्रिष्टुप् । सूत्रप्रो० स्वादिष्ठयामदिष्ठयामदेष्ठयेतिदशर्चस्य
सूक्तस्यमधुछंदाः पवमानसोमोगायत्री ॥ रक्षोहणमितिपंचविंशत्यृचस्यभारद्वाजस्य
पायुरक्षोहाग्निस्त्रिष्टुप्ऽत्र्यस्यानुष्टुभः । रात्रीव्यख्यदित्यष्टर्चस्यसूक्तस्यसोभरःकु

त्रिकोमत्रावीभारद्वाजोग्निस्तयोगायत्री॥ सूत्रभो ०२ रक्षोहणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठमुप
यामि शर्म॥ शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तं॥ अयोदंष्ट्रो अर्चिषा या
तुधानानुप स्पृश जातवेदः समिद्धः। आ जिह्वया मूरदेवान्रभस्व क्रव्यादो वृक्त्व्यपि धत्स्वासन्॥ उभो
भयाविन्नुप धेहि दंष्ट्रा हिंस्रः शिशानो वरं परं च। उतांतरिक्षे परि याहि राजन् जंभैः सं धेह्य
भि यातुधानान्॥ यज्ञैरिषूः संनममानो अग्ने वाचा शल्याँ अशनिभिर्दिहानः। ताभिर्विध्य हृद
ये यातुधानान्प्रतीचो बाहून्प्रति भंग्ध्येषां॥ अग्ने त्वचं यातुधानस्य भिंधि हिंस्राशनिर्हरसा हंत्वेनं
॥ प्र पर्वाणि जातवेदः शृणीहि क्रव्यात्क्रविष्णुर्वि चिनोतु वृक्णं॥ यत्रेदानीं पश्यसि जातवेदस्तिष्ठं
तमग्न उत वा चरंतं। यद्वांत सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत्॥ दिवं च पृथिवीं चांतरिक्षे
पथिभिः पतंतं तमस्ता विध्य शर्वा शिशानः॥ उतालब्धं स्पृणुहि जातवेद आलेभानादृष्टिभिर्यातु
धानात्॥ अग्ने पूर्वो नि जहि शोशुचान आमादः क्ष्विंकास्तमदंत्वेनीः॥ इह प्र ब्रूहि यतमः सो अग्ने
यो यातुधानो य इदं कृणोति। तमा रभस्व समिधा यविष्ठ नृचक्षसश्चक्षुषे रंधयैनं। तीक्ष्णेना
ग्ने चक्षुषा रक्ष यज्ञं प्रांचं वसुभ्यः प्र णय प्रचेतः। हिंस्रं रक्षांस्यभि शोशुचानं मा त्वा दभन्यातुधा

ना॰भ॰
२०

नानृचक्षः॥ नृचक्षा रक्षः परि पश्य विक्षु तस्य त्रीणि प्रति शृणीह्यग्रा। तस्याग्ने पृष्टीर्हरसा शृणीहि त्रेधा
मूलं यातुधानस्य वृश्च॥ त्रिर्यातुधानः प्रसितिं त एत्वृतं यो अग्ने अनृतेन हंति। तमर्चिषा स्फूर्जयं
जातवेदः समक्षमेनं गृणते नि वृंग्धि॥ तदग्ने चक्षुः प्रति धेहि रेभे शफारुजं येन पश्यसि यातुधानं॥ अ
थर्ववज्ज्योतिषा दैव्येन सत्यं धूर्वंतमचितं न्योष। यदग्ने अद्य मिथुना शपातो यद्वाचस्तृष्टं जनयंत
रेभाः। मन्योर्मनसः शरव्या३ जायते या तया विध्य हृदये यातुधानान्॥ परा शृणीहि तपसा या
तुधानान्पराग्ने रक्षो हरसा शृणीहि॥ परार्चिषा मूरदेवां छृणीहि परासुतृपो अभि शोशुचानः॥
पराद्य देवा वृजिनं शृणंतु प्रत्यगेनं शपथा यंतु तृष्टाः। वाचास्तेनं शरव ऋच्छंतु मर्मन्विश्वस्यैतु प्र
सितिं यातुधानः॥ यः पौरुषेयेण क्रविषा समंक्ते यो अश्व्येन पशुना यातुधानः॥ यो अघ्न्याया
भरति क्षीरमग्ने तेषां शीर्षाणि हरसापि वृश्च॥ संवत्सरीणं पय उस्रियायास्तस्य माशीद्यातुधानो
नृचक्षः। पीयूषमग्ने यतमस्तितृप्सात्तं प्रत्यंचमर्चिषा विध्य मर्मन्॥ विषं गवां यातुधानाः पिबंत्वा वृ
श्च्यंतामदितये दुरेवाः। परैनान्देवः सविता ददातु परा भागमोषधीनां जयंतां। सनादग्ने मृणसि
यातुधानान्न त्वा रक्षांसि पृतनासु जिग्युः। अनु दह सहमूरान्क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः॥

त्वन्नो अग्ने अधरादुदक्तात्त्वं पश्चादुत रक्षा पुरस्तात् । प्रति ते ते अजरासस्तपिष्ठा अघशंसं शोशुच
तो दहन्तु ॥ ४ ॥ पश्चात्पुरस्तात् ॥ प्रति ते ते अजरासस्तपिष्ठाः सखे सखायमजरो जरिम्णेऽग्ने मर्ताँ अम
र्त्यस्त्वं नः ॥ परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि । धृषद्वर्णं दिवेदिवे हन्तारं भङ्गुरावतां ॥ विषे
ण भङ्गुरावतः प्रति ष्म रक्षसो दह । अग्ने तिग्मेन शोचिषा तपुरग्राभिरृष्टिभिः ॥ प्रत्यग्ने मिथुना
दह यातुधाना किमीदिना । सं त्वा शिशामि जागृह्यदब्धं विप्र मन्मभिः ॥ प्रत्यग्ने हरसा हरः शृणीहि
विश्वतः प्रति यातुधानस्य रक्षसो बलं वि रुज वीर्यं ॥ ५ ॥ रात्री भरम्भरातिसक्तं प्र मिद्रुत्वान्नलिखं
तं त्र कं ॥ ८ ॥ कृणुष्वेति पञ्चदशर्चस्य सूक्तस्य वामदेवो रक्षोहाग्निस्त्रिष्टुप् । सत्रप्रोक्षः । कृणुष्व
पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन । तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षस
स्तपिष्ठैः ॥ तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः । तपूंष्यग्ने जुह्वा पतङ्गानसंदि ना०भा०
तो वि सृज विष्वगुल्काः ॥ प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः । यो नो २१
दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत् ॥ उदग्ने तिष्ठ प्रत्या तनुष्व न्यमित्राँ ओष
तात्तिग्महेते । यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कं ॥ ऊर्ध्वो भव प्रति विध्या

अस्मदाविष्कृणुष्व दैव्यान्यग्ने । अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून् ॥ स
ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् । विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दु
रोणे विश्वेदस्मै सुदिना सासदिष्टिः ॥ अर्चामि ते सुमतिं घोष्यर्वाक्सं ते वावाता जरतामियं गीः । स्व
श्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥ इह त्वा भूर्या चरेदुप त्मन्दोषावस्तर्दीदिवांस
मनु द्यून् ॥ क्रीळन्तस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानां ॥ यस्त्वा स्वश्वः सुहिरण्यो अ
ग्न उपयाति वसुमता रथेन । तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत् ॥ महो रु
जामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय । त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सु
क्रतो दमूनाः ॥ अस्वप्नजस्तरणयः सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः । ते पायवः सध्र्यञ्चो निष
द्याग्ने तव नः पान्त्वमूर ॥ ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् । ररक्ष तान्सुकृतो वि
श्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥ त्वया वयं सधन्यस्त्वोतास्तव प्रणीत्यश्याम वाजान् । उभा शंसा
सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण ॥ अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभा
य । दहाशसो रक्षसः पाह्यस्मान्द्रुहो निदो मित्रमहो अवद्यात् ॥ १ ॥ तरक्षंमंदीति चतुर्णां अनुवाकः

पवमानसोमो गायत्री स्त्रयोगो॰ तरत्समंदी॰ सहस्रशीर्षेति षोडशर्चस्य सूक्तस्य नारायणः पुरुषोनु
ष्टुप्॥ अंत्यास्त्रिष्टुप्॥ सू॰न्यासो॰ नुं सहस्रशीर्षेति षोडशर्चः विष्णोर्नुकमिति षडृचस्य सूक्तस्य औच
थ्यो दीर्घतमा विष्णुस्त्रिष्टुप् स॰न्यासो॰ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः
कुचरो गिरिष्ठाः यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा॥ प्रविष्णवे शूषमेतु म
न्म गिरिक्षित उरुगायाय वृष्णे॥ य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः॥ यस्य
त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदंति॥ य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भु
वनानि विश्वा॥ तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदंति॥ उरुक्रमस्य स हि बंधुरित्था वि
ष्णोः पदे परमे मध्व उत्सः॥ ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृंगा अयासः॥ अत्राह तदुरुगा
यस्य वृष्णः परमं पदमवभाति भूरि॥ अतो देवा इति षडृचस्य सूक्तस्य काण्वो मेधातिथिर्विष्णुर्गाय
त्री॥ सूक्तजपे विनियोगः॥ अतो देवा इति सूक्तं पठनीयं॥ परो मात्रयेति सप्तर्चस्य सूक्तस्य मै
त्रावरुणो वसिष्ठो विष्णुस्त्रिष्टुप् स॰न्यासो॰ परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवंति॥ उभे

ना॰सं॰
२२

ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से॥ न ते विष्णो जायमानो न जातो देव महिम्नः परमंतमा
प॥ उदस्तभ्ना नाकमृष्वं बृहंतं दाधर्थ प्राचीं ककुभं पृथिव्याः॥ इरावती धेनुमती हि भूतं सूयवसिनी मनु
षे दशस्य॥ व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः॥ उरुं यज्ञाय चक्रथुरु लोकं
जनयंता सूर्यमुषासमग्निं॥ दासस्य चिद्वृषशिप्रस्य माया जघ्नथुर्नरा पृतनाज्येषु॥ इंद्राविष्णू दृंहि
ताः शंबरस्य नव पुरो नवतिं च श्नथिष्टं॥ शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरान्॥
इयं मनीषा बृहती बृहंतोरुक्रमा तवसा वर्धयंती॥ ररे वां स्तोमं विदथेषु विष्णो पिन्वतमिषो वृजनेष्विं
द्र॥ वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यं॥ वर्धंतु त्वा सुष्टुतयो गिरो मे यूयं पात
स्वस्तिभिः सदा नः॥ हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्य आनंदकर्दमचिक्लीतेंदिरासुता॰
ऋषयः श्रीरग्निर्देवता आद्यास्तिस्रोनुष्टुभः कांसोस्मितेति बृहती॥ उत्तरायोस्त्रिष्टुबष्टौ चानुष्टु
भोंत्या प्रस्तारपंक्तिः स॰न्यासो॰ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजां चंद्रां हिरण्मयीं लक्ष्मीं जातवे
दो ममावह॥ तां म आवह जातवेदो लक्ष्मीमनपगामिनीं॥ यस्यां हिरण्यं विंदेयं गामश्वं पुरुषान
हं॥ अश्वपूर्णां रथमध्यां हस्तिनादप्रमोदिनीं॥ श्रियं देवीमुपह्वये श्रीर्मा देवी जुषतां॥ कांसोस्मि

तांहिरण्यप्राकारम्मार्द्रांज्वलंतींतृप्तांतर्पयंतीं॥पद्मेस्थितांहिरण्यप्राकांपद्मवर्णांतामिहोपह्वयेश्रियं
।चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टामुदारां।तांपद्मनेमिंशरणमहंप्रपद्ये॥अलक्ष्मी
र्मेनश्यतांत्वांवृणोमि।आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः।तस्यफलानितप
सानुदंतुमायांतरायाश्चबाह्याअलक्ष्मीः।उपैतुमांदेवसखःकीर्तिश्चमणिनासह।प्रादुर्भूतोस्मि
राष्ट्रेस्मिन्कीर्तिंवृद्धिंददातुमे॥क्षुत्पिपासामलांज्येष्ठामलक्ष्मींनाशयाम्यहं।अभूतिमसमृद्धिं
चसर्वांनिर्णुदमेगृहात्॥गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं।ईश्वरींसर्वभूतानांतामिहो
पह्वयेश्रियं॥मनसःकाममाकूतिंवाचःसत्यमशीमहि।पशूनांरूपमन्नस्यमयिश्रीःश्रयतां
यशः।कर्दमेनप्रजाभूतामयिसंभवकर्दम।श्रियंवासयमेकुलेमातरंपद्ममालिनीं।आपस्त्रजंतु
स्निग्धानिचिक्लीतवसमेगृहे।नचदेवींमातरंश्रियंवासयमेकुले॥आर्द्रांपुष्करिणींपुष्टिंपिंगलां
पद्ममालिनीं।चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह॥आर्द्रांयःकरिणींयष्टिंसुवर्णांहेममा
लिनींसूर्यांहिरण्मयींलक्ष्मींजातवेदोममावह॥तांमआवहजातवेदोलक्ष्मीमनपगामिनीं॥य
स्यांहिरण्यंप्रभूतंगावोदास्योश्वान्विंदेयंपुरुषानहं॥यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहं।

ना०भ०
२३

॥श्रियःपंचदशर्चंचश्रीकामःसततंजपेत्।यज्जाग्रतस्याद्याःशिवसंकल्पाख्याःषण्मंत्राःपर
मात्मदेवत्याः॥यज्जाग्रतोदूरमुदैतिदैवंतदुसुप्तस्यतथैवैति।दूरंगमंज्योतिषांज्योतिरेकंतन्मेमनः
शिवसंकल्पमस्तु॥येनकर्माण्यपसोमनीषिणोयज्ञेकृण्वंतिविदथेषुधीराः।यदपूर्वंयक्षमंतः
प्रजानांतन्मेमनःशिवसं०२यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरंतरमृतंप्रजासु।यस्मान्नऋतेकिं
चनकर्मक्रियतेतन्मेमनःशिव०३।येनेदंभूतंभुवनंभविष्यत्परिगृहीतममृतेनसर्वं।येनयज्ञस्ता
यतेसप्तहोतातन्मेमनःशिव०४यस्मिन्नृचःसामयजूंषियस्मिन्प्रतिष्ठितारथनाभाविवाराः।यस्मिं
श्चित्तंसर्वमोतंप्रजानांतन्मेमनःशिवसं०५सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेभीशुभिर्वाजि
नइव॥हृत्प्रतिष्ठंयदजिरंयविष्ठंतन्मेमनःशिवसं०६।विहिहोत्रेतिपंचर्चस्यसूक्तस्यवामदेवोगोत
मोवायुरनुष्टुप्।सत्रप्रो०विहिहोत्राअवीताविपोनरायोअर्यः।वायवाचंद्रेणरथेनयाहिसुतस्यपी
तयेनिर्युवाणोअशस्तीर्नियुत्वांइंद्रसारथिः।वायवा०२अनुकृष्णेवसुधितायेमातेविश्वपेशसा
।वायवा०३वहंतुत्वामनोयुजोयुक्तासोनवतिर्नव।वायवा०४वामोअंतहरीणांसुवस्यपोष्याणां

उतवातेसहस्त्रिणो रयआयातुपाजसा॥ मुंचामिलेतिपंचर्चस्यप्राजापत्योयक्ष्मनाशन। इंद्राग्निंवं
सानुष्टपसूत्रप्रो॰ मुंचामित्वाहविषाज्ञाजीवनायकमज्ञातयक्ष्माउतराजयक्ष्मात्॥ ग्राहिर्जग्राह
यदिवैनदेवतस्मादिंद्राग्नीप्रमुमुक्तमेनं॥१॥ यदिक्षितायुर्यदिवापरेतोयदिमृत्योरंतिकंनीतएव॥
परिवैन देवतस्मादिंद्राग्नीप्रमुमुक्तमेनं॥१॥ यदिक्षितायुर्यदिवापरेतोयदिमृत्योरंतिकंनीतएव
तमाहरामिनिर्ऋतेरुपस्थादस्पार्षमेनंशतशारदाय॥२॥ सहस्राक्षेणशतवीर्येणशतायुषा
हविषाहार्षमेनं॥ शतंयथेमंशरदोनयातींद्रोविश्वस्यदुरितस्यपारं॥३॥ शतंजीवशरदोवर्धमा
नःशतंहेमंताञ्छतमुवसंतान्॥ शतमिंद्राग्नीसविताबृहस्पतिःशतायुषाहविषेमंपुनर्दुः॥ आहा
र्षंत्वाविदंत्वापुनरागाःपुनर्नव॥ सर्वांगसर्वंतेचक्षुःसर्वमायुश्चतेविदं। स्योनापृथिवीतिमे
धातिथिर्निर्ऋतिगायत्रीसूत्रप्रो॰ स्योनापृथिविनोभवानृक्षरानिवेशनी॥ यच्छानःशर्मसप्रथः॥ द्रवि ना॰भं॰ २५
णोदाआंगिरसःकुत्सोद्रविणोदास्त्रिष्टुप्॥ सूत्रप्रोक्षणेवि॰। द्रविणोदाद्रविणसस्तुरस्यद्रविणो
दाःसनरस्यप्रयंसत्॥ द्रविणोदावीरवतीमिषंनोद्रविणोदारासतेदीर्घमायुः। सवितापश्चात्ता
त्सानाकुलीशोविश्वेदेवाजगती॥ स्त्रक्षाभिषे॰ सवितापश्चातात्॰ नवोनवोभवतिइतिसूर्यासा

विज्ञाचंद्रमास्त्रिष्टुप्। सत्राभिषे॰। नवोनवोभवतिजायमानः॥ मंत्रास्तुस्वस्त्ययनप्रकरणेलिखितंविद्यु
त्रयापतंतीपुरूरवउर्वशीत्रिष्टुप्। स्त्राभिषे॰ विद्युन्नयापतंतीदविद्योभरंतीमेअप्याका
म्यानिजनिष्टोअपोनर्यःसुजातःप्रोर्वशीतिरंतदीर्घमायुः॥ उलूकयातुंवशिष्टइंद्रस्त्रिष्टुप्। स्त्राभि॰
उलूकयातुंशुशुलूकयातुंजहिश्वयातुमुतकोकयातुं॥ सुपर्णयातुमुतगृध्रयातुंजहिश्वयातुमु
तकोकयातुं॥ सुपर्णयातुमुतगृध्रयातुमुतगृध्रयातुंजहिश्वयातुंजहिश्वयातुमुतकोकयातुं। सुप
र्णयातुमुतगृध्रयातुंदृषदेवप्रमृणरक्षइंद्राग्निपिंगनृष्टिमंदेवोदाशिपुरूपरंद्रोगायत्री सत्रा॰। पिं
गंभृष्टिमंभृणायिंगानिमिंद्रसंमृण। सर्वंरक्षोनिबर्हय॥ एतैःसर्वमंत्रैःस्त्रमभिषिंच। जातवेदसे
मारीचःकश्यपोजातवेदाग्निस्त्रिष्टुप्॥ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः सनःप
र्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः॥ अनेनगंधेनसूत्रंविलिप्यविश्वेतानंभार्गवोनेमइं
द्रोजगतीविश्वेतातेसवनेषुप्रवौआयाद्वकृर्यमघवन्निंद्रसुन्वते। परावतंयस्तुरुपंभतंवस्वपाहे
यः शरमायत्रापिवंधवे॥ अनेननष्ट्रसोदक्षिणहस्तेबध्नीयात्। अग्नियेजातःकश्यपःपवमानःसोम
स्त्रिष्टुप्अग्नियेजात॥ इतिमंत्रस्तुस्वस्त्ययनप्रकरणेलिखितः॥ अनेनस्त्रीयांवामहस्तेबध्नीयात्॥

ततआचार्यऋत्विजश्चयजमानस्यमंत्रैरक्षांकुर्युः॥तेचमंत्राः॥आतंजावैतिद्वयोःप्राजापत्योयक्ष्मना
शनंप्रस्विष्टुबंतानुष्टुप्मंत्रस्तुसर्वमेवलिखितः॥येयक्षेनेतसष्टवंस्यसूक्तस्यमानवोनाभानेदिष्टो
विश्वेदेवाअग्निःसत्तमक्रौजगत्यःपंचम्यनुष्टुप्षष्ठीबृहतीसप्तमीसतोबृहती॥अष्टम्यनुष्टुप्र
क्षाकरणेविनियोगः॥येयत्तेनदक्षिणयाममक्तोइंद्रस्यसख्यममृतत्वमानशः।तेभोभद्रमांगिरसो
वोअस्तुप्रतिगृभ्णीतमानवंसुमेधसः॥यउदाजन्पितरोगोमयंवस्वृतेनाभिंदन्वत्सरेत्वं॥दीर्घा
युत्वमांगिरसोवोअस्तुप्रति०यऋतेनसूर्यमारोहयन्दिव्यप्रथयन्पृथिवींमातरंदिवि।सुप्रजास्त्व
मंगिरसोवोअस्तुप्रति॥३॥अयंनाभावदतिवल्गुवोगृहेदेवपुत्राऋषयस्तच्छृणोतन।सुब्रह्मण्यमं
गिरसोवोअस्तुप्रति०४विरूपासइदृषयस्तइद्गंभीरवेपसः॥तेअंगिरसःसूनवस्तेअग्नेःपरिजज्ञि
रे॥५॥येअग्नेःपरिजज्ञिरेविरूपासोदिवस्परि॥नवग्वोनुदशग्वोअंगिरस्तमःसचादेवेषुमंहते॥इं
द्रेणयुजानिःसृजंतवाघतोव्रजंगोमंतमश्विनं॥सहस्रंमेददतोअष्टकर्ण्यः॥७॥आवोदेवेषु
क्रतं॥७॥प्रनूनंजायतामयंमनुस्तोक्मेवरोहतु॥यःसहस्रंशताश्वंसद्योदानायमंहते॥८॥त्र्यं
बकंवसिष्ठोरुद्रोनुष्टुप्॥रक्षाकरणेविनियोगः॥त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं।उ ना०म० २५

र्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥इहमामसंत्रभरुषस्मन्त्रिष्टभोजः॥जितमुग्रवीरं॥
इंद्रस्तोमेनपंचदशेनमध्यमिदंवातेनसगरेणरक्षा॥एतैर्मंत्रैःरक्षांकृत्वायजमानः।कृतकर्मसा
द्गुण्यार्थमाचार्यायऋत्विग्भ्यश्चयथाशक्तिदक्षिणांदद्यात्॥अस्मैभोपिभूयसीदद्यादिति॥॥इतिश्री
नद्र०केशुकवंधप्रयोगः॥ ॥अथग्रहयज्ञःसचनित्यनैमित्तिककाम्यभेदेनत्रेधा॥अयनविषुवोप
रागादिषुनित्यः॥गर्भाधानादिकर्माणां भेषुनैमित्तिकः॥विपदुपगमसंपदागमादिकाम्यनामुकाम्यः
॥अत्रमूलवचनमासाकरतोज्ञेयानि॥ग्रहस्यापरित्वाकार्मकार्यं॥अस्यथपिकल॥तदाहाश्वलायनाचा
र्यः॥रूपवर्णायुधस्थानमंडलासनवाहनान्॥सविकरोपहारांश्चपुष्परत्नाकृतीरपि॥गायत्रीमू
लमंत्रांश्चनाममंत्रांश्चकेवलान्॥अधिप्रत्यधिदेवानामंत्रांश्चप्राग्दिसंसुतान्॥ततन्मूर्तिश्चज्ञात्वा
याहोमन्तर्चयन्नवग्रहान्॥अन्यत्वेवपुमान्नित्यंतत्फलंनैवविंदति॥दुःखंचाप्नोतिसुमहद्यत्नादित्या
याकाल्यम्नचिनवग्रहान्॥अनालेवपुमानित्यंतत्फलंनैवविंदति॥दुःखंचाप्नोतिसुमहद्यत्नादिस्था
र्याविस्तुमानितिगायत्र्यादिरत्नायत्रीप्रयोगेवक्ष्यते।वर्णादयश्चमंडपकुंडादिवकाम्यप्रयोगेकार्यं
नित्यनैमित्तिकयोस्त्वनित्यं॥नित्यंनैमित्तिकंहित्वासर्वमन्यसमंडपमितिमत्स्योक्तेः॥कुंडेवास्थंडिलेपिवे
तिआचार्योक्तेश्चमंडपलक्षणंहेमाद्रौमत्स्यपुराणे॥ग्रहस्यानरत्नपूर्वेणमंडपंकारयेद्बुधः।रुद्रायतन

भूमौ वा चतुरस्रमुदक्प्लवं । दशहस्तान्यथाष्टौ वा हस्तान्कृत्वा विधानतः ॥ तस्य द्वाराणि चत्वारि कुर्वी
बानि विविसणैः । कुंडं तस्य कदपुरातो नवग्रहमखे कुंडं हस्तमात्रं समंततः ॥ चतुरस्रमधो हस्तयो
निवक्रं समेखलं ॥ चतुरंगुलविस्तारा मेखलास्तद्वदुच्छ्रिताः ॥ मध्यस्थे ॥ वितस्तिमात्रा योनिः स्यात्
ट समांगुलविस्तृता ॥ कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चांगुलोच्छ्रिता ॥ गजोष्ठसदृशी तद्वदायता
छिद्रसंयुता ॥ मेखलोपरि सर्वत्र अश्वत्थदलसंनिभा ॥ नागजोष्ठ तु सा स्वस्पदनत्तु सा वेतिविकल्मषः
सा च योनिः पश्चिमतः कार्या ॥ पश्चिमे मे अभावे तु योनिं कुर्याद्विधानतः ॥ इति गौर्क्कैः भात्स्ये ॥ मा
नहीनाधिकं कुंडमनेकभयदं भवेत् ॥ तस्मादेतत्सर्वं तु कुंडं तु तं हस्तमात्रकं ॥ त्रिवप्रं चतुरस्रं च वि
तस्तु ल्लायसंमितं स्थंडिलं वेद ॥ वप्रे मेखला ॥ द्वियवोच्छ्रितो वप्रः ॥ प्रथमः समुदाहृतः ॥ अंगुल
कुप्यसंपृक्तं वप्रद्वयमथोपरि ॥ द्व्यंगुलस्तत्र विस्तारः सर्वेषां कथितो बुधैरिति ॥ अन्यत्सर्ववर्णादि
शानामात्रिप्रयोगस्य ष्टौ शीभविष्यति ॥ ॥ अथ ग्रहयज्ञप्रयोगः ॥ ॥ यजमानः स्नात्वा नित्यकर्म निर्व
र्समीकृतिकोलेका लेद्रूंका लेद्राक्ता सीसंकास्पश्च यनादि नित्यकालेषु संकल्पयेत् ॥ ग्रहानुकूल्य
सिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्य इति ॥ गर्भाधानादि नैमित्तिकेषु ॥ अमुककर्मकर्तुं

मारोग्यादिसिद्धिग्रहानुकूलसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्ये इति विपदपगमादिकामना
यां तु अमुककामनासिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्य इति ॥ ततः संकल्पं भवेत् ॥ तत्र
नित्यनैमित्तिकयोः प्रतिपदोक्तवस्तुनि तदभावे नुकल्पद्रव्याणि वा यथाशक्ति संपादयेत् ॥ काम्येतु प्र
तिनिध्यभावात्प्रतिपदोक्तवस्त्वेव ॥ ततः आचार्यादिवरणं ॥ तत्र विधिवत्स्वशाखागृह्यस्वाचारमेकं अ
स्मिन्नाग्रहमखे त्वमाचार्यकर्म कुर्विति पाणिना तस्याग्निमुपस्पृश्य वृणुयात् ॥ अत्रात्विजं कुर्वि
त्विप्रसेकं वृणुयात् ॥ ते वह होमानुसारेण चत्वारोऽष्टौ वा ॥ ते च करिष्यामी सुत्को श्रावयेयुः ॥ ततो य
जमानस्तान्यथाक्रमं वरयेत् ॥ ततस्त्वाचार्यः कर्मस्थिकस्वपूर्वकं गृहादुत्तरतो ऐशान्यां वा कृताया च
तुर्हस्तसमात्रायां चतुस्त्रिद्व्यंगुलप्रमाणत्रिभूमिकायां ग्रहवेद्यां शुक्लक्षौमे हितं डलेः सक
र्णिकमष्टदलमंबुजमुत्तरं कणिकायां दलेषु च वर्तुलं आदिग्रहपीठानि तत्र वर्णिकाक्षतैश्च वर्तु
रस्रं ॥ दक्षिणदले रक्ताक्षतैस्त्रिकोणं ॥ ईशानदले हरिताक्षतैर्बाणाकारं ॥ उत्तरदले पीताक्षतैर्दी
र्घचतुरस्रं ॥ पूर्वदले शुक्लाक्षतैः पंचकोणं ॥ पश्चिमदले कृष्णाक्षतैश्चापाकारं ॥ नैर्ऋत्यदले कृ
ष्णाक्षतैः शूर्पाकारं वायव्यदले चित्राक्षतैर्ध्वजाकारमिति ॥ इति पीठानि कृत्वा कलशस्थापनं कुर्या

न॥ तत्रायं क्रमः॥ आकलशेषु॥ अस्य गाथिनो विश्वामित्र ऋषिः पवमानसोमो गायत्री कलशस्थापने
विनियोगः॥ आकलशेषु धावति॥ पवित्रे परिषिच्यते॥ उक्थैर्यज्ञेषु वर्धते॥ अनेन मंत्रेण उदीआं
गवृक्षीकारं जितपद्मोपरि घृतधामपूरितं नवमव्रणमकालकं तेजस्समन्वयं पंचगंधानुलिप्तमनं
कृतं शुभमभिषिक्तकुंभं निधाय इमं मे गंग इत्यस्य सिंधुक्षित्प्रैयमेधो नदीस्तुतिर्जगती कलशे
उदकप्रक्षरणे विनियोगः॥ इमं मे गंगे॰ मंत्रस्तु स्वस्त्ययनप्रकरणे लिखितः॥ अनेन पुण्येन जलेन प्र
पूरयित्वा॥ नववस्त्रेण वस्त्रयुग्मेन वा वेष्टयेत्॥ हय॰ गज॰ वल्मीक॰ हृद॰ गोष्ठ॰ राजद्वार॰ चतु
ष्पथमृद्॰ उद्धृतासि वराहेण कृष्णेन शतबाहुना॥ मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतं॥ मृ
त्तिकं मेनिक्षिप्य रुक्मवती भीमा इत्यस्य वैश्वामित्रो वृणः पवमानसोमो जगती रुक्मवति॥ भीमा कृष
मस्तं विष्यया म गोशिशाना हरिणी विचक्षणः॥ आपायीनि सोमः सुकृतं निषीदति गअपीत्वा भवति ना०म०
शिर्गिगभ्य॥ अनेन वटाश्वत्थप्लक्षअंजनवृतहृक्षत्वचः॥ प्रवोयंत्वित्यस्य वसिष्ठो विश्वेदेवास्त्रि २३
ष्टुप्॥ प्रवो यंतेषु देवयंत्रो॥ अर्चंत द्यावा मनवो नि॥ पृथिवी इध धी॥ येषां त्वाऽपस्समानि विप्रावि
वि वियंति वनिनो न शाखा॥ अनेन तेषां पल्लवान् निक्षिप्य आप्यायस्व समेतु ते इत्यस्य राहूगणो

गोतमः सोमो गायत्री॥ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं॥ भवा वाजस्य संगथे॥ अनेन गोक्षीरं
दधिक्राव्ण इत्यस्य गौतमो वामदेवो दधिक्रावानुष्टुप्॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिन
ः सुरभि नो मुखा करत्॥ प्रण आयूंषि तारिषत्॥ अनेन दधि॥ शुक्रमसि ज्योतिरसि तेजोसि देवो व
ः सविता उत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति घृतं॥ गंधद्वारामित्यस्यानंदः श्रीरनुष्टु
प्॥ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं॥ अनेन गोम
यं॥ गायत्र्या गाथिनो विश्वामित्रः सविता गायत्री॥ तत्सवितुर्वरेण्यमित्यनेन गोमूत्रं॥ सहिरत्नानि इ
त्युपेस्स्वा सितिसविता भगः॥ तं भागं चित्रमीमहे॥ अनेन रत्नानि या ओषधीरित्यस्याथर्वणो भिष
गोषध्योऽनुष्टुप्॥ या ओषधीः पूर्वा जाता देवेभ्यः॥ त्रियुगं पुरा॥ मनै नु बभ्रूणामहं शतं धामा
नि सप्त च॥ अनेन अनेकधान्यानि तदभावे दूर्वामूलानि तदभावे सुवर्णं वा॥ गंधद्वारामिति गंधं नि
क्षिप्य॥ सर्वे समुद्राः सरितः इति॥ गंगे च यमुने चैति॥ इमं मे गंगे यमुने इत्येते मंत्राः॥ आपोहिष्ठेति ति
सृचस्य सूक्तस्यांबरीषः सिंधुद्वीप आपो गायत्री पंचमी वर्धमाना सप्तमी प्रतिष्ठा अंत्ये द्वे अनुष्टु
भौ कलशाभिमंत्रणे विनियोगः॥ आपोहिष्ठेति सूक्तं स्वस्त्ययनप्रकरणे लिखितं॥ नहि ते क्षत्रं मि

सस्याद्येकर्चिऽस्य स्याजीगर्तिः शुनःशेपो वरुणो आद्या त्रिष्टुभः शिष्टा गायत्र्यः। कलशाभिमं
त्रणे विनियोगः। नहि ते क्षत्रं न सहो न मन्युं वयश्चनामी पतयंत आपुः॥ नेमा आपो अनिमिषं च
रंतीर्न ये वातस्य प्रमिनंत्यभ्वं॥ अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः॥ नीचीनाः स्थु
रुपरि बुध्न एषामस्मे अंतर्निहिताः केतवः स्युः॥ उरुं हि राजा वरुणश्चकार सूर्याय पंथामन्वे
तवा उ॥ अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित्॥ शतं ते राजन्भिषजः सह
स्रमुर्वी गभीरा सुमतिष्टे अस्तु॥ बाधस्व दूरे निरृतिं पराचैः। कृतं चिदेनः प्रमुमुग्ध्यस्मत्॥ अ
मी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुह चिद्दिवेयुः॥ अदब्धानि वरुणस्य व्रतानि विचाकशच्चंद्र
मा नक्तमेति॥ तत्त्वा यामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः॥ अहेळमानो वरुणेह
बोध्युरुशंसमान आयुः प्रमोषीः॥ तदिन्नक्तं तद्दिवा मह्यमाहुस्तदयं केतो हृद आ विचष्टे॥ शुनः
शेपो यमह्वद्गृभीतः सो अस्मान्राजा वरुणो मुमोक्तु॥ शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुप
देषु बद्धः॥ अवैनं राजा वरुणः ससृज्याद्विद्वाँ अदब्धो विमुमोक्तु पाशान्॥ अव ते हेळो वरुण
नमोभिरव यज्ञेभिरीमहे हविर्भिः। क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शिश्रथः कृतानि॥ उ

गा०म० २९

दुत्तमं वरुण पाशमस्मदवाधमं विमध्यमं श्रथाय॥ अथा वयमादित्य व्रते तवानागसो अदितये
स्याम॥२॥ यच्चिद्धि ते विशो यथा प्रदेव वरुण व्रतं॥ मिनीमसि द्यविद्यवि॥ मा नो वधाय हत्नवे जिहीळानस्य
रीरधः॥ मा हृणानस्य मन्यवे॥ वि मृळीकाय ते मनो रथीरश्वं न संदितं॥ गीर्भिर्वरुण सीमहि॥ प
रा हि मे विमन्यवः पतंति वस्य इष्टये॥ वयो न वसतीरुप॥ कदा क्षत्रश्रियं नरमा वरुणं करामहे॥
मृळीकायोरुचक्षसं॥ स्वादिष्टयेति द्वादशर्चस्य सूक्तस्य मधुछंदाः पवमानः सोमो गायत्री फलाभि
मंत्रणे विनियोगः॥ स्वादिष्टया०॥ इति सर्वं स्वस्त्ययनप्रकरणे लिखितं॥ यद्वा कलशाभिमंत्रणे अ
स्य मंत्रविदं नियुंजीत॥ ततः कर्मसंकल्पो विधिवत्स्वस्तिवाचनं कृत्वा ग्रहवेदीपश्चिमेषु यथास्था
नं यथामूर्तीः ग्रहप्रतिमाः स्थापयित्वा दक्षिणवामपार्श्वयोरधिदेवताप्रत्यधिदेवते तदभिमुखे स्था
पयेत्॥ तत आवेष्टुपुष्पाक्षतादिभिरावाहयेत्॥ तत्रायं प्रकारः॥ अस्य समस्तव्याहृतीनां अत्री भृगु भर
द्वाजप्रजापतय ऋषयः। अग्निर्वायुः सूर्यप्रजापतयो देवताः। गायत्र्युष्णिगनुष्टुब्बृहत्यश्छंदांसि॥
ॐ भूरादित्यमावाहयामि॥ ॐ भुवरादित्यमावाहयामि॥ ॐ स्वरादित्यमावाहयामि॥ ॐ भूर्भुवः॥
स्वरादित्यमावाहयामि॥ आकृष्णेनेत्यस्य हिरण्यस्तूप ऋषिः सविता त्रिष्टुप्॥ आकृष्णेन रजसा व

ऽमम्लोनिवेशयन्नमृतंमर्त्यंच॥हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्॥इमंमंत्रमु
च्चार्यभगवन्नादित्यग्रहाधिपतेकाश्यपगोत्रकलिंगदेशोद्भवरक्तपायुष्णोपमांगद्युतेद्विभुजपद्मा
भयहस्तासिंदूरवर्णांबरमाल्यानुलेपनज्वलन्माणिक्यखचितसर्वांगाभरणभास्कर तेजोनि
धेत्रिलोकप्रकाशकत्रिदेवतामयमूर्तेनमस्तेसन्तरुणध्वजपताकोपशोभितेनसप्ताश्वर
थवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छाग्निरुद्राभ्यांसहपद्मकर्णिकायांताम्रप्रतिमायांप्राङ्मुखो
वर्तुलपीठेधितिष्ठस्वार्थत्वामावाहयामीसर्वदिसमावाहयेत्॥तद्दक्षिणपार्श्वे॥ॐभूरादित्या
धिदेवमग्निमावाहयामि॥ॐभुवरादित्याधिदेवमग्निमावाहयामि॥ॐस्वरादित्याधिदेवमग्नि
मावाहयामि॰ॐभूर्भुवःस्वरादित्याधिदेवमग्निमावाहयामि॰ॐअग्निंदूतमिसस्यकृण्वेमधा
नियिरग्निर्गायत्री॥अग्निंदूतंवृणीमहेहोतारंविश्ववेदसं॥अस्ययज्ञस्यसुक्रतुं॥इमंमंत्रमुच्चा ना॰प्र॰ २९
पिंगलश्मश्रुकेशाक्षत्रिनयनच्छागस्थसाक्षसूत्रंसप्तार्चिषंशक्तिधरहस्तदर्पणञ्च
रित्याधिदेवमग्निमावाहयामि॥तद्वामपार्श्वेभूरादित्यप्रत्यधिदेवरुद्रमावाहयामि॥ॐभुवरादि
त्यप्रत्यधिदेवरुद्रमावाहयामि॰ॐस्वरादित्यप्रत्यधिदेवरुद्रमावाहयामि॰ॐभूर्भुवःस्वरादित्य

प्रत्यधिदेवरुद्रमावाहयामि॰ॐत्र्यंबकमितस्यवसिष्ठऋषिस्त्र्यंबकोनुष्टुप्॥ॐत्र्यंबकंयजामहेसुगं
धिंपुष्टिवर्द्धनं॥उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥इमंमंत्रमुच्चार्यत्रिलोचनपंचव
क्त्रवृषभारूढकपालभृज्जरदूलगधारिणंचंद्रमौलिंत्वरादित्यप्रत्यधिदेवंरुद्रमावाहयामि
तद्दक्षिणपूर्वदलेॐभूःसोममावाहयामि॥ॐस्वःसोममा॰॥आप्यायस्वेतस्यगौतमःसोमोगा
यत्री॥इमंमंत्रमुच्चार्यभगवन्सोमद्विजाधिपतेसुधामयशरीरात्रिगोत्रयमुनादेशोद्भवगोक्षी
रधवलाभद्युतेद्विभुजजगदादरदानांकितकरमुक्ताम्बरमाल्यानुलेपनसर्वांगाभुक्तमौक्ति
काभरणारमणीयसमस्तलोकाप्यायकदेवतामयमूर्तेनमस्तेसन्तदधवलध्वजपताकोप
शोभितेनदशाश्वेताश्वरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छाप्सुरुमयाभ्यांसहपद्माग्नेयदलेम
त्स्यस्फटिकप्रतिमायांप्रत्यङ्मुखोचतुरस्रपीठेधितिष्ठस्वार्थंत्वामावाहयामि॥तद्दक्षिणपा
र्श्वेसर्वेवता॥अस्तसमस्तव्याहृत्युच्चारणानंतरं॥अप्सुमदस्यसप्तिर्धुम्नीपआपोगायत्री॥इ
मंमंत्रमुच्चार्यस्त्रीरूपधारिण्यःश्वेतवर्णमकरवाहनाःपद्मकलशधारिणीमुक्ताभरणभू
षिताःसोमाधिदेवताआवाहयामि॥वामपार्श्वेअस्तसमस्तव्याहृत्युच्चारणानंतरं॥गौरी

मिमायेतस्यदीर्घतमाऋषिर्जगतीगौर्यावाहनेविनियोगः॥ इमंमंत्रमुच्चार्य॥ अक्षसूत्रकम
लदर्पणकमंडलुधारिणींत्रिदशार्चितांसोमप्रत्यधिदेवतामुमामावाहयामि॥ अथदक्षिणद
लेपूर्ववत्पावमाहृत्स्युच्चारणानंतरं॥ अग्निर्मूर्द्धेत्यस्यविरूपअंगारकोगायत्री॥ इमंमंत्रमुच्चा
र्यभगवन्नंगारकाम्राकृतेभारद्वाजगोत्रावृतिदेवेश्वरज्वालापुंजोपमांगद्युतेचतुर्भुजशक्ति
शूलगदावरदांगधारिन्रक्तांबरमाल्यानुलेपनप्रवालाभरणभूषितसर्वांगदुरालोकदीप्तेन
मस्तरक्तध्वजपताकोपशोभितेनरक्तमेषरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छभूमिस्कंदा
त्मांसहपद्मदक्षिणदलमध्येरक्तचंदनप्रतिमायांदक्षिणाभिमुखंवात्रिकोणायामीवेदौतिष्ठसज्जार्थं
त्वामावाहयामि॥ तद्दक्षिणपार्श्वआदहूत्स्युच्चारणानंतरं॥ स्योनापृथिवीत्यस्य॥ मेधातिथिःपृ
थिवीगायत्री॥ इमंमंत्रमुच्चार्यशुक्लवर्णांदिव्याभरणभूषितां॥ चतुर्भुजांसौम्यवपुषंचंद्रांशु
सदृशांवरांरत्नपात्रसस्यपात्रौषधिपात्रपद्मोपेतकरांचतुर्दिग्गजगतां॥ अंगारकप्र
धिदेवतांभूमिमावाहयामि॥ तद्वामपार्श्वेआहूत्स्युच्चारणानंतरं॥ कुमारःशक्तिरितिमंत्रस्यग
ग्नमदःस्कंदस्त्रिष्टुप्॥ कुमारंशक्तिहस्तंवर्धमानप्रतिमामनामरूपोपपन्नं॥ भूरंदंतारंसप्त

नां॰मं॰
३०

निंगणीयेत्युतस्त्वमेषजारस्यमंत्रमिमंमंत्रमुच्चार्य॥ षण्मुखंबर्हिरथंकुक्कुटविभूषणंरक्तांबरधरंम
यूरवाहनंकुक्कुटघंटापताकाशक्त्युपेतंचतुर्भुजमंगारकप्रत्यधिदेवतांस्कंदमावाहयामि॥ ततः
प्रागुत्तरदलेपूर्ववच्चाहृत्स्युच्चारणानंतरं उद्बुध्यध्वमित्यस्यबुधःसौम्यस्त्रिष्टुप् उद्बुध्यध्वंसम
नसःसखायःसमग्निमिंधुध्वंबहवःसनीलाः दधिक्रामग्निमुषसंचदेवीमिंद्रावतोवसेनिह्वये
वः॥ इमंमंत्रमुच्चार्यभगवन्सौम्यसौम्याकृतेसर्वज्ञानमयपात्रियोत्रमगधदेशेश्वरकुंकुमव
र्णांगद्युतेचतुर्भुजखड्गखेटकगदावरदानांकितपीतांबरमाल्यानुलेपनमरकताभरणाल
कृतसर्वांगविबुधपतेनमस्तेसप्तरूपीतध्वजपताकोपशोभितेनचतुःसिंहरथवाहनेनमेरुं
प्रदक्षिणीकुर्वन्नागच्छविष्णुरूपात्मांसहपद्मेशानदलमध्येसुवर्णप्रतिमायामुदङ्मुखंवाबाणा
कारपीठेधितिष्ठविष्णुगायत्री॥ सहस्रशीर्षेत्यस्यनारायणःपुरुषोनुष्टुप् इमंमंत्रमुच्चार्य
कौमोदकीपद्मशंखचक्रोपेतंचतुर्भुजंसौम्याधिदेवतांविष्णुमावाहयामि॥ प्रत्यधिदेवतां
पुरुषमावाहयामि॥ उत्तरदलेपूर्ववदाहूत्स्यनंतरं॥ बृहस्पतेअतीत्यस्यगृत्समदोबृहस्प
तिस्त्रिष्टुप्॥ बृहस्पतेअतियदर्योअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु॥ यद्दीदयच्छवस

ऋतप्रज्ञा ततदस्मात्सद्रविणं धेहि चित्रं ॥ इमं मंत्रमुच्चार्य भगवन् बृहस्पते समस्तदेवताचार्य आंगिरस
गोत्र सिंधुदेशोद्भव रक्ताम्बर सुवर्णमय शोभित चतुर्भुज दंड कमंडलु अक्षसूत्र वरदांकित पीतां
बरमाल्यानुलेपन पुष्परागमयाभरण रमणीय समस्तविद्याधिपते नमस्ते सत्रध्वपाते ध्वज
पताकोपशोभितेन पीताम्बर रथवाहनेन मेरुं प्रदक्षिणी कुर्वन्नागच्छेह ब्रह्मन् मासहपर्यंत्र
स्थलमध्ये सुवर्णप्रतिमामुदङ्मुखो दीर्घचतुरस्र पीठे अधितिष्ठ सुज्ञार्थं त्वामावाहयामि ॥ तद्दक्षि
णपार्श्वे आवाहनं तु आरणानंतरं ॥ इंद्रश्रेष्ठानीसस्य गृत्समद इंद्रस्त्रिष्टुप् इमं मंत्रमुच्चार्य चतु
र्दंत गजाधिरूढ वज्रांकुशधर शचीपतिं नानाभरणभूषितं बृहस्पते साधिदेवतामिंद्रमावाह
यामि । तद्वामपार्श्वे आवाहनसमनंतरं । ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया सधमाद आशू
शिरे रथे सुखमिंद्राधितिष्ठन् ॥ प्रजानन् विद्वाँ उपयाहि सोमं ॥ इमं मंत्रमुच्चार्य पद्मासनस्थां जटि
लं चतुर्मुखं चतुर्भुजं अक्षमाला स्रुव पुस्तक कमंडलु धारिणं कृष्णाजिनवाससं पार्श्वस्थितहं
सं बृहस्पति प्रत्यधिदेवतां ब्रह्माणमावाहयामि ॥ आवाहने सर्वत्र आवाहनसमनंतरं ॥ शुक्रं ते अन्यदि
सस्य भरद्वाजः शुक्रस्त्रिष्टुप् ॥ शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ॥ वि

ना०मं० ३१

श्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु ॥ इमं मंत्रमुच्चार्य भगवन् भार्गव समस्तदै
त्यगुरो भार्गवगोत्र भोजकटदेशोद्भव रजतोज्ज्वलांगकांते चतुर्भुज दंड कमंडलु अक्षसू
त्र वरदानांकित मुक्तांबरमाल्यानुलेपन वज्राभरणभूषित सर्वागमसमस्तनीतिशास्त्रनिपुण
मते नमस्ते सप्तदश मुक्ता ध्वजपताकोपशोभितेन मुक्ताभ्यसहितेन रथेन मेरुं प्रदक्षिणी कु
र्वन्नागच्छेह शुक्र मासहपर्यंत स्थलमध्ये रजतप्रतिमां प्राङ्मुखी पंचकोणपीठे अधितिष्ठ सुज्ञा
र्थं त्वां तद्दक्षिणपार्श्वे सर्वत्र आवाहनसमनंतरं । इंद्राणीमास्विसैस्य यस्य वृषाकपी इंद्राणी पंक्तिः ॥
इंद्राणीमासु नारिषु सुभगामहमश्रवं नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिंद्र उत्त
रः ॥ इमं मंत्रमुच्चार्य संतानमंजरी वरदानधर द्विभुजां शुक्राधिदेवतां इंद्राणीमावाहयामि । तद्वाम
पार्श्वे सर्वत्र आवाहनसमनंतरं इंद्रमिद्देवतातये इत्यस्य मंत्रस्य मेधातिथिरिंद्रः गायत्री हुता इंद्रं भ
र्हवामहे इंद्रं प्रयत्यध्वरे इंद्रं सोमस्य पीतये ॥ इमं मंत्रमुच्चार्य चतुर्दंत गजारूढ वज्रांकुशधर श
चीपतिं नानाभरणभूषितं भार्गवस्य साधिदेवतां इंद्रमावाहयामि ॥ पश्चिमदले सर्वत्र आवाहनसमनं
तरं । शमग्निरित्यस्य इरिंबिठिः । शनैश्चर उष्णिक् । शमग्निरग्निभिः करच्छं नस्तपतु सूर्यः ॥ श

वानोवात्स्वपा॥ अपस्त्रिष्टुप्॥ इमंमंत्रमुच्चार्यभगवन्शनैश्चरभास्करतनयकाश्यपगोत्रसमु
द्भवसौराष्ट्रदेशेश्वरकज्जलसमानांगकांतचतुर्भुजचापतूणीरकृपाणाभयांकितनीलांबरमालानु
लेपननीलरत्नभूषणालंकृतसर्वांगसमस्तभुवनभीषणामर्षमूर्त्तेनमस्तेसन्निधेहिनीलध्व
जपताकोपशोभितेनगृध्ररथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छप्रजापतियमाभ्यांस
ह॥ पश्चिमपश्चिमदलमध्येकालायसप्रतिमायांधनुराकारपीठेधृतिष्ठशनैश्चरत्वामावाह
यामि॥ तद्दक्षिणपार्श्वेमर्त्यवद्याहृत्यनंतरंप्रजापतेनत्वदेतान्यन्योहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्
इमंमंत्रमुच्चार्ययज्ञोपवीतिनहंसस्थमेकवक्त्रंअक्षमालाकमंडलुपुस्तककमंडलुसहितचतुर्भुजं
शनैश्चराधिदेवतांप्रजापतिमावाहयामि॥ तद्वामपार्श्वेमर्त्यवद्याहृत्यनंतरंयमायसोमंसुनुत
सत्यमयमोयमोनुष्टुप्॥ यमायसोमंसुनुतयज्ञकृताहविःयमंहयज्ञोगच्छसन्निधुतोअग्निकृ ना॰भ॰ ३२
तः॥ इमंमंत्रमुच्चार्यदृष्टिसीनंदहस्तेरक्तसद्दंडपाशहस्तंपाशधरं॥ कृष्णांगंवर्णमहाबाहुं
सर्वाभरणभूषितंशनैश्चरप्रत्यधिदेवतांयममावाहयामि॥ प्रस्तरदक्षिणदलेपूर्ववद्याहृत्यन
तरं॥ कयानश्चित्रइत्यस्यवामदेवोराहुर्गायत्री॥ कयानश्चित्रआभुवदूतीसदावृधःसखाकया॥

शचिष्ठयावृता॥ इमंमंत्रमुच्चार्यभगवन्राहोरविसोमपर्दनसिंहिकानंदनपैठीनसगोत्रबर्बरदे
शेश्वरकालमेघद्युतेकरालवदनचतुर्भुजखड्गचर्मशूलवरदांकितकृष्णांबरमालानुलेप
नगोमेदिकाभरणभूषितसर्वांगशोषितिधेनमस्तेसन्निधेहिकृष्णध्वजपताकोपशोभितेनकृष्ण
सिंहरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छसर्पकालाभ्यांसहपश्चिमेनैरृतदलमध्येसीसकप्र
तिमायांदक्षिणाभिमुखोशूर्पाकारपीठेधृतिष्ठराहोत्वामावाहयामि॥ तद्दक्षिणपार्श्वेपूर्ववद्
याहृत्यनंतरंआयंगौरितस्यसार्पराज्ञः॥ सर्पोगायत्री॥ इमंमंत्रमुच्चार्यरक्ताक्षंसहस्रधरानेकं
दिकारपुच्छयुक्तानेकभोगान्सर्वभोगानभीषणानरान्धिदेवताःसर्पानावाहयामि॥ वामपार्श्वेपूर्व
वद्याहृत्यनंतरंकालपरंमृत्योरितस्यसंकसुकोमृत्युस्त्रिष्टुप्॥ परंमृत्योअनुपरेहिपंथांयस्तेस्वइतरोदे
वयानात्॥ चक्षुष्मतेशृण्वतेतेब्रवीमिमानःप्रजांरीरिषोमोतवीरान्॥ इमंमंत्रमुच्चार्यकालद
दंडप्रसंगजीवनपाशांदंडधरंसर्वदृष्टिकरंभयाणांराहुप्रत्यधिदेवतांकालमावाहयामि॥ प्रस्तगुरु
रदलेपूर्ववद्याहृत्यनंतरंकेतुंकृण्वन्नित्यस्यमधुच्छंदाःकेतुर्गायत्री॥ केतुंकृण्वन्नकेतवेपेशो
मर्याअपेशसे॥ समुषद्भिरजायथाः॥ इमंमंत्रमुच्चार्यभगवन्केतोकामरूपजैमिनिसगोत्र

त्रमथधर्मराजम्बरधूम्रवर्णभुजाकृतेदंडभुजगदावर्मांविचित्रांवरमाल्यानुलेपनवैदूर्यमणिभरण
भूषितसर्वांगोविचित्ररथोवेनमस्तस्मन्नर्दचित्रपताकोपशोभितेनचित्रकूपोतरथवाहनेनमेरुंप्र
दक्षिणीकुर्वन्धूज्यमानोधर्मराजधनिष्टप्रजार्थबामावाहयामि॥ तद्दक्षिणपार्श्वेमृत्युंआहूसनं
तरंब्रह्मजज्ञानमित्यस्य + कुर्वन्नागन्छब्रह्मचित्रगुप्तास्यांसहवायमदमधर्मकास्यप्रतिमांद
क्षिणा + कुलोब्रह्मत्रिष्टुप्॥ ब्रह्मयज्ञानंपुरस्ताद्विषीमतःसुरुचोवेनआवः॥ सबुध्न्याउपमाअ
स्यविष्टाःसतश्चयोनिमसतश्चविवः॥ इममंत्रमुच्चार्यपद्मासनस्थंजटिलंचतुर्मुखंक्षमामालास्त्रु
वपुस्तककमंडलुधरंकृष्णाजीनवाससंपार्श्वस्थितहंसकंब्रह्माधिदेवतांब्रह्माणमावाहयामि॥ वा
मपार्श्वेसर्वंचआहूतानीतस्त्वार्यसप्तत्रिमितस्यपरब्रह्मचित्रगुप्तत्रिष्टुप्॥ सचित्रचित्रंचितयंत
मस्मैचित्रक्षत्रचित्रतमंवयोधां॥ चंद्रंरयिंपुरुवीरंबृहंतंचंद्रचंद्राभिर्गृणतेयुवस्व॥ इममंत्रमुच्चा
र्यरम्यदेशेसिंहासनस्थंलेखनीपत्रोपेतंद्विभुजंकर्णेप्रसाधिदेवतांचित्रगुप्तमावाहयामि॥ अथकर्म
साक्षुपकरदेवतावाहनंशुक्लतंडुलपुंजेषुकुर्यात्तत्रशानवामप्रदेशेआहूसनंतरंआतूनइंद्र
सप्यकाण्वःकुसीदंविनायकोगायत्री॥ आतूनइंद्रक्षुमंतंचित्रंग्राभंसंगृभाय॥ महाहस्तीदक्षि

ना॰भ॰
३३

णेन॥ इममंत्रमुक्त्वाचतुर्भुजंत्रिनेत्रंगजाननंनागयज्ञोपवीतिनंवंदधरंदंताक्षमालापरशुमोदकोपेत
चतुर्भुजंविनायकमावाहयामि॥ तद्दक्षिणेआहूसनंतरंजातवेदसइत्यस्यकस्यपोदुर्गात्रिष्टुप्॥ जातवे
दसेसुनवामसोममरातीयतोनिदहातिवेदः॥ सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः
॥ इममंत्रमुच्चार्यशूलिकाबाणखड्गचक्रचंद्रबिंबखेटकपालपरशुकंठाक्षोपेतदशभुजांसिंहा
धिरूढांदुर्गांसर्वसाक्षिणींदुर्गामावाहयामि॥ तद्दक्षिणतोआहूसनंतरंक्षेत्रस्यपतिनेत्यस्य
वामदेवःक्षेत्राधिपतिरनुष्टुप्॥ क्षेत्रस्यपतिनावयंहितेनेवजयामसि॥ गामश्वंपोषयित्न्वासनोमृ
ळातीदृशे॥ इममंत्रमुक्त्वारूपमवर्णांत्रिलोचनम् धूर्तकंदंष्ट्रासुदंष्ट्रंभ्रुकुटीकुटिलाननंनूपुरालंकृतां
घ्रिंसर्पमेखलयायुतंसर्वांगभूषितंकरेंडमरुघंटावबद्धंगुल्फावलंबिकरोटिकामालाधारिणमूगकौ
पीनंवृषभेनदक्षिणहस्ते॥ शूलखेतखड्गडमरुकंदधतंवामहस्तेकपालधारामर्मचापान्द
धानंत्रिमंदिकसमंमितद्युतिंक्षेत्रपालमावाहयामि॥ तद्दक्षिणतोआहूसनंतरंकाणाशिशुरि
त्यस्यत्रितोवायुरुष्णिक्॥ काणाशिशुर्महीनांहिन्वन्नतस्यदीधितिं॥ विश्वापरिप्रियाभुवनदधद्वि
ता॥ इममंत्रमुक्त्वाधावद्धरिणपृष्ठस्थंध्वजवरदानधारिणंधूम्रवर्णंवायुमावाहयामि॥ तद्दक्षि

पतोआहूत्सनंतरं अदितिस्त्वस्य सस्यकुत्सोंतरिक्षं गायत्री॥ आदित्वलस्यरेतसोऽजोतिष्यरूपं तिष्यरूपं तिवासरं॥ परोयदिद्यतेदिवा॥ इमंमंत्रमुक्त्वा नीलोत्पलाभं नीलांबरधारिणं चंद्राकें पितां द्विभुजं बहमाकाशमावाहयामि। तद्दक्षिणतोआहूत्सनंतरं आश्विनावृतिरिक्षस्यपराकुगवोगो समोश्विनाबुष्णिक्॥ अश्विनावर्त्तिरस्मदागोमद्दस्राहिरण्यवत्‌ अर्वाग्रथं समनसानियच्छतंपि बतंसोम्यंमधु। इमंमंत्रमुच्चार्य प्रत्येकमोषधीपुस्तकोपेतं दक्षिणवामहस्तौ तथोन्यस्यमुक्ते यं रावेकस्यदक्षिणपार्श्वेपरस्यवामपार्श्वेरत्नाभौ उकरश्चुकौ शुक्लांबरधारिणौ युग्मोपेतौ देव युजावावाहयामि॥ अथकलुसरस्वत्यकरवनावाहनसर्वं बन्न्ं उजषु कुर्यात॥ नत्त्वेयं॥ तत्रआ हलाग्रे सर्वं बाहुहूताइन्द्र इंद्रवयरस्यमधुच्छंदार्ड्गायत्री इंद्रोविश्वतस्परिह। वाविश्वतस्परिहवामहे जनेभ्यः॥ अस्माकमस्तुकेवलः॥ इमंमंत्रमुच्चार्यस्वर्णवर्णंसिहस्ता र्पवज्रपाणिं ऐरावतस्थितं इंद्रमावाहयामि॥ आग्नेय्यां आहूत्सनंतरं॥ अग्निमीळेइत्यस्यमधुच्छंदा र अग्निर्गायत्री। इमंमंत्रमुच्चार्य स्वर्णवर्णं समार्तिर्भिसमहस्तंशक्तेनन्तस्तुकस्तुवतोमरचंजनघृत पात्राणिदधानं स्वाहा॥ प्रियं मेषवाहनमग्निमावाहयामि याम्यदलाग्रे आहूतीरुत्क्वायमाय॥

तेसोमममिसस्यपमोयमोनुष्टुप्। इमंमंत्रमुत्क्वा रक्तवर्णं दंडधरं महिषवाहनमिलाजियं यम मावाहयामि नैरऋत्यदलाग्रे आहूत्सनंतरं मोषुणइत्यस्य घोरःकण्वोनिरृतिर्गायत्री॥ इमंमंत्रमु च्चार्य नीलवर्णं खड्गचर्मधरम् अर्कहनस्वाहनं कालिकाप्रियं निरृतिमावाहयामि॥ पश्चिमदल आहूत्सनंतरं॥ उदुत्तमंमुमुग्धिनरत्यस्यशुनःशेपोवरुणोगायत्री उदुत्तमंमुमुग्धिनोविपा शमधमं श्रथत। अवाधमानिजीवसे। इमंमंत्रमुत्क्वा नुमुग्धिनरइत्यस्यशुनःशेपोवरुणोगायत्री को रक्तवर्णं नागपाशधरं मकरवाहनं पश्चिमप्रियं स्वर्णवर्णं वरुणमावाहयामि। वायव्यदलाग्रे आहूत्सनंतरं तवावायो इत्यस्य आंगिरसो अथर्वावायुर्गायत्री॥ तववायवृतस्पतेत्वष्टुर्जामातरद्भु त। अवांस्यावृणीमहे॥ इमंमंत्रमुत्क्वा धूम्रवर्णं हिमरंडधरं मृगवाहनं गन्धर्वरूपमोहि नं प्रियं वायुमावाहया॥ उत्तरदलाग्रे आहूत्सनंतरं त्वंसोम इत्यस्य गोतमः सोमोगायत्री। त्वंनःसोम विश्वतोरयिधास्त्वं सर्वदाविश्वानवत्राः। त्वन्नइंद्रकुनिम्नि सजोषाः पाहिपश्चातादुतवापुरस्ता सु॥ इमंमंत्रमुत्क्वा स्वर्णवर्णं निधीश्वरं कुंतपाणिं नरवाहनं विविनिणीप्रियं कुबेरमावाहयामि। ऐशा नदलाग्रे आहूत्सनंतरं कद्रुद्रायेत्यस्य कण्वोरुद्रोगायत्री। इमंमंत्रमुत्क्वा शुद्धस्फटिकवर्णं वरदा

यमूलाय इमं मधुरं वृषभवाहनं गौरीप्रियं श्रीईशानमावाहयामि ॥ एवमेकचत्वारिंशद्देवता आवाह्य घ
कलशे च वरुणं समेरं वरावाद्यन्नमोऽस्त्वनन्तायेति मन्त्रेण सर्वेषां नामभिः क्रमेण सर्वेभ्यो देवेभ्यो पुष्पं समर्प
यापर्यन्तं ग्रहदेवतापूजां कृत्वा कर्मसाद्गुण्यदेवता ॥ कलशस्थापनदेवताः वरुणं च मलयजगंध
अक्षतपत्रपुष्पस्त्रैवं पूजयेत् ॥ ॥ अथ होमः ॥ ॥ सर्वसमिद्भिर्वह्निः प्रतिद्रव्यं प्रतिग्रहं एकावरा
भिः सहस्रपराभिर्वा आहुतिभिर्निमित्तानुसारेण प्रधानदेवताग्न्यादिपार्श्वदेवताभ्यो अन्तरदेवितरे
भ्यः स्वाहान्तैर्नामभिस्तत्तन्मन्त्रैर्वा पाणिना वसुहर्द्दवदानेन स्रुवेण होमः ॥ तत्राचार्यः अस्मगय्रेरासी
नः आज्याभावे पूर्वं ... प्रमाणप्रकारेण प्रागुक्तलक्षणकुण्डे स्थण्डिले वा पञ्च
॥ पञ्चाग्निप्रतिष्ठापनं कृत्वा अग्निगत्वार ध्वः समिधं प्रादायदेवताकालो निर्दिशन्वक्ष्यमाणग्र
हहोमदेवतापरिग्रहार्थं मत्वा ध्यानं करिष्ये ॥ अस्मिन्नन्वाहितेऽग्नावित्यादि वक्ष्यपि ॥ आदित्यं सूर्यमु
क्त्वा प्रधानदेवतान्त्र । यात्रिसाधिदेवतामग्निं प्रत्यधिदेवं रुद्रं अर्कसमिच्चर्वाज्यैः प्रधानदेवं सोमं अ
धिदेवता अपः ॥ प्रत्यधिदेवतां गौरीं पलाशसमिच्चर्वाज्यैः प्रधानदेवमङ्गारकमधिदेवतां भूमिं प्रत्य
धिदेवतां स्कन्दं खादिरसमिच्चर्वाज्यैः प्रधानदेवं बुधं अधिदेवतां विष्णुं प्रत्यधिदेवं नारायणं अश्वत्थ

समिच्चर्वाज्यैः प्रधानदेवं गुरुं अधिदेवतामिन्द्राणीं प्रत्यधिदेवमिन्द्रं औदुम्बरसमिच्चर्वाज्यैः । प्रधान
देवं शुक्रमधिदेवं प्रजापतिं प्रत्यधिदेवं यमं शमीसमिच्चर्वाज्यैः प्रधानदेवतां राहुं अधिदेवं सर्पं प्रत्यधि
देवं कालं दूर्वासमिच्चर्वाज्यैः प्रधानदेवं केतुं अधिदेवं ब्रह्माणं प्रत्यधिदेवं चित्रगुप्तं कुशसमिच्च
र्वाज्यैः विघ्नास्त्रसंख्यकाः पार्श्वदेवताः प्रधानदेवताः प्रधानदेवताग्रहप्रतिसाद्गुण्यदेवताः विनाय
कं दुर्गां क्षेत्रपालं वायुमाकाशमश्विनौ क्रतुसाद्गुण्यदेवताः इन्द्रमग्निं यमं निर्ऋतिं वरुणं वायुं कुबेरमी
शानं प्रधानविष्णुं ब्रह्माणमग्निं वायुं सूर्यं प्रजापतिं तिलव्रीहिभिर्विवक्षितसंख्यया सूर्यमाज्येन त्रयोद
शावारं अग्निमाज्येन चतुस्त्रिंशद्वारं । रुद्रमाज्येन चाष्टविंशद्वारं शेषेण स्विष्टकृतमित्यादि सद्योयक्ष्ये
इतमुक्त्वा भूर्भुवः स्वाहा इति सप्तवारान् ध्याय प्रजापतये इदं न मम मत्वा देवतासा गोयातिं ततो बर्हिः सन्नहन
द्याऽसन्नग्रह्य पनिधानान्तं कृत्वा लौकिकसिद्धान्नतिलव्रीहिभिः । सहासमिद्भिः पर्यग्निकृतान्सम्
ह्यास्य बर्हिष्यासाद्य घार्यालंकरणाद्याज्यभागान्तं कृत्वा क्रमेण दिक्पादिशान्तान्तेऽमुकत्रास्त्वा
ग्रहदेवसः आवाहनादिक्रमेण तत्तन्मन्त्रैः समिच्चर्वाज्यैः प्रागुक्तसंख्याकाहुतीर्जुहुयात् ॥ तत्रायं प्रकारः ॥
समिधं मूलतो मध्यमुलं विहाय मध्यमानामिकाङ्गुष्ठैर्गृहीत्वा जुहुयात् । चरुं ग्रासमं प्राणिनोव

आ॒अंस्त्व वेणो वतद भावे अप्स्वस्य पर्णेनवा॥ नतो भूस्त मस्तक कृतिभिः प्रभूत निज ब्राह्मिन पाणिना कृ
त्वा सूर्य पावक रुद्रमानासेन ज्ञ कृ यान्मंत्रे॥ तेच मंत्रो॥ सूर्यो नोदिवितिपंचर्चस्य सूक्तस्य सूर्यपुत्रश्चक्षु
ः सूर्यो गायत्री॥ सूर्यप्रीत्यर्थं प्रत्यृचमाज्याहुतिहोमे विनियोगः॥ सूर्यो नो दिवस्पातु वातो अंत
रिक्षात्॥ अग्निर्नः पार्थिवेभ्यः॥ जोषा सवितर्यस्य ते हरः शतं सवाँ अर्हति॥ पाहि नो दिद्युतः
पतंत्याः॥२॥ चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः॥ चक्षुर्धाता दधातु नः॥३॥ चक्षुर्नो धेहि चक्षुषे चक्षुर्वि
ख्यै तनूभ्यः॥ संचेदं वि च पश्येम॥४॥ सुसंदृशं त्वा वयं प्रति पश्येम सूर्य॥ वि पश्येम नृचक्षसः॥५॥ उदु
त्यमिति मंत्रस्य कण्वपुत्रः प्रस्कण्वः सूर्यो गायत्री सूर्यप्रीत्यर्थमाज्यहोमे विनियोगः॥ उदु त्यं जा
तवेदसं देवं वहंति केतवः॥ दृशे विश्वाय सूर्यं॥१॥ नमो मित्रस्येति मंत्रस्य सूर्यपुत्रो भितपाः सूर्यो ज
गती विनियोगः पावत्॥ नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत॥ दूरेदृशे देवजाता
य केतवे दिवस्पुत्राय सूर्याय शंसत॥१॥ चित्रं देवानामिति मंत्रस्य आंगिरसः कुत्सः सूर्यस्त्रिष्टुप्॥ चि
त्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः॥ आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा
जगतस्तस्थुषश्च॥१॥ उद्वेति सुभगइति पंचर्चस्य मैत्रावरुणो वसिष्ठः सूर्यस्त्रिष्टुप्॥ उद्वेति सुभगो

ना०सं०
३६

विश्वचक्षाः साधारणः सूर्यो मानुषाणां॥ चक्षुर्मित्रस्य वरुणस्य देवश्चर्मेव यः समविव्यक् तमांसि॥१॥
उद्वेति प्रसवीता जनानां महान् केतुरर्णवः सूर्यस्य॥ समानं चक्रं पर्याविवृत्सन् यदेतशो वहति धूर्षु यु
क्तः॥२॥ विभ्राजमान उषसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः॥ एष मे देवः सविता चच्छंद यः समानं न
प्रमिनाति धाम॥३॥ दिवो रुक्म उरुचक्षा उदेति दूरे अर्थस्तरणिर्भ्राजमानः॥ नूनं जनाः सूर्ये
ण प्रसूता अयन्नर्थानि कृणवन्नपांसि॥४॥ यत्रा चक्रुरमृता गातुमस्मै श्येनो न दीयन्नन्वेति पाथः॥ प्र
ति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः॥५॥ त्वमग्ने प्रथम इत्यष्टादशर्चस्य सूक्तस्य
आंगिरसो हिरण्यस्तूपः॥ अग्निर्जगती॥ अंत्या अष्टमी षोडश्यौ त्रिष्टुभः॥ अग्निप्रीत्यर्थमाज्याहुति होमे वि
नियोगः॥ त्वमग्ने प्रथमो अंगिरा ऋषिर्देवो देवानामभवः शिवः सखा॥ तव व्रते कवयो विद्मनाप
सोऽजायंत मरुतो भ्राजदृष्टयः॥१॥ त्वमग्ने प्रथमो अंगिरस्तमः कविर्देवानां परि भूषसि व्रतं॥ विभुर्विश्व
स्मै भुवनाय मेधिरो द्विमाता शयुः कतिधा चिदायवे॥२॥ त्वमग्ने प्रथमो मातरिश्वन आविर्भव सुक्रतू
या विवस्वते॥ अरेजेतां रोदसी होतृवूर्ये सघ्नोर्भारमयजो महो वसो॥३॥ त्वमग्ने मनवे द्यामवाशयः पुरू
रवसे सुकृते सुकृत्तरः॥ श्वात्रेण यत् पित्रोर्मुच्यसे पर्या त्वा पूर्वमनयन्नापरं पुनः॥ त्वमग्ने वृषभः पुष्टिव

र्द्धनं॥ उद्यतस्रुचे भवसि श्रवाय्यः। य आहुतिं परि वेदा वषट्कृतिमेकायुरग्रे विश आविवाससि॥५॥
त्वमग्ने वृजिनवर्तनिं नरं सक्मन्पिपर्षि विदथे विचर्षणे। यः शूरसाता परितक्म्ये धने दभ्रेभिश्चित्समृता
हंसि भूयसः॥६॥ त्वं तमग्ने अमृतत्व उत्तमे मर्तं दधासि श्रवसे दिवेदिवे॥ यस्तातृषाण उभयाय जन्म
ने मयः। कृणोषि प्रय आ च सूरये॥७॥ त्वं नो अग्ने स्व पित्रोरुपस्थे सनये धनानां यशसं कारुं कृणुहि
स्तवानः। ऋध्याम कर्मापसा नवेन देवैर्द्यावापृथिवी प्रावतं नः॥८॥ त्वं नो अग्ने पित्रोरुपस्थ आ दे
वो देवेष्वनवद्य जागृविः। तनूकृद्बोधि प्रमतिश्च कारवे त्वं कल्याण वसु विश्वमोपिषे।९। त्वमग्ने
प्रमतिस्त्वं पितासि नस्त्वं वयस्कृत्तव जामयो वयं॥ सं त्वा रायः शतिनः। सं सहस्रिणः सुवीरं यन्ति व्रत
पामदाभ्य।१०। त्वामग्ने प्रथममायुमायवे देवा अकृण्वन्नहुषस्य विश्पतिं॥ इळामकृण्वन्मनुषस्य
शासनीं पितुर्यत्पुत्रो ममकस्य जायते।११। त्वं नो अग्ने। तव देव पायुभिर्मघोनो रक्ष तन्वश्च वंद्य॥
त्राता तोकस्य तनये गवामस्यनिमेषं रक्षमाणस्तव व्रते।१२। त्वमग्ने यज्यवे पायुरंतरोऽनिषंगाय
चतुरक्ष इध्यसे। यो रातहव्योऽवृकाय धायसे कीरेश्चिन्मंत्रं मनसा वनोषि तं॥१३॥ त्वमग्न उरुशंसा
य वाघते स्पार्हं यद्रेक्णः परमं वनोषि तत्। आध्रस्य चित्प्रमतिरुच्यसे पिता प्र पाकं शास्सि प्र दिशो वि

नाॱअॱ
३३

दुष्टरः॥१४॥ त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं परि पासि विश्वतः। स्वादुक्षद्मा यो वसतौ स्योनकृज्जी
वयाजं यजते सोपमा दिवः॥१५॥ इमामग्ने शरणिं मीमृषो न इममध्वानं यमगाम दूरात्॥ आपिः पिता
प्रमतिः सोम्यानां भृमिरस्यृषिकृन्मर्त्यानां॥१६॥ मनुष्वदग्ने अंगिरस्वदंगिरो ययातिवत्सदने पूर्ववच्छुचे
अच्छ याह्या वहा दैव्यं जनमा सादय बर्हिषि यक्षि च प्रियं॥१७॥ एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते
चकृमा विदा वा। उत प्र णेष्यभि वस्यो अस्मान्सं नः सृज सुमत्या वाजवत्या॥१८॥ त्वमग्ने द्युभिरिति षोड
शर्चस्य सूक्तस्य गृत्समद ऋषिरग्निर्देवता जगती छन्दः अग्निप्रीत्यर्थमाज्याहुतिहोमे विनियोगः। त्वमग्ने द्युभिस्त्वमाशु
शुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि॥ त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः। तवाग्ने होत्रं
तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः॥ तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे
॥ त्वमग्न इंद्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः॥ त्वं ब्रह्मा रयिविद्ब्रह्मणस्पते त्वं विधर्तः सचसे पुरंध्या॥ त्वमग्ने राजा वरुणो धृतव्रतस्त्वं मित्रो भवसि दस्म ईड्यः। त्वमर्यमा सत्पतिर्यस्य संभुजं
त्वमंशो विदथे देव भाजयुः॥४॥ त्वमग्ने त्वष्टा विधते सुवीर्यं तव ग्नावो मित्रमहः सजात्यं॥ त्वमाशुहेमा र
रिषे स्वश्व्यं त्वं नरां शर्धो असि पुरूवसुः॥५॥ त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष ई

दिवो। त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः॥ पासि नु त्मना॥ त्वमग्ने द्रविणोदा अरंकृते त्वं देवः
सविता रत्नधा असि। त्वं भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस्तेविधत॥७॥ त्वामग्ने दम आ विश्प
तिं विशस्त्वां राजानं सुविदत्रमृंजते त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्राणि शता दश प्रति॥८॥
त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचं त्वं पुत्रो भवसि यस्तेविधत्त्वं सखा सुशे
वः पास्याधृषः॥१०॥ त्वमग्न ऋभुराके नमस्यस्त्वं वाजस्य क्षुमतो राय ईशिषे॥ त्वं वि भास्यनु
दक्षि दावने त्वं विशिक्षुरसि यज्ञमातनिः॥११॥ त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ
संदृशि श्रियः त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः॥१२॥ त्वामग्न आदि
त्यास आस्यं त्वां जिह्वां शुचयश्चक्रिरे कवे॥ त्वां रातिषाचो अध्वरेषु सश्चिरे त्वे देवा हविरदंत्या
हुतं॥१३॥ त्वे अग्ने विश्वे अमृतासो अद्रुह आसा देवा हविरदंत्याहुतं त्वया मर्तासः स्वदंत आ
सुतिं त्वं गर्भो वीरुधां जज्ञिषे शुचिः॥१४॥ त्वं तान्सं च प्रति चासि मज्मनाग्ने सुजात प्र च देव रिच्यसे
पृक्षो यदत्र महिना वि ते भुवदनु द्यावापृथिवी रोदसी उभे॥१५॥ ये स्तोतृभ्यो गोअग्रामश्वपे
शसमग्ने रातिमुपसृजंति सूरयः॥ अस्मांश्च तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः॥१६॥

ना॰भू॰ ३९

॥अ॥ कद्रुद्रायेति नवर्चस्य सूक्तस्य कण्व एवो रुद्रो गायत्री। तृतीया मैत्रावरुणी रुद्रप्री स्वर्धमा उपाकृति
होमे त्रिनियोगः॥ कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे। वोचेम शंतमं हृदे॥ यथा नो अदि
तिः करत्पश्वे नृभ्यो यथा गवे। यथा तोकाय रुद्रियं॥ यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति। य
था विश्वे सजोषसः॥ गाथपतिं मेधपतिं रुद्रं जलाषभेषजं॥ तच्छंयोः सुम्नमीमहे॥ यः शुक्र इव सूर्यो
हिरण्यमिव रोचते॥ श्रेष्ठो देवानां वसुः॥५॥ शं नः करत्यर्वते सुगं मेषाय मेष्ये। नृभ्यो नारिभ्यो गवे॥
द॥ इमा रुद्राय तवस इत्येकादशर्चस्य सूक्तस्य कुत्सो रुद्रो जगती अंते त्रिष्टुभौ। रुद्रप्रीः स्वर्धमा उपा
कृति होमे विनियोगः॥ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः॥ यथा शमसद्द्वि
पदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरं॥ मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा
विधेम ते। यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु॥ अश्याम ते सुमतिं देवयज्यया
क्षयद्वीरस्य तव रुद्र मीढ्वः। सुम्नायन्निद्विशो अस्माकमाचरारिष्टवीरा जुहवाम ते हविः॥ त्वेषं वयं
रुद्रं यज्ञसाधं वंकुं कविमवसे निह्वयामहे। आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीम
हे॥४॥ दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा निह्वयामहे। हस्ते बिभ्रद्भेषजा वार्याणि शर्म

छर्दिरस्मभ्यंयंसत् । इदंपित्रेमरुतामुच्यतेवचः स्वादोः ॥ ॥स्वादीयोरुद्रायवर्धनं ॥ रास्वाचनोअमृत
मर्तभोजनंत्मनेतोकायतनयायमृळ ॥ ६ ॥ मानोमहान्तमुतमानोअर्भकंमानउक्षन्तमुतमानउक्षि
तं । मानोवधीःपितरंमोतमातरंमानःप्रियास्तन्वोरुद्ररीरिषः ॥ ७ ॥ मानस्तोकेतनयेमानआयौ
मानोगोषुमानोअश्वेषुरीरिषः । वीरान्मानोरुद्रभामितोवधीर्हविष्मन्तःसदमित्त्वाहवामहे । ८ । उ
पतेस्तोमान्पशुपाइवाकरंरास्वापितर्मरुतांसुम्नमस्मे । भद्राहितेसुमतिर्मृळयत्तमाथावयमवइ
त्तेवृणीमहे ॥ ९ ॥ आरेतेगोघ्नमुतपूरुषघ्नंक्षयद्वीरसुम्नमस्मेतेअस्तु । मृळाचनोअधिचब्रूहिदे
वाधाचनःशर्मयच्छद्विबर्हाः ॥ १० ॥ अवोचामनमोअस्माअवस्यवःशृणोतुनोहवंरुद्रोमरुत्वान् । त
न्नोमित्रोवरुणोमामहन्तामदितिःसिंधुःपृथिवीउतद्यौः ॥ ११ ॥ आतेपितर्मरुतांसुम्नमेतुमानः ना॰ भ॰ ३८
सूर्यस्यसंदृशोयुयोथाः । अभिनोवीरोअर्वतिक्षमेतप्रजायेमहिरुद्रप्रजाभिः ॥ १ ॥ त्वादत्तेभीरुद्रशं
तमेभिःशतंहिमाअशीय ॥ २ ॥ भेषजेभिः । व्यस्मद्द्वेषोवितरंव्यंहोव्यमीवाश्चातयस्वाविषूचीः ॥ श्रेष्ठो
जातस्यरुद्रश्रियासितवस्तमस्तवसांवज्रबाहो । पर्षिणःपारमंहसःस्वस्तिविश्वाअभीतीरप
सोयुयोधिस्माकृच्च । रु । धामानमोभिर्मादुष्टुतीवृषभमासहूती उन्नोवीरांअर्पयभेषजे

भिर्भिषक्तमंत्वाभिषजांशृणोमि । हवीमभिर्हवतेयोहविर्भिरवस्तोमेभीरुद्रंदिषीय ॥ ऊदूदरःसुहवो
मानोअस्यैबभ्रुःसुशिप्रोरीरधन्मनायै ॥ ५ ॥ उन्माममंदवृषभोमरुत्वान्त्वक्षीयसावयसानाध
मानं ॥ घृणीवच्छायामरपाअशीयाविवासेयंरुद्रस्यसुम्नं ॥ क्वस्यतेरुद्रमृळयाकुर्हस्तोयोअ
स्तिभेषजोजलाषः । अपभर्तारपसोदैव्यस्याभीनुमावृषभचक्षमीथाः । प्रबभ्रवेवृषभायश्विती
चेमहोमहींसुष्टुतिमीरयामि । नमस्याकल्मलीकिनंनमोभिर्गृणीमसित्वेषंरुद्रस्यनाम ॥ स्थिरे
भिरंगैःपुरुरूपउग्रोबभ्रुःशुक्रेभिःपिपिशेहिरण्यैः ईशानादस्यभुवनस्यभूरेर्नवाउयोषद्रुद्रादसुर्यं । ९
अर्हन्बिभर्षिसायकानिधन्वार्हन्निष्कंयजतंविश्वरूपं ॥ अर्हन्निदंदयसेविश्वमभ्वंनवाओजीयोरु
द्रत्वदस्ति ॥ १० ॥ स्तुहिश्रुतंगर्तसदंयुवानंमृगंनभीममुपहत्नुमुग्रं ॥ मृळाजरित्रेरुद्रस्तवानोअ
न्यंतेअस्मन्निवपन्तुसेनाः ॥ ११ ॥ कुमारश्चित्पितरंवन्दमानंप्रतिनानामरुद्रोपयन्तं भूरेर्दातारंस
त्पतिंगृणीषेस्तुतस्त्वंभेषजारास्यस्मे ॥ १२ ॥ यावोभेषजामरुतःशुचीनियाशंतमावृषणोयामयो
भु । यानिमनुरवृणीतापितानःताशंचयोश्चरुद्रस्यवश्मि ॥ १३ ॥ परिणोहेतिरुद्रस्यवृज्याःपरित्वेष
स्यदुर्मतिर्महीगात् ॥ अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृळ ॥ एवाबभ्रोवृषभ

यमर्चेकिं नानयधारे वनकृणी पिनहं सि। हवनः मुन्तो रुद्रेह बोधि बृहद्बोधि बृहद्हृदे मविद येसुवीराः
।२५३। एकैकैको ... नित्यमंत्रैः प्रतिमंत्रं स्वाहांतेन ... कृत्वा घृतादिवारि ... दैवं धामाकाहितेकच
त्वारि ग्रहदेवता सोमवरुणाय च धूपदीपनैवेद्यतांबूलादीन समर्पयेत् ... इत्युक्तवतः ... नितान्संप्राश्य
॥ अग्निगन्धार ध्रुव ... तिलव्रीहि ... स्विष्टकृतं कृत्वा ... धसन्नहनीर ... प्रा ... स्पप्रायश्चि
त्तादि होमं समाप्य यजमानान्वारब्ध ... आचार्यः पूर्णाहुतिं जुहुयात् ॥ तत्प्रकारस्तु स्रुवेणाज्यं ग
हीत्वा स्रुचं समबिलां पूरयित्वा तस्यां स्रुवमूर्ध्वबिलं निधाय पुनरधोबिलं निक्षिप्य स्रुवाग्रेकु
सुमाक्षतं सवस्त्रफलं च निधाय ... पाणिना स्रुकस्रुवौ मूले धृत्वा दक्षिणपाणिना स्रुवं शंख
मुद्रया गृहीत्वा तिष्ठन् समपाद ... नत्कायः स्रुवाग्रे न्यस्तदृष्टिः प्रसन्नात्मा समुद्रादूर्मिर्मधुमां
... समुद्रादू
र्मिरित्येकादशर्चस्य सूक्तस्य वामदेव ऋषिः आपस्त्रिष्टुप् ॥ अन्त्या जगती पूर्णाहुतौ विनियोगः ॥ समुद्रादू
र्मिर्मधुमां उदारदुपांशुना सममृतत्वमानट् ॥ घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य
नाभिः ॥ वयं नाम प्रब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः ॥ उप ब्रह्मा शृणवच्छस्यमानं चतुः
शृंगोवमीद्गौर एतत् ॥२॥ चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य त्रिधा ब

ना०भ०
४०

द्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश ॥३॥ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्ववि
दन् । इंद्र एकं सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः ॥४॥ एता अर्षंति हृद्यात्समुद्राच्छतव्रजा
रिपुणा नावचक्षे ॥ घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य आसां ॥५॥ सम्यक्स्रवंति
सरितो न धेना अंतर्हृदा मनसा पूयमानाः ॥ एते अर्षंत्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः ॥६॥ सिं
धोरिव प्राध्वने शूघनासो वातप्रमियः पतयंति यह्वाः ॥ घृतस्य धारा अरुषो न वाजी काष्ठा भिंदन्नू
र्मिभिः पिन्वमानः ॥ अभि प्रवंत समनेव योषाः कल्याण्यः स्मयमानासो अग्निं ॥ घृतस्य धाराः समि
धो नसंत ता जुषाणो हर्यति जातवेदाः ॥८॥ कन्या इव वहतुमेतवा उ अंज्यंजाना अभि चाकशी
मि यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवंते ॥ अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मा
सु भद्रा द्रविणानि धत्त ॥ इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवंते ॥१०॥ धामंते विश्वं
भुवनमधि श्रितमंतः ॥ समुद्रे हृद्यं १ तरायुषि अपामनीके समिथे य आभृतस्तमश्याम म
धुमंतं त ऊर्मिं ॥११॥ ... आग्नेय ते स्वाहेति पवनयव परिमितधारां सततां स्रुगग्रेण सम्रो
र्पिः कृत्वा अग्नय इदं न मम ... विश्वानि ... त्रिष्टुप् ॥ विश्वानि ह

हुता। भात्यग्निराविर्विश्वानिकृणुतेमहित्वा।प्रादेवीर्माया:सहतेदुरेवा:शिशीतेशृंगेरक्षसेविनि
क्षे। इत्यनेनतथैवाविशिष्टंकृत्वा अग्नयइदंनममेतिसंत्यक्त्वा। ॐविश्वेभ्योदेवेभ्य:स्वाहेतिसं
स्रावंकृत्वाविश्वेभ्योदेवेभ्यइदंनमम॥ अथावभृथस्थानीयपूर्णपात्रजलेनमार्जनंकुर्यात्
तद्यथासर्वस्मादितस्पूर्णपात्रमास्तीर्णबर्हिषिदक्षिणपाणिनानिधायतत्रगंगादिपुण्य
नदी:स्मरन्दक्षिणपाणिनास्पृशन्पूर्णमसिपूर्णमेभूया:सुपूर्णमसिसुपूर्णमेभूया:।सदसिसन्मे
भूया:॥ अक्षितिरसिमामेक्षेष्टाइतिजपित्वाकुशाग्रै:प्रागादिचतुर्दिक्षुजलंमंत्रैर्यथालिंगं
सिंचेत्।तेचमंत्रा:प्राच्यांदिशिदेवाऋत्विजोमार्जयंतांदक्षिणस्यांदिशिमासा:पितरोमार्ज
यंतां॥प्रतीच्यांदिशिग्रहा:पशवोमार्जयंतां॥उदीच्यांदिशिआपओषधयोवनस्पतयोमार्ज
यंतां॥ऊर्ध्वायांदिशियज्ञ:संवत्सर:प्रजापतिर्मार्जयतामित्येकमुक्त्वापवन्तर्दिक्षुसिक्त्वा
कुशाग्रै:स्वशिरसिमार्जयेत्॥तत्रमंत्रा:आपोअस्मानितस्यदेवश्रवाआपस्त्रिष्टुप्मार्ज
नेविनियोग:।आपोअस्मान्मातर:शुंधयंतुघृतेननोघृतप्व:पुनंतुविश्वंहिरिप्रंवहंतिदे
वीरुदिदाभ्य:शुचिरापूतएमि।इदमाप:सिंधुद्वीपआपोनुष्टुप्मार्जनेविनियोग:।इद

ना०प्र०
५१

माप:प्रवहतयत्किंचदुरितंमयि।यद्वाहमभिदुद्रोहयद्वाशेपउतानृतं।सुमित्रियानआपओषधय:सं
तुइत्येतैर्मंत्रैर्मार्जनंकृत्वादुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मस्तंहन्मीतिनिर्ऋतिदि
शिकुशाग्रै:रप:सिंचेत्।ततोब्रह्माप्यजमानवामपार्श्वस्थितपत्न्यंजलौपूर्णपात्रस्थजलंउभाभ्यां
प्रजापतासिस्र्यान:स्यावरीकृत॥समुद्रोवोविनयान:स्वंपाथोअपीथेति।मंत्रमेकमुक्त्वापत्न्या
वावाचयन्स्वपार्श्वपवन्प्रसव्यंबीजनिक्षिप्यांजलिस्थजले:पापापनोदार्थमात्मानंयजमानपत्न्या
वंभाक्षयेत्।पत्नीतज्जलंबर्हिषिनिषिंचेत्॥अथवायजमानएववास्यवामपाणावुत्तानेबर्हिषिनि
धायतत्रदक्षिणपाणिनापूर्णपात्रमादायमाहेंद्रमभिसन्नेततज्जलंप्रसव्यंनिषिच्यतत्राप:
समुद्रंगच्छतेतिध्यात्वापाणिस्थजलेनात्मानंपत्नींचप्रोक्षेत्॥तत:कर्ताग्नेर्वायव्यांस्थित:संस्थाज
पनीतिष्ठेत्।तद्यथा॥अग्नेत्वंत्रातितत्पुनंगोपायनंवावंधु:श्रुतवंधुश्चैककर्चानाअग्नय:अ
ग्निर्देवताविराट्छंद:।अग्न्युपस्थानेविनियोग:॥ॐअग्नेत्वंनोअंतमउतत्राताशिवोभव:।वरू
थ्य:।वसुरग्निर्वसुश्रवाअच्छानक्षिद्युमत्तमंरयिंदा:।सनोबोधिश्रुधीहवमुरुष्याणोअघायत:स
मस्मात्॥तंत्वाशोचिष्ठदीदिव:सुम्नायनूनमीमहेसखिभ्य:॥ॐचमस्वरमभ्येतोपचतेनमश्च

यन्नेनूनं तस्मैतदुपपन्नेऽतिरिक्तं। तस्मै तेन मः। अग्नये नमः। स्वस्ति श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रि
यं बलं॥ आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन॥ अग्नये नमः। ततो ऽग्नेः। पश्चिमे स्थित्वा ए नैरवो प्रतिष्ठाप्त
॥ ततः कलशस्थित्वा — मानस्तोकेत्य कुत्सो रुद्रस्त्रिष्टुप् विभूतिग्रहणे विनियोगः॥ ॐ मानस्तोके तनये मा
न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामिनो वधीर्हविष्मंतः सदमित्वा ह
वामहे। इति स्तुवद्धि ष्टेन विभूतिं गृहीत्वा॥ ॐ त्र्यायुषं जमदग्नेरिति ललाटे कश्यपस्य त्र्यायुषमिति॥
शिरसि धारयेत्॥ ततः आचार्यः परिस्तरणं। निर्वर्त्याग्निं परिसमूह्य परिषिंच्य। विश्वानि नो दुर्गहा जा
तवेदः सिंधुं न नावा दुरितातिपर्षि॥ अग्ने अत्रिवत्॥ नमसा गृणानो। ३। अस्माकं बोध्यविता तनू
नां॥४॥ यस्त्वा हृदा कीरिणा मन्यमानो ऽमर्त्यं मर्त्यो जोहवीमि। ६। जातवेदो यशो अस्मासु धेहि। ७। प्र
जाभिरग्ने अमृतत्वमश्यां॥८॥ इत्यष्टर्चसूक्तेनाग्निमर्चयित्वा गंधाक्षतपुष्पादिभिरलंकृत्य नैवेद्यं धूपं भूतर
क्षिणां च दत्वा नमस्कृत्य प्रदक्षिणां सर्वं कर्मणा कृत्वा उत्सृजेत॥ अथ मंडपस्य ईशाने पंचरंगैः स्वस्ति
कं कृत्वा चतुष्कोणं दीर्घं चतुरस्रं सान्नं रक्तदंतं पीठं निधाय तत्र गदया समूलान् हरितदर्भान्
स्तीर्य तत्र सामात्यं यजमानं प्राङ्मुखमुपवेश्य पत्नीं यजमानस्य वामत उपवेश्याचार्यः। आलिखेत्

ना०भ०
४२

दिशां चतुः सहमंगलवाद्यैरभिषेककुंभोदकं पात्रांतरे आदाय प्रसूनांकुरवल्लिष्टंतः। सपल्लवदूर्वायु
अपस्मारवपासहीश्वपवित्रयासकुशाद्भुर्ववापञ्चवमाहस्तमंतर्हयोदकष्टमंत्रैर्लिंगोक्तैर्भिर्वारुणैर्भिः
पावमानमंत्रैस्त्रिष्टुभोतिपवित्रलिंगोक्तैरभिषेकमंत्रैः सुरास्त्वामभिषिंचंतु श्लोकैः श्रीसूक्तेन च रमा। आपः
शिवतमा शांतिरस्तु नदेवस्य त्वेति यजुषा भूर्भुवः स्वरिति व्याहृतिभिरभिषिंचेत॥ ते च मंत्राः। आपोहिष्ठे
ति नवर्चस्य सूक्तस्यांबरीष सिंधुद्वीप आपो गायत्री पंचमी वर्धमाना सप्तमी प्रतिष्ठा॥ अंत्ये द्वे अनुष्टु
भौ। अभिषेके विनियोगः॥ आपोहिष्ठेति सूक्तं स्वस्त्ययनप्रकरणे लिखितं। प्रसम्राज इत्यष्टर्चस्य
सूक्तस्यात्रिर्वरुणस्त्रिष्टुप्। प्र सम्राजे बृहदर्चा गभीरं ब्रह्म प्रियं वरुणाय श्रुताय॥ वि यो जघान श
मितेव चर्मोपस्तिरे पृथिवीं सूर्याय। वनेषु व्यं१ तरिक्षं ततान वाजमर्वत्सु पय उस्रियासु। हृत्सु क्रतुं व
रुणो अप्स्व१ग्निं दिवि सूर्यमदधात्सोममद्रौ।२। नीचीनबारं वरुणः कवंधं प्र ससर्ज रोदसी अंत
रिक्षं तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनत्ति भूम।३। उनत्ति भूमिं पृथिवीमुत द्यां यदा दुग्धं व
रुणो वष्ट्यादित्। समभ्रेण वसत पर्वतासस्तविषीयंतः श्रथयंत वीराः।४। इमामूष्वासुरस्य श्रुत
स्य महीं मायां वरुणस्य प्र वोचं मानेनेव तस्थिवां अंतरिक्षे वि यो ममे पृथिवीं सूर्येण॥५॥ इमामू

नुकश्चित्तमस्यमग्यामर्तो देवस्यनकिरा देधर्षे ॥ तकंयुतुक्रतुंनपृणंसेना रक्षितं तीरवनयः समुतं ॥
दृ ॥ अर्यम्णो वरुणमित्रवासदमिद्रातरक ॥ वैश्वानरानित्यंवरुणा रणंवायश्चीमागम्य कृमा शिम्य
स्तत्र १ ॥ कित्वासोपद्विरिपुर्नोदिवियद्याश्च समुतयन्तविश्वसर्वाता विष्णुश्चियरिवदेवदेवाधाते
स्पामवरुणाश्रियास ॥ ॐ स्वादिष्टयेनिद्रश्चिर्चस्यमस्क स्पमधुछंदाः पवमानसोमोगायत्री अग्निषेके
विनियोग ॥ स्वादिष्टयामदिष्टया पवस्वसोमधारया ॥ इंद्रायपातवेसुतः ॥ रक्षोहाविश्वचर्षणिरभियो
निमयोहतं ॥ द्रुणासधस्थमासदत् ॥ वरिवोधातमोभवमंहिष्ठोवृत्रहंतमः परिषिराधोमघोनां ॥
अभ्यर्षमहानांदेवानांवीतिमंधसा ॥ अभिवाजमुतश्रव ॥ त्वामच्छा चरामसितदिदर्थंदिवेदिवे ॥
इंदोत्वेनआशसः ॥ पुनातितेपरिस्रुतंसोमंसूर्यस्यदुहिता ॥ वारेणशश्वतातना ॥ तमीमण्वीसमर्य्य
आगृभ्णंति ॥ योषणोदशस्वसारः पार्येदिविं तमींहिन्वंत्यग्रुवोधमंतिबाकुरंदति ॥ त्रिधातुवारणंम
धु ॥ अभीममघ्न्याउतश्रीणंतिधेनवःशिशुं ॥ सोममिंद्रायपातवे ॥ अस्येदिंद्रोमदेष्वाविश्वावृत्राणिजि
घ्नते ॥ शूरोमघाचमंहते ॥ २० ॥ शन्नइंद्राग्नीतिपंचदशर्चस्यसप्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप् अभिषे
के विनियोगः ॥ शन्नइंद्राग्नीभवतामवोभिः शन्नइंद्रावरुणारातहव्या ॥ शमिंद्रासोमासुवितायशन्न

ना०म०
४३

समस्यपसुयमस्यशंसः ॥ शन्नोअर्यमापुरुजातोअस्तु ॥ शन्नोधातमामुधर्त्ता नोअस्तुशन्न उरुची
भवतुस्वधाभिः ॥ शंरोदसीबृहतीशन्नोअद्रिःशन्नोदेवानां
सुहवानिसंतु ॥ शन्नअग्निर्ज्योतिरनीकोअस्तु ॥ शन्नोमित्रावरुणावश्विनाशं ॥ शन्नःसुकृतांसुकृतानिसंतुशन्नइषिरोअभिवातुवातः ॥ शन्नोद्यावापृथिवीपूर्वहूतौशमंतरिक्षंदृशये नोअस्तु ॥ शन्नओषधीर्वनिनोभवंतुशन्नोरजसस्प
तिरस्तुजिष्णुः ॥ शन्नइंद्रोवसुभिर्देवोअस्तुशमादित्येभिर्वरुणःसुशंसः ॥ शन्नोरुद्रोरुद्रेभिर्जलाषः
शन्नस्त्वष्टाग्नाभिरिहशृणोतु ॥ शन्नःसूर्यउरुचक्षाउदेतुशन्नश्चतस्रःप्रदिशोभवंतु ॥ शन्नःपर्वता
ध्रुवयोभवंतुशन्नःसिंधवःशमुसंत्वापः ॥ शन्नोअदितिर्भवतुव्रतेभिःशन्नोभवंतुमरुतःस्वर्काः
शन्नोविष्णुःशमुपूषानोअस्तुशन्नोभवित्रंशम्वस्तुवायुः ॥ शन्नोदेवःसवितात्रायमाणःशन्नो
भवंतूषसोविभातीः ॥ शन्नःपर्जन्योभवतुप्रजाभ्यःशन्नःक्षेत्रस्यपतिरस्तुशंभुः ॥ २ ॥ शन्नोदेवाविश्व
देवाभवंतुशंसरस्वतीसहधीभिरस्तु ॥ शमभिषाचःशमुरातिषाचःशन्नोदिव्याःपार्थिवाःशन्नो
अप्याः ॥ शन्नःसत्यस्यपतयोभवंतुशन्नोअर्वंतःशमुसंतुगावः ॥ शन्नऋभवःसुकृतःसुहस्ताः
शन्नोभवंतुपितरोहवेषु ॥ शन्नोअजएकपादेवोअस्तुशन्नोहिर्बुध्न्यः ॥ ३ ॥ शन्नःसमुद्रःशन्नो
अपांनपात्पेरुरस्तुशन्नः ॥ पृश्निर्भवतुदेवगोपाः ॥ आदित्यारुद्रावसवोजुषंतेदंब्रह्मक्रियमाणंनवी

यः सृण्वंतु नो हविषः पार्थिवासो ये जाता उत ये यज्ञियासः॥ ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा
अमृता ऋतज्ञाः। ते नो रासंतामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः॥ ५॥ ३॥ पवित्रं ते विततमिति पं
चर्चस्य सूक्तस्य आंगिरसः पवित्रः पवमानः सोमो गायत्री अभिषेके विनियोगः। पवित्रं ते विततं ब्रह्म
णस्पते प्रभुर्गात्राणि पर्येषि विश्वतः। अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहंतस्तत्समाशत॥
तपोष्पवित्रं विततं दिवस्पदे शोचंतो अस्य तंतवो व्यस्थिरन्॥ अवंत्यस्य पवितारमाशवो दिवस्पृष्ठमधि
तिष्ठंति चेतसा॥ अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः। मायाविनो ममिरे अ
स्य मायया नृचक्षसः पितरो गर्भमादधुः। गंधर्व इत्था पदमस्य रक्षति पाति देवानां जनिमान्यद्भुतः।
गृभ्णाति रिपुं निधया निधापतिः सुकृत्तमा मधुनो भक्षमाशत हविर्हविष्मो महि सद्म दैव्यं
नभो वसानः परि यास्यध्वरं राजा पवित्ररथो वाजमारुहः सहस्रभृष्टिर्जयसि श्रवो बृहत्॥ ४॥ पव
स्व देवमादनो विचर्षणिरप्सा इंद्राय वरुणाय वायवे कृधी नो अद्य वरिवः स्वस्तिमदुरुक्षितौ गृणीहि
दैव्यं जनं॥ आ यस्तस्थौ भुवनान्यमर्त्यो विश्वानि सोमः परि तान्यर्षति कृण्वन्संचृतं विचृतमभिष्टय
इंदुः सिषक्त्युषसं न सूर्यः॥ आ यो गोभिः सृज्यत ओषधीष्वा देवानां सुम्न इषयन्नुपावसुः॥ आ विद्युता प

ना०म०
४४

वते धारया सुत इंद्रं सोमो मादयन्दैव्यं जनं॥ एष स्य सोमः पवते सहस्रजिद्धिन्वानो वाचमिषिरामुषर्बुधं
इंदुः समुद्रमुदियर्त्ति वायुभिरेंद्रस्य हार्दि कलशेषु सीदति॥ अभि त्यं गावः पयसा पयोवृधं सोमं श्री
णंति मतिभिः स्वर्विदं धनंजयः पवते कृत्व्यो रसो विप्रः कविः काव्येना स्वर्चनाः॥ ५॥ इंद्राय सोम सुषुतः परि
स्रवापामीवा भवतु रक्षसा सह मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वंत इह संत्विंदवः॥ अस्मान्समर्ये
पवमान चोदय दक्षो देवानामसि हि प्रियो मदः। जहि शत्रूंरभ्या भंदनायतः॥ पिबेंद्र सोममव नो मृधो
जहि॥ अदब्ध इंदो पवसे मदिंतम आत्मेंद्रस्य भवसि धासिरुत्तमः। अभि स्वरंति बहवो मनीषिणो रा
जानमस्य भुवनस्य निंसते। सहस्रणीथः शतधारो अद्भुत इंद्रायेंदुः पवते काम्यं मधु जयन्क्षेत्रम
भ्यर्षा जयन्नप उरुं नो गातुं कृणु सोम मीढ्वः॥ कनिक्रदत्कलशे गोभिरज्यसे। व्यव्ययं समया वार
मर्षसि मर्मृज्यमानो अत्यो न सानसिरिंद्रस्य सोम जठरे समक्षरः। स्वादुः पवस्व दिव्याय जन्मने स्वा
दुरिंद्राय सुहवीतु नाम्ने। स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमां २ ३ अदाभ्यः॥ अ
त्यं मृजंति कलशे दश क्षिपः प्र विप्राणां मतयो वाच ईरते पवमाना अभ्यर्षंति सुष्टुतिमैंद्रं विशंति
मदिरास इंदवः। पवमानो अभ्यर्षा सुवीर्यमुर्वीं गव्यूतिं महि शर्म सप्रथः। माकिर्नो अस्य परिषू

त्तिश्च ताते रोजयमत्वाधर्मं धनं ॥ अधिद्यामस्थाद्वृषभो विचक्षणोरूरुचद्वि दिवो रोचना कविः राजाप
वित्रमत्येति रोरुवद्दिवः पीयूषं दुहते नृचक्षसः ॥ दिवो नाके मधुजिह्वा असश्चतो वेना दुहंत्युक्षणं
गिरिष्ठां ॥ अप्सु द्रप्सं वावृधानं समुद्र आ सिंधोरूर्मा मधुमंतं पवित्र आ ॥ नाके सुपर्णमुपप— वां
सं गिरो वेनानामकृपंत पूर्वीः ॥ शिशुं रिहंति मतयः पनिप्नतं हिरण्ययं शकुनं क्षामणि स्थां ॥ ऊ
र्ध्वो गंधर्वो अधि नाके अस्थाद्विश्वा रूपा प्रतिचक्षाणो अस्य ॥ भानुः शुक्रेण शोचिषा व्यद्यौत्प्रारू
रुचद्रोदसी मातरा शुचिः ॥४॥ प्र त आशवः पवमान धीजवो मदा अर्षंति रघुजा इव त्मना ॥ दिव्याः सुप
र्णा मधुमंत इंदवो मदिंतमासः परि कोशमासते ॥ प्र ते मदासो मदिरास आशवो सृक्षत रथ्यासो
यथा पृथक् धेनुर्न वत्सं पयसाभि वज्रिणमिंद्रमिंदवो मधुमंत ऊर्मयः ॥ अत्यो न हियानो अभि वाजमर्षस्व
र्वित्कोशं दिवो अद्रिमातरं ॥ वृषा पवित्रे अधि सानो अव्यये सोमः पुनान इंद्रियाय धायसे ॥ प्र त आ बा०सं०
श्विनीः पवमान धीजुवो दिव्या असृग्रन्पयसा धरीमणि ॥ प्रांतर्ऋषयः स्थाविरीरसृक्षत ये त्वा मृजं ४५
त्यृषिषाण वेधसः ॥ विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोस्ते सतः परि यंति केतवः ॥ व्यानशिः पव
से सोम धर्मभिः पतिर्विश्वस्य भुवनस्य राजसि ॥५॥ ॥ अथ ग्रहमंत्राः ॥ ॥ ग्रहाणामादिरादित्यो लोक

रक्षणकारकः ॥ विषमस्थानसंभूतां पीडां दहतु ते विधुः ॥ भूमिपुत्रो महातेजा जगतां भयकृत्सदा ॥
वृष्टिकृद्वृष्टिहर्ता च पीडां दहतु ते कुजः ॥२॥ उत्पातरूपो जगतां चंद्रपुत्रो महाद्युतिः ॥ सूर्यप्रियकरो वि
द्वान्पीडां दहतु ते बुधः ॥३॥ देवमंत्री विशालाक्षः सदा लोकहिते रतः ॥ अनेकशिष्यसंपूर्णः पीडां दहतु
ते गुरुः ॥४॥ दैत्यमंत्री गुरुस्तेषां प्राणदश्च महामतिः ॥ प्रभुस्ताराग्रहाणां च पीडां दहतु ते भृगुः ॥५॥ सू
र्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः ॥ मंदचारः प्रसन्नात्मा पीडां दहतु ते शनिः ॥७॥ महाशिरा महावक्त्रो
दीर्घदंष्ट्रो महाबलः ॥ अनेकरूपवर्णैश्च शतशोथ सहस्रशः ॥ उत्पातरूपो जगतः पीडां दहतु ते
शिखी ॥८॥ ॥ अथ देवमंत्राः ॥ ॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः ॥ वासुदेवो जगन्नाथः
स्तथा संकर्षणो विभुः ॥ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते ॥ आखंडलोग्निर्भगवान्यमो वै नि
र्ऋतिस्तथा ॥२॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥ ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु
ते सदा ॥३॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥ बुद्धिर्लज्जा वपुः शांतिस्तुष्टिः कांतिश्च
मातरः ॥४॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः ॥ आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजा
॥५॥ ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च तर्पिताः ॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥६॥ ऋष

योमुनयोगावोदेवमातरएवच।देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः॥७॥अस्त्राणिसर्व
शस्त्राणिराजानोवाहनानिच।औषधानिचरत्नानिकालस्यावयवाश्चये॥८॥सरितःसागराःशैला
स्तीर्थानिजलदानदाः।एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धये॥९॥एतैर्मंत्रैःप्रत्स्वमभिषिंच्यअथा
सूक्तेनप्रत्स्वमभिषिंचेत्॥इमाआपःशिवतमाइमाःसर्वस्यभेषजीः।इमाराष्ट्रस्यवर्द्धनीरिमाराष्ट्र
भृतोऽमृताः।याभिरिंद्रमभ्यषिंचत्प्रजापतिःसोमंराजानंवरुणंयमंमनुं।ताभिरद्भिरभिषिंचामित्वाम
हंराजात्वमधिराजोभवेह॥महांतंत्वामहीनांसम्राजंचर्षणीनां।देवीजनित्र्यजीजनद्भद्राजनित्र्यजीजन
त॥देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां।अग्नेस्तेजसासूर्यस्यवर्चसेंद्रियेणाभि
षिंचामिबलायश्रियैयशसेन्नाद्याय।ॐभूर्भुवःस्वरितिव्याहृतिभिश्चसपल्लवैःकुशाग्रैर
भिषिंचेयुः।एवमभिषिक्तोयजमानःश्वेतवस्त्रयुगंगंधमाल्याभरणादिविभूषयात्॥ततःश्री
छायांदिक्षुचबलिमुत्क्षिपेत्।तद्देवसुखबोधार्थंलिख्यते।इंद्रविश्वामित्रऋषिरिंद्रोगायत्री।इं
द्रप्रीत्यर्थंबलिदानेविनियोगः।इंद्रंविश्वाअवीवृधन्समुद्रव्यचसंगिरः।रथीतमंरथीनांवाजानां
सत्पतिंपतिं॥इंद्रायसांगायसपरिवारायसायुधायसशक्तिसहितायएषसदीपमाषभक्तब

ग्रा०अ०
४६

लिर्नमः।इंद्रायइदंनमम॥ॐइंद्रआगच्छइमंसदीपमाषभक्तबलिंगृहाणइंद्ररक्षबलिंभक्षमम
यजमानस्यसकुटुंबस्यआयुःकर्त्ताक्षेमकर्त्तापुष्टिकर्त्ताऋद्धिकर्त्ताक्षेमकर्त्ताशांतिकर्त्ताशु
भकर्त्ताभवेतिपुष्पाक्षतजलानिसर्वाभिमुखस्सृजेत्।बलेर्बलिदातुस्थानात्तस्लैकेनापिनगंतव्यं॥
अग्निंदूतंकण्वोमेधातिथिरग्निर्गायत्री।अग्निप्रीत्यर्थंबलिदानेविनियोगः।अग्निंदूतंवृणीमहेहोता
रंविश्ववेदसं।अस्ययज्ञस्यसुक्रतुं॥अग्नयेसांगायेत्यादि०शुभकर्त्ताभवेत्यंतंपबिल्वपुष्पाक्षतज
लानिअग्न्यभिमुखस्सृजेत्॥ततोदक्षिणेयमाय।यमायसोमंयमोयमोनुष्टुप्।यमप्रीत्यर्थंबलिदाने
विनियोगः।यमायसोमंसुनुतयमायजुहुताहविः।यमंहयज्ञोगच्छत्यग्निदूतोअरंकृतः।य
मायसांगायेत्यादि०शुभकर्त्ताभवेत्यंतंपबिल्वपुष्पाक्षतजलानिदक्षिणाभिमुखस्सृजेत्॥त
तोनैर्ऋत्यां।मोषुणोघोरःकण्वोनिर्ऋतिर्गायत्री।निर्ऋतिप्रीत्यर्थंबलिदानेविनियोगः।मोषुणःपरप
रानिर्ऋतिर्दुर्हणावधीत्।पदीष्टतृष्णयासह।निर्ऋतयेसांगायेत्यादिपूर्ववत्॥ततःपश्चिमेतत्त्वाया
मितिशुनःशेपोवरुणस्त्रिष्टुप्।वरुणप्रीत्यर्थंबलिदानेविनियोगः।तत्त्वायामिब्रह्मणावंदमानस्त
दाशास्तेयजमानोहविर्भिः।अहेळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः।वरुणायेसा

दिस्र्वं वत्। ततः वायव्ये। तत्रवायोअवोवायुर्गायत्री। वायुप्रीत्यर्थं बलिदाने विनियोगः॥ तत्रवायहूतस्य
त्वष्टर्जामातरद्भुता॥ अवांमाकृणीमहे। वायवे सांगायसपरि पूर्ववत्। ततः उत्तरे सोमो धेनुं गोतम
:सोमस्त्रिष्टुप् सोमप्रीत्यर्थं बलिदा॰ सोमो धेनुं सोमो अर्वंतमाशुं सोमो वीरं कर्मण्यं ददाति। सा
दन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै। सोमाय सांगाय सपरिवाराय सायुधाय सशक्तिकाय पूर्ववत्। ततः ईशान्यां तमीशानोजग
तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयं। पूषानो यथा वे
दसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये। ईशानाय सांगाय सपरिवाराय पूर्ववत्॥ ततः ईशानी पूर्वयोर्मध्ये स्यो
ना पृथिवी भवानृक्षरा निवेशनी। य
च्छा नः शर्म सप्रथः। अनंताय सपरिवाराय पूर्ववत्॥ ततः पश्चिमनैरृत्यसोर्मध्ये ब्रह्मजज्ञानं गोतमो वाम
देवो ब्रह्मा त्रिष्टुप्। ब्रह्मप्रीत्यर्थं बलि॰ ब्रह्मणे सांगाय सपरिवाराय पूर्ववत्॥ ततो ग्रहवेद्याः समंतात् ग्रह
बलयो देयाः। तत्र पूर्ववत्। एवमुत्तरत्रापि। ततो वेद्याः आग्नेय्यां अग्निः पूर्णो गोतमः सोमो गायत्री
सोमप्री॰ आप्यायस्वेति बलिः। सोमाय सांगाय सपरिवाराय सायुधाय अधिदेवताप्रत्यधिदेवतासहिताय सपरिवाराय सर्वं॰
आप्यायस्वेति बलिः। सोमाय सांगाय सपरिवाराय ततो दक्षिणे अग्निर्मूर्धा विरूपो गारको गायत्री॰

ना॰भ॰
४१

अंगारकप्री॰ अग्निर्मूर्धेति बलिः। भौमाय सांगाय सपरिवाराय स्कंदरुद्राभ्यां अधिदेवताप्रत्यधिदेवतासहिताय स
दि॰ सर्वं॰ ततः ईशान्यां उद्बुध्यध्वं बुधः सोमो बुधस्त्रिष्टुप्। बुधप्री॰ उद्बुध्यध्वमिति बलिः। बुधाय सां
गाय सपरिवाराय नारायणविष्ण्वधिदेवताप्रत्यधिदेवतासहिताय सपरिवाराय सर्वं वत्॥ ततः उत्तरे बृहस्पते अतियदर्यो गृत्सम
दो बृहस्पतिस्त्रिष्टुप्॥ बृहस्पतिप्रीत्य॰ बृहस्पते अ॰ बलिः बृहस्पतये सांगाय सपरिवाराय इन्द्र ब्रह्माधिदेवप्रत्य
धिदेवतासहिताय सपरिवाराय सर्वं वत्। ततः सर्वेशक्रः परमार॥ शुक्रो द्विपदा विराट् शुक्रप्रीत्यर्थं॰ शुक्रं
अन्धसः इति बलिः शुक्राय सांगाय सपरि॰ इन्द्राण्यधिदेवताप्रत्यधिदेवतासहिताय सपरिवाराय सर्वं॰ ततः प
श्चिमे॥ शमग्निरिति मेधातिथिः शनैश्चरः गायत्री शनिप्री॰ शमग्निरितिबलिः शनैश्चराय सपरिवाराय प्रजा
पत्य अधिदेवताप्रत्यधिदेवतासहिताय सपरिवाराय सर्वं॰ ततः वायव्ये। केतुं कृण्वन्‌ मधुच्छंदा केतुर्गायत्री। केतुप्री॰ केतुं कृ॰ बलि
:। केतवे सांगाय सपरि॰ चित्रगुप्त ब्रह्माधिदेव॰ सहिताय सपरि॰ अथ वेद्युत्तरतो गणपतये सपरिवाराय
बलिं दद्यात्॥ गणानां त्वा गृत्समदो गणपतिर्जगती गणपतिप्रीत्यर्थं॰ गणाधिपतये सपरिवाराय सिद्धिबुद्धि
सहिताय सपरिवाराय पूर्ववत् जातवेदसे कश्यपो दुर्गा त्रिष्टुप्॥ दुर्गाप्रीत्यर्थं बलि॰ दुर्गायै सांगाय सपरि
वाराय सायुधाय सशक्तिकाय एष सदीपधान्यमाषभक्तबलिर्नमः दुर्गा दुर्गायै इदं बलिरूपमन्नं न

मम॥ ओमीदुर्गे अन्नाम॥ इमं सदीपं माषभक्तं बलिं गृहाण मां रक्ष बलिं भक्ष मम यजमानस्य सवासकु
टुंबस्यायुः कर्त्री क्षेमकर्त्री पुष्टिकर्त्री तुष्टिकर्त्री ऋद्धिकर्त्री शांतिकर्त्री शुभकर्त्री भवेति पुष्पाक्षतज
लानि सर्वाभिमुखस्सजेत्॥ वायेश्रुतं गोतमो वामदेवो वायुरनुष्टुप् वायुप्रीत्यर्थं बलि० वायवे सां
गायेत्यादि सर्ववत्॥ आदित्यन्तस्य रेतसो ज्योतिष्मद्रूपतिवासरं॥ परेण्य दिशि धत्ते दिवा आकाश
यत्यादि सर्ववत्॥ रक्षोघ्ना प्रकोक्तस्य वामदेवो ऽग्निर्गायत्री॥ अनोप्रीत्यर्थे बलिदाने वि० एषो उषा अपूर्व्या
र्व्याः मर्हति प्रियादिवः॥ स्तुषेवामश्विना बृहत् अश्विभ्यां सांगाभ्यां सपरिवाराभ्यां सायुधाभ्यां स
शक्तिकाभ्यां इमं सदीपं माषभक्तं बलिं गृह्णीतं मां रक्षतं बलिं भक्षतं मम यजमानस्य सवासकुटुं
बस्यायुः कर्त्र्यौ क्षेमकर्त्र्यौ पुष्टिकर्त्र्यौ तुष्टिकर्त्र्यौ शांतिकर्त्र्यौ शुभकर्त्र्यौ भवतमिति पु
ष्पाक्षतजलानि सर्वाभिमुखस्सजेत्॥ ततो वास्तोष्पति प्रीत्यर्थं बलिदाने विनियोगः० वास्तोष्पत
ये सांगायेत्यादि सर्ववत्॥ ततो महाबलिं कुंकुमादिना रक्तं रक्तपुष्पादियुतं सदीपं सतांबूलं द
क्षिणं विस्तीर्णमृन्मयादिपात्रे निधाय क्षेत्रपालाय दद्यात्॥ क्षेत्रस्य वामदेवः क्षेत्रपालोनुष्टुप् क्षे
त्रपालप्रीत्यर्थं बलि० क्षेत्रस्य पतिना वयं हितेनेव जयामसि॥ गामश्वं पोषयित्न्वासनो मृळातीदृ

नं०प्र०
५९

क्षे क्षेत्रपालाय सांगाय सपरिवाराय सायुधाय सशक्तिकाय भूतप्रेतपिशाच यक्ष राक्षस शाकि
नी डाकिनी वेतालादि महाभूतपरिवारं रक्ष बलिं भक्ष मम यजमानस्य सकुटुंबस्यायुः कर्त्ता क्षेम
कर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता ऋद्धिकर्त्ता शांतिकर्त्ता शुभकर्त्ता पापहर्त्ता भवेति पुष्पाक्षतजलानि सर्वा
भिमुखस्सजेत्। ततो वास्तोष्पति प्रीत्यर्थं बलिदाने विनियोगः० वास्तोष्पतये सांगायेत्यादि सर्ववत्। त
तो महाबलिं कुंकुमादिना रक्तं रक्तपुष्पादियुतं सदीपं सतांबूलं दक्षिणं विस्तीर्णमृन्मयादिपात्रे नि धा
य क्षेत्रपालाय दद्यात्। क्षेत्रस्य वामदेवः क्षेत्रपालोनुष्टुप् क्षेत्रपालप्रीत्यर्थं बलि० क्षेत्रस्य पतिना
वयं हितेनेव जयामसि। गामश्वं पोषयित्न्वासनो मृळातीदृशे॥ क्षेत्रपालाय सांगाय सपरिवाराय सा
युधाय सशक्तिकाय भूतप्रेतपिशाच यक्ष राक्षस शाकिनी डाकिनी वेतालादि महाभूतपरिवार रक्ष बलिं
भक्ष मम यजमानस्य सकुटुंबस्यायुः कर्त्ता क्षेमकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता ऋद्धिकर्त्ता शांतिक
र्त्ता शुभकर्त्ता पापहर्त्ता भवेति पुष्पाक्षतजलानि पूर्वाभिमुखस्सजेत्। ततो बलिं शूद्रेण नीचद्वारेण
ग्रामाद्बहिर्नवा चतुष्पथादौ क्षेपयेत्॥ चतुष्पथाक्षेपणानंतरं शूद्रस्सादोविध्युक्तमार्गेण सचै
लः स्नात्वा धौतवाससी परिधाय सर्वं एतद्वासांसि प्रक्षाल्य शौचमपि त्वा संपूज्य तिलकादि

कृत्वा गृहमागच्छेत्। नीयमाने बलौ सति वादित्रैः शब्दैः उदकं सिंचेत्। तत्र मंत्रः॥ शंनः पृथि
वीक्षिवमंतरिक्षं द्यौर्नो दिशतो भयं अस्तु॥ शिवार्द्दिशाः प्रदिश उद्दिशो न आपो विद्युतः परि
पांतु सर्वतः शांतिः शांतिः बलिक्षेपणानंतरं मुखमार्जनं नीराजनं कारयेत् तत्र मंत्रः श्रि
ये जात इति॥ साहि श्रीरमृता सतां इत्यनेन मंत्रेण नीरा॥ जनं कार्यं॥ अथ यजमानो गृहदेवताभ्य
श्चतुर्थेतरदेवतानामपि पुष्पाणि समर्प्याचार्येण आहूय सचारणपूर्वकं होत्रासनं कारये
त्तत्र मंत्रः॥ ॐ भूर्भुवः स्वः उत्तिष्ठ ब्रह्मणस्पते देवयंतस्त्वेमहे॥ उपप्रयंतु मरुतः सुदानव इं
द्रप्राशूर्भवासचा॥ अस्मादमितद्योनिमिंकेतुस्कूरेमधु॥ अथ देवतानां विसर्जनं॥ यांतु देवगणा
ः सर्वे पूजामादाय पार्थिवीं। इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च। ततो यजमानः आचा
र्यप्रभृतिभ्यः जपहोमफलं गृहीत्वा तेभ्यो दक्षिणां दद्यात्। गौः शंखो रक्तोऽनड्वान् हिरण्यं पी
तं वासः श्वेताश्वः कृष्णा गौः कालायसं हस्ती छागो वेति ग्रहमंत्रेण। अत्र न्यूनदक्षिणा बुध
दक्षिणायां हिरण्येन समाकार्या। आद्यगवादि। एतदभावे यथाशक्ति हिरण्यं वा दद्या
त्। आचार्याय द्विगुणं। अन्येभ्यश्च यथाशक्ति भूयसीं दक्षिणां दद्यात्। ततः कांस्यपात्रग

ना·भ·
५८

तान्येः रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय। इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य
हरयः शतादशेति मंत्रेण सुकृटंवः स्वप्रतिरूपं प्रेक्ष्य आज्यं तेजः समुद्दिष्टं आज्यं पापहरं स्मृतं। आ
ज्यं सुराणामाहार आज्ये देवाः प्रतिष्ठिताः॥ इति मंत्रं पठित्वा॥ तदाज्यं सदक्षिणं आचार्या
य दद्यात्। ततो भूरिदक्षिणां दत्वा संकल्पवाक्यं कस्मा अकृतेरेकं शतस्यैकं सहस्रस्य वैकं य
था शक्ति ब्राह्मणान् भोजयित्वा तेभ्यः शांतिः पुष्टिश्चास्त्विदा आशिषो गृहीत्वा तान् संप्रार्थ्य प्र
णिपत्य यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु॥ न्यूनं संपूर्णतां याति सद्यो वंदे तमच्यु
तमिति पठित्वा॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः संपूर्णं स्यादि
ति श्रुतिरित्यायुक्ता न्यूनातिरिक्तच्छिद्रतार्थं यथाशक्ति अच्युतानंत गोविंदेति नाममंत्रं जपं
कृत्वा गृहयज्ञफलं विष्णवे समर्पये॥ नाम्नोऽस्य यावती शक्तिः पापनिर्हरणे हरेः। तावत्कर्तुं न शक्नो
ति पातकं पातकी जनः॥ हरेर्नामैव नामैव मम जीवनं॥ कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा
यत्करोमि यदश्नासि यज्जुहोसि ददासि यत्॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं॥ कृष्णस्य स्म
रणेन तर्पणेन सर्वसांगं सफलं च भवेन्न संशयः॥ ततः स्वयं हृष्टमनाः॥ बंधुमित्रेष्टजनैः सुहृ

ःसह भुंजीत॥ अथ चाश्वलायनगृह्यपरिशिष्टोक्तो ग्रहमखः। आश्वलायनानामेव बह्वृचसंबं-
गृह्योक्तं यस्य कर्म प्रचोदितं। तस्याभावे तिथावस्त्रार्थे कृते सर्वं कृतो भवेदिति वचनात्॥ एवमन्ये-
षामपि स्वगृह्यादावुक्तस्तदभावे याज्ञवल्क्यगृह्यादीनोक्तस्तैर्याज्ञवल्क्यादिस्मृत्युक्तो मत्स्यपुराणा-
द्युक्तो वानुष्ठेयः। स्मृत्यादेः सर्वसाधारणत्वादिति दिक्॥ ॥इति श्रीविद्वन्मुकुटमाणिक्यश्री-
रामेश्वरभट्टसूनुनारायणभट्टकृते प्रयोगरत्ने नवग्रहमखप्रयोगः समाप्तः॥ ॥अथ विवाहो-
त्तरकर्तव्योपि स्थालीपाकः प्रथम उच्यते॥ तत्रांगानामुक्तानामप्येषपतिर्देवो न प्राप्तेः॥ सर्वविवा-
हानंतरकर्तव्यग्रहप्रवेशनीयहोमोत्तरमाविश्वं पौर्णमास्यारंभणीयः॥ नत्वमावास्यायां तत्र तिथि-
होमात्स्थालीपाकपौर्णमासी चेत्तदारंभः। यदि तारंभकाले मलमासगुरुशुक्रास्तबाल्यवार्धक्यग्रहण
पौषमासादि भवति तदापि प्यारंभः कार्यः। यानि तु तदारंभानिषेधकानि। उपरागोधिमासश्च-
द्वितीयप्रथमपर्वणि तथा मलिम्लुचे पौषे नान्वारंभणमिष्यते॥ गुरुभार्गवयोर्मौढ्ये चंद्रसूर्यग्रहे
सादीनि सप्तग्रहादिकादिवचनानि आलस्यादिनास्तकालानुपक्रांतस्थालीपाकादिप्रारंभविषया-
णीति प्रयोगपारिजातकारः। तथा चापरार्के शृंगगर्गवचनं राजहार। नामकर्मवद्दर्शेष्टिं यथा

कालं समाचरेत्॥ अतिपाते सति तद्वोः प्रायश्चित्तमासीपूर्णपमेति॥ ॥इति स्थालीपाकारंभकालः॥ ॥
अथ पर्वनिर्णयः। पौर्णमासी दर्शश्च पर्वणी। तत्रान्वाधानं प्रतिपदि इष्टिरिति तु स्वर्गः। तत्र पर्व चतुर्थांशः। प्रति-
पदस्त्वाद्यास्त्रयोंशाः। सूर्योदयोत्तरं मुहूर्तत्रये विद्यमानो यागकालः॥ सूर्योदयास्तमानपर्यंतं यत्र प-
र्व तु तत्र न संदेहः। यदि तु खंडपर्व तत्र निर्णयः। अन्हो मध्यात्ततः ऊर्ध्वं वा पर्वप्रतिपदोः संधौ तदहर्या-
गः। पूर्वेद्युरन्वाधानं मध्याह्नात्परतः संधौ तदहरन्वाधानं परेद्युर्याग इति। संधिश्च प्रतिपदो ह्रास-
वृद्धिभ्यां पर्वणि प्राप्तिप्यज्ञेयः। दृष्टेः पर्वणि समाप्तो पुनरिष्टिकर्तव्यतापत्तेः साप्रतिपद्येव समा-
पनीयाः। न पर्वमध्ये अपराह्णसंधौ परेद्युः प्रतिपच्चतुर्थांशोपि यागेन दोषः चंद्रदर्शनदिने ह॥ इष्टि-
निषेधवचनानि तन्निर्णायकानि संभवे योज्यानि॥ यात्तु पौर्णमासी संगवे धर्मावर्तनात्सर्वसं-
धिमति सा सद्यस्कालेति तस्यामेवान्वाधानं यागश्च॥ ॥अथ विकृतौ निर्णयः॥ ॥आवर्तनेततः स-
र्वं वा पर्वसंधौ तदहः। प्रकृतियागं कृत्वा पश्चादाग्रयणादिविकृतिः कार्या। परसंधौ तु विकृतिया-
गः पूर्वसंधिदिने प्रकृतिस्तु तदुत्तरदिने इति॥ ॥अथ स्थंडिलकरणादिनिर्णयः॥ ॥तत्र चौलादिहो-
मो लौकिकेग्नौ पर्वणि स्थालीपाकश्रवणाकर्मादिहोमो गृह्याग्नौ तत्र लौकिकाग्निहोमे स्थंडिलकरणं।

हिरग्निप्रतिष्ठापनांतोविधिर्नियतः गृह्याग्निहोमेपिगतत्रयंचेद्भवास्तुहोमसत्नेगत्वौवान्नष्टकादिषु
नियतः धार्यमाणेनैवसंभवात्॥ यदापिसमिधादाग्निसमारोपस्तदागृह्याग्निकर्त्तव्येपिस्थाली
पाकादौनियतः॥ एतत्सर्वमभिप्रेत्यमत्रंक्वचहोमन्स्यादिति॥ गृह्योक्तानिप्रतिष्ठापुनर्विधौविषयंदर्श
यितुमाहकारिकाकारः। प्रतिष्ठाप्याथप्रलेखाद्युहोमायानहविर्भुजं॥ एतदुक्तंप्रकुर्वीतहोमपूर्वंस्थापि
तेनतदन्ते॥ प्रमयासंस्थापितेनान्नेहोमन्निनियमर्थस्यात्॥ एवंस्थंडिलकरणादिविषयं। निर्णी
यस्थंडिलादिकुर्यात्। तत्रयजमानः कृतनित्यक्रियः शुचिः परिहितधौतवासाः दर्भपाणिः पवि
त्रपविष्टः आचम्यप्राणानायम्य देशकालौसंकीर्त्य परमेश्वरप्रीत्यर्थममुक
कर्मकरिष्ये। तदंगहोमंकर्त्तुंस्थंडिलादिकरिष्ये॥ इतिसंकल्प्यगोमयादिलिप्तेषुचौदेशेषुस्त्थ
प्रदायुतःप्रारंभमुदक्संस्थंचतुरंगुलोन्नतमनुन्नतंवाचतुरिःहस्तमितिलाद्विसप्तसंगु ना०सं० ५१
लपरिधिकंफलितमष्टादशांगुलंविस्तृतंहोमानुसारेणतदधिकंवानतुततोमध्योन्नतं
स्थंडिलंकुर्यात्॥ तत्रगोमयेनप्रदक्षिणमुपलिप्यदक्षिणोत्तरोदग्रांप्रादेशमात्रामष्टसंगु
लानिसक्तांरेखांदक्षिणोपक्रमामुदक्संस्थांप्रादेशमात्रामेकलेखांतस्यांदक्षिणोत्तरयोः प्रागग्रा

यतेस्रवस्रवपात्रसंसृष्टप्रादेशसंमितेदेशेलिखित्वानयोर्मध्येपरस्परमसंसृष्टाउदक्संस्थाः प्रा
गायताः प्रदेशसंमिताः तिस्रस्तिस्रइतिघटाश्चिरवायज्ञियसकलमुद्दगग्रेनिधायस्थंडिलमद्भि
रभ्युक्ष्यशकलमाग्नेयांनिरस्यपाणिप्रक्षाल्यवोगमनस्मृभवेत्। ननस्तिजसेनासंभवेमृन्मयेनवा
पात्रयुग्मेनसंपुटीकृत्यसुवासिन्याश्रोत्रियागाराद्वागृहाद्वासमर्पितं धूममग्निमाहृत्यस्थंडिलादा
ग्नेय्यांनिधायक्रव्यादंशमनाग्नेयांशसुक्केनाग्निस्त्रिष्टुप्॥ अग्न्यावाहनेविनियोगः एह्यग्नहहोता
निषीदादब्धः सुपुरएताभवानः अवतांत्वारोदसीविश्वमिन्वेयजामहेसौमनसायदेवान्॥ इ
त्यक्षरैरावाह्यमाकादनेतरा कृत्सनमस्तव्याहृतीनांपरमेष्ठीप्रजापतिः प्रजापतिर्बृहतीअग्निप्रति
ष्ठापनेविनियोगः। ॐभूर्भुवःस्वरितिप्राञ्जलिमुखपाणिभ्यांप्रज्वलेरवासुनंतत्रकर्मस्वविहितमुमु
कनामकमग्निंप्रतिष्ठापयामीति अग्निंप्रतिष्ठाप्य॥ प्रोक्षितंधनेनाभिनिक्षिप्यवेद्यधमन्याप्रबोध्य
ध्यायेदेवं॥ चत्वारिशृंगेतिवामदेवोग्निस्त्रिष्टुप्॥ अग्निमूर्तिध्यानेविनियोगः। ॐचत्वारिशृंगात्रयो
अस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य। त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यां आविवेश॥ स्व
लिमंत्रं। सप्तहस्तश्चतुःशृंगःसप्तजिह्वोद्विशीर्षकः॥ त्रिपात्प्रसन्नवदनः सुखासीनः शुचिः॥

स्मृतः॥ स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा॥ बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवं। तोमरं मं
उत्तनं वामे च तथा ग्रं न धारयन्॥ मेषारूढं जटाबद्धं गौरवर्णं महौजसं। धूमध्वजं लोहिताक्षं स
प्तार्चिः सर्वकामदं। आत्माभिमुखमासीनं एवं रूपो हुताशनः॥ ततो यदि समिद्रा समारोपितोग्नि
स्तर्हि प्रत्यवरोहणं कार्यं॥ तत्रैवं॥ प्रत्यवरोह तस्माहिरण्यगर्भोग्निस्त्रिष्टुप् पूर्वाग्निप्रत्यवरोहणे विनि
योगः॥ ॐ प्रत्यवरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन्। प्रजां पुष्टिं रयिमस्मासु धेह्यथा
भव यजमानाय शं योरिति मंत्रेण समारोपिताग्निसमिधं स्थापिते ग्नौ होमं कार्यं। निरूपधारितहो
मे त्वनेतावत्। ततः पार्वणस्थालीपाके प्रधानदिनात्पूर्वदिने सद्यस्कालायां पौर्णमास्याम
शक्तौ वान्वाधानदिने वक्ष्यमाणरोपासनं कृत्वान्वाधानं कुर्यात्॥ तत्रेत्थं॥ आचम्य प्राणानायु
म्य। समिद्द्वयं वादाय देशकालौ स्मृत्वा ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं दर्शपूर्ण
मासाभ्यां स्थालीपाकाभ्यां यक्ष्ये। तत्रैदाग्नेपौर्णमासेन यक्ष्ये दर्शं तु ऐन्द्रं संकल्पितेन दर्शस्थालीपा
केन यक्ष्य इति विशेषः। तत्र देवतापरिग्रहार्थमन्वाधानं करिष्य इति संकल्प्य। समिन्नन्वाहिते
ग्नौ जातवेदसमग्निमिध्मेन प्रजापतिं चाघारदेवते आज्येन अग्निसोमौ चक्षुषी आज्येन अ ना०म० ५२

ग्निषोमौ च प्रधानदेवते चरुद्रव्येणेति विशेषः। आग्नेयेन॥ स्विष्टकृतमग्निमिध्मासन्नहतेन द्रव्यमया
समग्निं देवान् विष्णुमग्निं वायुं सूर्यं प्रजापतिं चैता आज्यद्रव्यदेवता॥ आज्येन विश्वान्देवान् संस्रावेण
यक्ष्ये। ज्ञाताज्ञातदोषनिर्हरणार्थं त्रिवारमग्निमरुद्भ्यामाज्येन यक्ष्ये॥ आ देवताः सर्वाः सन्निहिताः संतु
सांगोपांगेन कर्मणाहं यक्ष्ये। सद्यस्काले तु सद्यो यक्ष्ये इति संकल्पः॥ श्रीसमस्तव्याहृतिभिर्वा सि
मिद्धोमं कुर्यात्॥ आहुतिपक्षे आहुतीनामिदमाहिर्भवति॥ अन्वाधानसमिद्धोमे विनियोगः॥ ॐ भूर्भु
वः स्वः स्वाहेति प्रजापतय इदं न ममेति त्यागः॥ तं वाग्निं धारयेत्। संकटे तु तूष्णीमाद् इत्वाज्यं कृत्वा
समारोपयेत्। तद्यथा॥ तूष्णीं वा विद्धपोग्निर्गायत्री। कृत्वान्वाधानाग्नेः समारोपाधिकारार्थं प्रायश्चि
त्ताज्यहोमे विनियोगः॥ ॐ तृप्तमस्तु अग्निरस्तमविघ्नाः सुश्लिलकः इत्यकृ॥ अग्नेकामाय यमिदं॥ स्वा
हा। अग्नये इदं न ममेति॥ ततस्त्रिभिस्त्रिभिः कुशदलैः सव्यपाणिमध्ये दक्षिणं चोपरि कुर्वन्पूर्वदलो
ग्रे कृतरज्जुले मूलेस्य त्रिसंधिं द्विगुणां रज्जुं कृत्वा पुनर्दक्षिणमधः सव्यं चोपरि कुर्वन्। तथैव त्रिगु
णयेत्। तत्र दक्षिणं ग्रंथिं दद्यात्॥ एवं च पदत्रिसर्द्धलैरेकादशदुर्भवति॥ ततस्तस्या मुदगग्रायां
प्रादेशमात्रामनुष्टिपरिमितां दर्भाग्निधाय तया बर्हिर्दिवावेष्ट्य ग्रेण रज्जुमूलस्य हरावेष्ट

तस्याग्नेयं सर्वं वेष्टितरज्ज्वा अधस्तात्त्रिनीयपरिस्तरणाद्यर्थं दर्भैः सहाग्न्यायतनात् प्रक्षाल्य गोपरिनि
र्धमसेत्॥ ततोऽग्न्यायतनादुत्तरतो वृक्षतयोर्ज्वा उदगग्रपापालाङ्गलादिरक्षसंभवेशामीवेटादियज्ञियवृ
क्षमयमपमरत्निमात्रं वितस्तिमात्रं वा पंचदश काकरुकमिध्मं प्रागग्रसहृदावेष्टरज्जु मूलंसह
दावेष्य सर्वं वह्निरध्मम्॥ अत्रेध्माबर्हिषोर्बंधने केचिन्मंत्रान्विदंति॥ तत्र बर्हिषि इदंबर्हिरुपसन्नहन
प्रजाते ग्रंथिं व प्रातु सते मास्थादिति॥ इध्मे यत्वं यो रूपं कृत्वा प्राविशस्त्वं वनस्पतीन्॥ ततस्त्वा
पंचदशधा संभरामि सुसंभृता इति॥ एकविंशतिधे सत्रमपंचदशधेरहहेत अन्ये त्वनूनमाकुः॥ अ
परेतु मंत्रेणेच्छंति॥ ततः पत्न्या अग्न्यायतनाल्लंकरणं कुर्यात्॥ ततो दंपती गंधादिभिः स्वङ्कारेरे
अलंकृत्य तद्दिने कलहक्रयविक्रयप्रहासानृतवक्रभाषणवैर्यादि व्यसनपर्यंकशयनदंतधा ना.सं० ५३
वनकरंभकुलित्थकोद्रवचणकमसूरकृतान्नक्षारलवणकोरदूषकमधुमांसपरान्नो
पवासस्नेहलेपमैथुनानि वर्जयेतां॥ दधिघृतपयोमिश्रं हविष्यान्नं दिवैव सकृद्भुंजीयातां॥ श्राद्धकृ
त्श्राद्धशेषमशेषं घृतं भुंजीत॥ व्रतलोपे प्राप्ते सहसंवेशनेवा उपोष्य त्वमग्ने व्रतपा इत्याज्याहु
तिं जुहुयात्॥ त्वमग्नेदसस्यवस्तेश्विर्गायत्री॥ व्रतलोपजनितदोषपरिहारार्थं आज्यहोमे विनियो

गः॥ त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा॥ त्वं यज्ञेष्वीड्यः स्वाहा॥ व्रतपा अग्नय इदं न मम यद्वा निर्वापा
दि सर्वकर्म व्रतपाग्नये पार्वणस्थालीपाकेन समानतंत्रं चरुं प्रधानाहुतिं जुहुयात्॥ ततः प्रतिपदि
प्रातरौपासनं कृत्वाग्निं परिसमूह्य परिस्तरणीयात्॥ तद्यथा॥ अग्नेरष्टांगुलपरिमिते देशे ऐशा
नीदिशमारभ्य प्रदक्षिणं समंतात्स्फोरकेण पाणिना त्रिः परिमृज्य सर्वमुपरिनिहितदर्भैर्दशांगुलप
रिमिते देशे प्राग्भ्यादिषु परिस्तरणीयात्॥ तत्र प्राच्यां प्रतीच्यां चोदगग्रा दर्भाः॥ अवाच्यामुदीच्यां च प्राग
ग्रा दर्भाः॥ सर्वपश्चात्परिस्तरणमूलयोरुपरि दक्षिणपरिस्तरणं॥ उत्तरपरिस्तरणं तु तदग्रयोरुपरि द
क्षिणपरिस्तरणं उत्तरपरिस्तरणां तु तदग्रयोरधस्तात्॥ तेषु दर्भाग्रनिपतसंख्याः एकैकस्यां दिशि
चत्वारः षट्वा षोडशा वा॥ ततोऽग्नेर्दक्षिणतो ब्रह्मासनार्थं उत्तरतः पात्रासादनार्थं च प्राग
ग्रान् दर्भान् स्तृणीयात्॥ अग्नेरीशानेऽन्तस्त्रिरंभसा परिषिंच्य उत्तरास्तीर्णेषु दर्भेषु दक्षिणासव्य
पाणिभ्यां क्रमेण चरुस्थाली प्रोक्षणी दर्वी स्रुवौ प्रणीता भ्यां क्रमेण चरुस्थाली प्रोक्षणी दर्वी स्रुवौ
प्रणीता भ्यां क्रमेण चरुस्थाली प्रोक्षणी दर्वी स्रुवौ प्रणीताज्यपात्रे इध्मा बर्हिषि मुपर्युपरि कृत्वा जैन
मुन्नूरव जंसमूलं चैतिदे उदगपवर्गं प्राक्संस्थं चैवमुखान्यासादयेत्॥ आज्यमात्र होमे तु प्रोक्षणी

स्रुवेणाज्यस्थाल्याज्यपात्रे दध्याद्बर्हिषा वेसेतावन्नामेवासादनं। ततः प्रोक्षणीपात्रमुत्तानं कृत्वा तत्राभं
तत्राभं तत्रगीर्णि तस्याग्रमेकुसमस्तं ल आदेशमात्रं कृत्वा पयस्पेपवित्रे निधाय स्रुवाज्ञिरद्भिस्तत्पात्रं
पूरयित्वा गंधपुष्पादिक्षिप्त्वा हस्तयोरंगुष्ठोपकनिष्ठिकाभ्यामुदगग्रे पृथक् पवित्रे धृत्वा अपः पस्ति
रुत्पूयपात्राण्युत्तानानि कृत्वा दध्यांच विस्तस्य सर्वाणि पात्राणि त्रिः प्रोक्षेत्॥ उत्तानेनैव तु हस्ते
न कर्तव्यं प्रोक्षणं भवेत्॥ अर्वाचीनेन हस्तेन कर्तव्यं स्याद्भिक्षणं॥ मुष्टिं कृत्वा तु यत्तोयमभ्युक्षण
मिति स्मृतं॥ ता आपः किंचित्कमंडलौ क्षिपेदिति के। ततो यथोक्तलक्षणमाज्ञानदिग्व्यवस्थितं
ब्रह्माणमस्मिन्कर्मणि ब्रह्मा भवत्वा त्वं वृणु इति तस्मिन्नागते हील्ला वृणुयात्॥ ततो ब्रह्मा वृतोऽस्मि
त्युक्त्वा आउच्चरीयज्ञोपवीती आचम्य समस्तपाणिपुत्रुष्टौ भूत्वाग्नेर्मार्गिपरिस्व दक्षिणतउदङ्मुखः
स्थित्वा अग्नेः समार्थदर्भेषु रक्षिणभागस्थमेकं दर्भमंगुष्ठानामिकाभ्यां गृहीत्वा निरस्तः परावसु
रिति नैऋत्यां निरस्यापः स्पृष्ट्वा इदमहमर्वावसोः सदने सीदामि स्मृत्वा तेरदङ्मुखस्तत्वब्राह्मणोरुपरिद
क्षिणांपादं संस्थाप्योपविश्य गंधाक्षतादिभिरर्चितः सन्॥ बृहस्पतिर्ब्रह्म ब्रह्मसदन आशिष्यते॥
बृहस्पते यज्ञं गोपाय स यज्ञं पाहि। स यज्ञपतिं पाहि। समां पाहि इति जपित्वा सदा यत्तमनाएवर्वर्तेत

ना०प्र० ५४

ततो यजमानः प्रणीतापात्रमग्नेः प्रत्यक् निधाय तत्र पवित्रे निधायोत्सत्ताहिरद्भिस्तत्पात्रं पूरयित्वा गं
धपुष्पाक्षतान् क्षिप्त्वा पुरस्तान्नैऋत्वा लोदर्भेषु निधाय पवित्रे गृहीत्वाऽमैर्दर्भैराच्छादयेत्। ततः प्रस्य ग
ग्नेः कुशेषु शूर्पं निधाय तत्र प्रागग्रे पवित्रे निधायाग्नये त्वा जुष्टं निर्वपामीति मंत्रावृत्त्या व्रीहिमुष्टीं वाय
वाचा चतुरो मुष्टीन्निरूप्य अग्नीषोमाभ्यां त्वा जुष्टं निर्वपामीति। तथैव निरूप्यते। पवित्रे व्रीहिणामु
परि निधायोत्पूतास्विरद्भिः अग्नये त्वा जुष्टं प्रोक्षामीति निर्वापसंख्यया सकृत्तानिरद्भिः प्रोक्षेत्॥ एवमग्नी
षोमाभ्यां त्वा जुष्टं प्रोक्षामीति तथैव प्रोक्षेत्। दर्शे तु अग्नये पोमसद्वा ने इंद्राग्नीभ्यां त्वेत्यादि विनिर्वापप्रो
क्षणेष्वविशेषः॥ एवं नाममंत्रकहोमे निर्वापः प्रोक्षणं च यथाप्रधानं दैवतं देवतानामग्रहणेन का
र्यं। समंत्रकहोमे तूष्णीं च वणाकर्मदीनि तूष्णीं चतुर स्वतुरो मुष्टीन्निरूप्य प्रोक्षेत्॥ ततः पात्राणामुत्तर
तः प्राग्ग्रीवमास्तीर्य उ धृतकृष्णाजिनेनैरुते उलूखलेमुसलेन पत्नी वहन्त्यत्रिः स्रुकं कुर्या
त्॥ तांस्त्रिः क्षालितान् पृथक्पात्रे एकपात्रे वा अविदग्धमनवश्रावितमंतरूष्मपकं सशृतं चरुं प
चेत्॥ ततः पवित्रे आज्यपात्रे निधाय तत्राज्यं पुरतः संस्थाप्याग्निशिरोऽग्न्यमासिप्त्याग्नेरुत्तरतः स्रु
वाग्रे नासहायरुरुदकपरिस्तरणाद्बहिर्निरूह्य आसेत्तु आज्यपात्रमधिश्रित्य ज्वलतांग

स्रुकेनावकाशां गुष्ठपर्वमात्रं प्रक्षालितं दर्भाग्रद्वयमाज्ये प्रक्षिप्य पुनर्ज्वलता तेनैव दर्भोल्मु
केन वरुणासहाउपात्रं पर्यग्निकृत्वा तदुल्मुकमपास्याप: स्पृष्ट्वाऽउपात्रं स्रुविकर्षन्निवोदगुद्वा
सांगारान्नयो प्रत्यस्याप: स्पृष्ट्वा तत्रस्थमेवाज्यं सवितुष्ट्वाहिरण्यस्तूप: सविता पुरउष्णिक् । आ
ज्यस्योत्पवने विनियोग: सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसो: सूर्यस्य रश्मिभि
रिति मंत्रेण कुशैर्मोऽङ्गारि तेनैकं वारं द्विस्तूष्णीमुत्तानपाणिद्वयांगुष्ठोपकनिष्ठिकाभ्यां मंत्रयो
रंसस्पृष्टाग्रहिताभ्यामुदगग्राभ्यां पवित्राभ्यां प्रागुत्पूय तेपवित्रे अद्भि: प्रोक्ष्याग्नौ प्रहरेत् तूष्णीं स्कंदाय
स्वाहेति मंत्रेणेति केचित् ॥ अथाग्ने: परिस्तरणाद्बहिरग्नेर्भुवं प्रोक्ष्य तत्र । बर्हिसन्नहनीरज्जु
मुदगग्रां प्रासार्य तस्यां बर्हि: प्रागग्रमुदगपवर्गमविरलमास्तीर्य तस्मिन्नाज्यपात्रं निधाय स्रु
वादि संमार्जयेत् ॥ तद्यथा ॥ दक्षिणेन हस्तेन स्रुवं गृहीत्वा सव्येन कांश्चिद्दर्भानादाय सहै
वाग्नौ प्रताप्य स्रुवं निधाय दक्षिणेन हस्तेन स्रुवस्य बिलं दर्भाग्रै: प्रागादि प्रागपवर्गं त्रि: संमृज्या
धस्ताद्दर्भाग्रैर्बाह्यतो बिलपृष्ठं त्रि: संमृज्य ततो दर्भमूलैर्दंडस्याधस्तान्मूलपृष्ठादा
रभ्य यावदुपरिष्टाद्बिलं तावत्त्रि: संमृज्याद्भि: प्रोक्ष्य स्रुवं निष्टप्याज्यस्थाल्या उत्तरत: स्रुकुदृ ना०प्र० ५५

र्दं निधायोदकं स्पृष्ट्वा तैरेव दर्भै: जुहूं चैवमेव संमृज्य स्रुवादुत्तरतो निधाय दर्भानद्भि: क्षाल्य प्रक्षिप्याः
ग्नावनुप्रहरेत् ॥ तत: शृतं चरुं स्रुवं गृहीत्वा तेनाज्येनाभिघार्योदगुद्वास्य तोत्रिस्त्रिष्टुप् अग्निर्ऋचने विनियो
ग: ॥ उद्बुध्यस्वाग्ने प्रतिजागृहि जातवेद: सिंधुं न नावा दुरिताति पर्षि ॥ अग्ने अत्रिवन्नमसा गृणानोऽस्माकं
बोध्यविता तनूनाम् ॥ यस्त्वा हृदा कीरिणा मन्यमान: अमर्त्यं मर्त्यो जोहवीमि ॥ जातवेदो यशो अस्मासु
धेहि प्रजाभिरग्ने अमृतत्वमश्याम् ॥ ततश्चात्मानं चालंकृत्य हस्तं प्रक्षाल्य दर्भबंधनरज्जुमिध्मस्थाने
निधाय पाणिनेध्ममादाय मूलं वामस्कंधे ॥ ततश्चात्मानं चालंकृत्य हस्तं प्रक्षाल्य दर्भबंधनरज्जुमि
ध्मस्थाने मूलमध्याग्रेषु स्रुवेण त्रिरभिघार्य मूलमध्ययोर्मध्यभागे गृहीत्वा अयं त इध्म आत्मा जात
वेदस्त्रिष्टुप् इध्माहवने विनियोग: ॥ अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्ध वर्धय
चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहेति इध्ममग्नावाधाय जातवेदसेऽग्नये
इदं न ममेति त्यजेत् ॥ तत: स्रुवेणाज्यमादायाग्नेरायतनस्य वायव्यकोणमारभ्याग्नेयकोणप
र्यंतं प्रजापतये इति मनसा ध्यायन् स्वाहेत्युच्चार्याग्नेरुत्तरार्धपूर्वार्धे ऋजुं संततां धारां जुहुयात्
पुनराज्यमादायाग्नेर्नैर्ऋत्यकोणात: ईशानीपर्यंतं तथैव ... स्रुवेणाज्यमा

इदमग्नये स्वाहेति सव्ये हुत्वा स्वार्थे पूर्वभागे कृत्वा पुनरप्यंसे सोमाय स्वाहेत्यग्नेर्दक्षिणपार्श्वे तु समम दे
शे कृत्वा सर्वं निहितपात्रे च समुद्धृत्य स्रुचि त्वं इदमग्नये इदमग्नीषोमाभ्यामिति च कृत्वा गन्धय
मुन्नरसंस्कृममभिघृत्य पावदानधानधर्मेण जुहुयात् ॥ एवं नाममंत्रकं होमेष्वया देवतं विना कस्य
चोरतिमर्दः ॥ समंत्रकहोमे तु विभागो नाभिमन्त्रणं ॥ अथावदानधर्मः स्रुवेण वेणाज्ये त्वामा
ज्यमुपस्तीर्य प्रथमप्रधानदेवताभ्यः स्रुवभागमध्यादंगुष्ठपर्वमात्रं तिरश्चीनाभिरंगुष्ठेन मध्य
मानामिकाभिरु दगग्राभिर्नवसंस्थ द्वितीयमिक पूर्वं नवदीयदर्वामोप्य तत्स्थ रुचिवं भागं प्रागग्रामि
स्तानिस्तथैवावदायदर्वामोप्य पात्रस्थं हविरभिघार्य दर्वीस्थमवत्तं चाभिघार्य विधूमज्वाल
ऽग्नौ अग्नये स्वाहेत्याज्यभागयोर्मध्ये पूर्वेऽवत्तव्यसंदेशादवत्तावा दद्यान्निवदर्वापार्श्वेन कृत्वा अ
ग्नये इदं न ममेति सर्वत्र ॥ पुनः सर्ववदुत्तरभागादवदाय तु अग्नीषोमाभ्यां स्वाहेति इत्थं वा कृत्वा
प्राग्भागे कृत्वा अग्नीषोमाभ्यामिदं न ममेति सज्जेत् ॥ पंचावत्तानां तु दर्वामुपस्तीर्य मध्यात्पूर्वार्धात्
पश्चार्धाच्चेति हविषो वदायाभिघार्य जुहुयात् ॥ पंचावत्तिनस्तु जामदग्न्या वत्सा विदा वा ष्टीषेणा
स्तथैव च ॥ भार्गवा च्यवना आत्रेयाः पंचावत्तिनः स्मृताः ॥ इत्येतेऽग्नीषोमस्थाने इन्द्राग्नीभ्यामिदं न

ममेति विशेषः ॥ पुनर्दर्वामुपस्तीर्य प्रथमहविर्भागस्योत्तरार्धात् सर्ववदानतो भूयोऽनन्तरानामि
देवांगुलीभिरवदायदर्वामोप्य द्वितीयहविर्भागस्यात्तथैवावदाय पंचावत्तिनस्तु हविर्भागपूर्वेऽपि पुनः
राहपूर्वार्धाच्छादिरवदाय पात्रस्थमनभिघार्य वित्तं द्विरभिघार्य यदस्येति हिरण्यगर्भोऽग्निरत्रि
धृतिः ॥ स्विष्टकृद्धोमविनियोगः ॥ ॐ यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरं ॥ अग्निष्टत्स्विष्टकृ
द्विद्वान्सर्वं स्विष्टं सुहुतं करोतु मे ॥ अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्धयित्रे सर्वान्नः कामान्त्समर्धय स्वाहा ॥ इति मंत्रेण उत्तरार्धपूर्वार्धे जुहुयात् ॥ अग्नये स्विष्टकृतेऽमुना जुहुयात् स्विष्टकृते इदं न ममेति त्यागः
। ततोऽग्नेरुत्तरतः स्थित्वा मिश्रं बन्धनरज्जुं विस्रस्य रुद्राय स्वाहेति कृत्वा जपेत् शास्त्रवेणप्राय
श्चित्ताहुतीः समस्तं जुहुयात् ॥ तत्र मंत्राः अयाश्चेति विमदो याज्ञ्यः पंक्तिः प्रायश्चित्ते इयाहुतिहोमे
विनियोगः ॥ ॐ अयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्यमित्त्वमया असि अया नो यज्ञं वहास्यया नो धेहि भेषजं स्वाहेत्येका
हव्यमूहिषे या नो धेहि भेषजं स्वाहेत्येकाहुतिं जुहुयात् ॥ अयसे अग्नये इदं न मम ॥ अतो देवे
ति द्वयोर्मेधातिथिर्देवा गायत्री ॥ प्रायश्चित्ताहुतियोगः सर्वत्र प्राग्वत् ॥ ॐ अतो देवा अवन्तु नो यतो
विष्णुर्विचक्रमे ॥ पृथिव्याः सप्त धामभिः स्वाहा देवेभ्य इदं न मम इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं
समूढमस्य पांसुरे स्वाहा विष्णव इदं न मम ॥ व्यस्तसमस्तव्याहृतीनां विश्वामित्रजमदग्निभर

ह्मानप्रजापतयोऋषयः। अग्निवायुसूर्यप्रजापतयोदेवताः गायत्र्युष्णिगनुष्टुब्बृहत्यः छंदांसि
भूः स्वाहा अग्नयइदं नमम॥ भुवः स्वाहा वायवइदं नमम। स्वः स्वाहा सूर्यायइदं नमम। भू
र्भुवः स्वः स्वाहा प्रजापतयइदं नमम। ततो ब्रह्मा लोकत्रयं परिसाग्रे वायव्यदेशे तिष्ठन्नेताए
वस्ता उपांशु तो जुहुयात्॥ सांगयजमानोत्र कुर्यात्। ततस्तत्रस्थो ब्रह्मैव मंत्रविपर्यासादि
निमित्तेसति॥ यद्वोदेवा अभिवपामरुतस्त्रिष्टुप्। मंत्रविपर्यासादिनिमित्तेसति॥ यद्वोदेवा
अतिपामरुतस्त्रिष्टुप्मंत्रविपर्यासादिनिमित्तेकप्रायश्चित्ताज्यहोमेविनियोगः। यद्वोदे
वा अतिपातयानि वाचा च प्रयुती देवहेडनं। अरायो अस्मां अभिदुच्छुनायतेन्यत्रास्मिन्म
रुतान्निधेतन स्वाहा यजमानः मरुद्भ्य इदं नमम॥ अनाज्ञातमितिमंत्रद्वयस्य हिरण्यगर्भो ना०अं० ५१
ग्निरनुष्टुप्। ज्ञाताज्ञातदोषनिबर्हणार्थं प्रायश्चित्ताज्यहोमेविनियोगः। अनाज्ञातंयदाज्ञातं
यज्ञस्यक्रियतेमिथु॥ अग्नेतदस्यकल्पयत्वंहिवेत्थयथातथं स्वाहा यजमानः अग्नयइदं नम
म। पुरुषसंमितोयज्ञोयज्ञः पुरुषसम्मितः। अग्नेतदस्यकल्पयत्वंहिवेत्थयथातथं स्वाहा। यज
मानः अग्नयइदं नमम। यत्पाकत्रेत्यस्याग्निस्त्रिष्टुप्। प्राय० होम० यत्पाकत्रामनसादी

नदक्षा यज्ञस्य मन्वते मर्त्यासः। अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवान् ऋतुशो यजाति स्वाहा। प्रा
०यो०। यजमानः अग्नयइदं नमम। स्कन्नमिन्द्राद्यनिपतननिमित्तेसति वक्ष्यमाणप्रकारेण तत्प्रति
पदोक्तजपहोमान्कुर्यात्। ब्राह्मणो वा यजमानमेवैतान्। प्रायश्चित्तादीन् कृत्वा ऽन्यस्मिन्नेव वरं द
द्यात्। ततो यजमानः सर्वकर्मप्रहरणीमद्भिरदांशर्णाकृतिं जुहुयात्। तद्यथा स्रुवेणाऽपगृह्य त्वा
स्रुवं समबिलां पूरयित्वा तस्यां स्रुवमूर्ध्वबिलं निक्षिप्य स्रुवाग्रे कुसुमाक्षतं निधाय सव्यपाणिना स्रु
करस्थं वेम्मूले धृत्वा दक्षिणपाणिना स्रुवं ग्रामसमुद्यागृहीत्वा तिष्ठन् सम्प्रसार्य जुह्वायः स्रुवाग्रेम स्वहृदि
ः प्रसन्नो भासमुद्रादूर्मिरित्येकादशर्चस्य सूक्तस्य वामदेव ऋषिः अग्निस्त्रिष्टुप् अन्त्या जगती पूर्णाहुतौ विनि
योगः समुद्रादूर्मिरित्यादि मधुमन्तं तऊर्मिं स्वाहेति पठन्॥ एवं परिमित धारां ततां स्रुवाग्रेण सरो
षं कृत्वा अग्नयइदं नमम। अस्तु हिरण्यपस्त्वा विश्वज्योतिषे सस्य तो नगे ऋषिरग्निस्त्रिष्टुप्। विश्वज्योतिषा हुतता भा
सग्निराविविश्वानि कृणुते महित्वा मा देवो मार्त्यसहते रेवाः। ४।५८। ततो सेविविश्वे इदं
नेन स्वतं देवा वाग्निं कृत्वा अग्नयइदं नमम इति संकल्पे विश्वेभ्यो देवेभ्यः स्वाहेति संस्रावं कृत्वा
विश्वेभ्यो देवेभ्य इदं नमम॥ पूर्णाहुतिमंत्रस्तु नवग्रहप्रकरणे लिखितः॥ ततस्तु लकर्णान्स

मिदं मंत्रकलशमद्भिः प्रोक्षणीभिः प्रहरेत् । मार्जनकलशाद्वा तदभावे तं समूलं जपयोगपारिजातकारेण लिखि
तमपि रुद्रानां शिष्टाननुकुर्वंति ॥ अथावभृथस्थालीयपूर्णपात्रजलेन मार्जनं कुर्यात् ॥ तद्यथा ॥ प्र
यमादितं पूर्णपात्रमास्तीर्णे बर्हिषि दक्षिणपाणिना निधाय तत्र गंगादिपुण्यनदीः स्मरन् दक्षिण
पाणिनास्पृशन् ॥ पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः सदसि सन्मे भूयाः अक्षितिर
सि मा मे क्षेष्ठा इति जपित्वा कुशाग्रैः प्राच्यादिषु च दिक्षु जलं मंत्रैर्यथालिंगं सिंचेत् ॥ ते च मंत्राः प्रा
च्यां दिशि देवा ऋत्विजो मार्जयंतां ॥ उदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयंतां ॥ ऊर्ध्वायां
दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयतामिति ॥ एकया अपवन अदिशं असि त्वा कुशाग्रैः स्वशिरसि
मार्जयेत् ॥ तत्र मंत्राः ॥ आपो अस्मानिति सस्य देवश्रवा आपस्त्रिष्टुप् मार्जने विनियोगः ॥ आपो अ
स्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु ॥ विश्वं हि रिप्रं प्रवहंति देवीरुदिदाभ्यः शुचिरा पू
त एमि ॥ इदमाप इति सिंधुद्वीप आपो अनुष्टुप् मार्जने विनियोगः ॥ इदमापः प्रवहत यत्किं च दुरितं म
यि । यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं ॥ सुमित्रिया न आप ओषधयः संतु इति मंत्रेणां
जलिना जलं कृत्वा दुर्मित्रियास्तस्मै संतु योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तं हन्मा इति निर्ऋतिदिशोऽगुष्ठाग्रैः

का०प्र० ५८

रमः सिंचेत् । ततो ब्रह्मा यजमानवामपार्श्वस्थितपत्न्यं जलौ पूर्णमीपात्रस्थं जलं ॥ भूमाहं प्रजां पशुसिं
चंयानः सपावरिस्तु नः समुद्रे वो निनयानि ॥ स्वं पाथो अप्येपादिमं मंत्रमेकं ऋक्स्यापत्न्या वाचयन् ॥ स्वयं वा
पात्रस्थं सर्वं निषिंचति अंजलिस्थजलैः पापनोदार्थमात्मानं यजमानं पत्नीं च प्रोक्षयेत् ॥ पत्नी तज्जलं बर्हि
षि निषिंचेत् ॥ अथवा यजमान एव स्ववामपाणौ पूर्णाने बर्हिर्निधाय तत्र दक्षिणपाणिना पूर्णपात्रमा
दाय माहं प्रजामित्यनेन तत्र जलं प्रस्थं सर्वं निषिंचेत् ॥ ... समुद्रं गच्छंतात्ति धृत्वा पाणिस्थज
लैरात्मानं पत्नीं च प्रोक्षयेत् ॥ ततः कर्ता अग्निमग्रे वयि कोष्ठितः संस्थाजपेनोपतिष्ठेत् ॥ तद्यथा ॥ अ
ग्ने त्वं न इति चतसृणां गोपायनो लोपायना वा बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुश्चैकर्चाग्नि
र्द्विपदा विराट्छंदः अग्न्युपस्थाने विनियोगः ॥ अग्ने त्वं नो अंतम उत त्राता
शिवो भवा वरूथ्यः । वसुरग्निर्वसेन्मायनूनमीमहे सखिभ्यः ॥ पुंच मे स्वरश्च मे यज्ञोप च ते नमश्च
। यत्ते न्यूनं तस्मै त उप यत्तेऽतिरिक्तं तस्मै ते नमः । अग्नये नमः । स्वस्ति श्रद्धां मेधां यशः प्रज्ञां
विद्यां बुद्धिं श्रियं बलं आयुष्यं तेज आरोग्यं देहि मे हव्यवाहनोन्नमो नमः ॥ ततो ब्रह्मापि तत्रैव स्थि
त्वा एतैरेवोपतिष्ठेत् ॥ ततः कर्त्राचारात् ॥ मानस्तोके कुशो रुद्रो० जगती विभूतिग्रहणे वि

नियोगः॥ ॐ मानस्तोके इत्यवामहे इति स्रुवबिल्वपृष्ठेन विभूतिं गृहीत्वा ॐ त्र्यायुषं जमदग्नेरिति ललाटे । कश्यपस्य त्र्यायुषमिति कंठे । अगस्त्यस्य त्र्यायुषमिति नाभौ । यद्देवानां त्र्यायुषमिति दक्षिणस्कंधे ॥ तन्नो अस्तु त्र्यायुषमिति वामस्कंधे । शतायुषमिति शिरसि धारयेत् । केचन उपस्थानात्पूर्वं विभूतिग्रहणमाहुः । ततः कर्त्रा परिस्तरणानि विसृज्याग्निं परिसमुह्य परिषिच्य विश्वानि न इत्यर्चयित्वा नत्वा च पुष्पादि । पिष्टं लं कृसरं नैवेद्यं तांबूलं च निवेद्य ब्राह्मणेभ्यो यथोक्तदक्षिणां दद्यात् । दक्षिणाभावे तु तद्योग्यं घृतादि सहिरण्यं दत्वा ब्राह्मणाभावे स्वस्मै ब्राह्मणाय यद्दत्वा पात्राणि प्रक्षाल्य सर्वकर्म [illegible] यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं । इति विष्णुं नत्वा आचम्य धृतपवित्रग्रंथिं विस्रस्य सन्मुखदेशे क्षिपेत् । दर्शे पुत्रेऽग्निषोमस्थाने इंद्राग्नी इत्यस्य सर्वं समानं ॥ तच्च दर्शितमेव । सद्यस्कालायां पौर्णमास्यामग्नीषोमयागादिनरव प्रातर्होमानंतरमन्वाधायेध्मं दर्शपौर्णमासतंत्रेणेष्टिप्रयोगं कुर्यात्॥ ॥ इति श्रीविद्वन्मुकुटरत्नश्रीमद्रामेश्वरसूरिसूनुनारायणभट्टविरचिते प्रयोगरत्ने पार्वणस्थालीपाकप्रयोगः समाप्तः॥ ॥ अथेष्टिप्रायश्चित्तानि॥ प्रमादादग्न्यन्वाधाने तदग्नौ

ना०भ०

५८

अग्नौ यजेत चेत्तदा प्रायश्चित्तं पथिकृच्चरुहोमं कृत्वा पुनस्तत्तिथ्यादितिथिषु अन्वाधानकर्मपूर्वकमिष्टिं कुर्यात्॥ अथातिपन्नेष्टिप्रयोगः॥ अन्वाधानात्पूर्वं स्त्री रजस्वला चेद्भवति तदा पंचमदिवसे सद्यस्कालान्वाधानपूर्वकं कुर्यात् । अन्वाधानानंतरं तो रजस्वला चेत्तां गृहीत्वेरस्थापयित्वा प्रतिपद्येव कुर्यात्॥ अन्वाधानात्परतो रजस्वला चेत्तां गृहीत्वेरस्थापयित्वा प्रतिपद्येव कुर्यात् । सूतकादिना इष्टिलोपे चेदागामिपर्वद्वितीयां चतुर्थीं नवमीं चतुर्दशीं च विहायान्यासु तिथिष्वतिपन्नेष्टिं कुर्यात्॥ तस्याप्यतिक्रमे अनंतरे पर्वणि पथिकृद्यागपूर्वकमतिपन्नयागं कृत्वा तत्पर्वण्यन्वाधानं कुर्यात्॥ तत्रातिक्रमे अतिपन्नस्य पादकृच्छ्रं प्रायश्चित्तं कृत्वा कालात्प्राप्तां प्रतिपदिष्टिं सद्यस्कालान्वाधानपूर्वकं कुर्यात्॥ द्वितीयपर्वातिक्रमे सर्वं वैश्वानरमिति पर्वमध्ये कुर्यात्॥ तत्राप्यतिक्रमे तत्सर्वैर्लिं पथिकृत्सर्वं कार्यं॥ पथिकृदिष्टिं स्वतंत्रां प्राकृतपूर्वं स्यात्समानतंत्रां वा कुर्यात् । तस्याप्यतिक्रमे तृतीयप्रतिपदि अतिपन्नप्रायश्चित्तरूपं कृच्छ्रं चरित्वा प्राप्तकालामिष्टिं कुर्यात्॥ तस्याप्यतिक्रमे आगामिपर्वपर्यंतं सर्वं क्रतुवत्कुर्यात्॥ तत्राप्यतिक्रमे स्मार्तोऽग्निर्नश्यति । तेन विधिना पुनः संधानं कृत्वा प्राप्तपर्वणि तदिष्टिं कुर्यात्॥ अन्वाधाने इष्टिमध्ये वा दर्शग्रहणं चेदिष्टिदिने हविर

सादनांतं कृत्वा अन्वाधाने ष्टिमध्ये चंद्रग्रहणदोषप्रायश्चित्तार्थमाज्यहोमं करिष्य इति संकल्प्य । नवोनवो
भवति तस्य सूर्या सावित्री चंद्रमास्त्रिष्टुप् अन्वाधाने ष्टिमध्ये चंद्रग्रहणदोषपरिहारार्थं प्रायश्चित्ता
ज्यहोमे विनियोगः ॥ ॐ नमो नमो भगवते जायमानो ऽक्रो केतुरुषसामेत्यग्रं भागं देवेभ्यो विदधा
त्यायन्त्रचंद्रमास्तिरते दीर्घमायुः ॥ ॐ यमादित्या अंशुमाप्याययंति यमक्षितमक्षितयः पि
बंति । तेन नो राजा वरुणो बृहस्पतिराप्याययंतु भुवनस्य गोपाः ॥ अत्रांत्येन कृतान्येनेवा कृतां कृ
त्वा अग्न्यलंकरणादि तंत्रं कुर्यात् ॥ सूर्यग्रहणे चेद्धविरासादनांते निरस्तं … कृतमेतयः … ॥ चि
त्रं देवानामित्यस्यांगिरसः कुत्सस्त्रिष्टुप् ॥ अन्वाधाने ष्टिमध्ये सूर्यग्रहणदोषपरिहारार्थं प्राय
श्चित्ताज्यहोमे विनियोगः ॥ ॐ चित्रं देवानामित्येका ० उदु त्यं जातवेदसमित्यस्य प्रस्कण्वः प्रस्क
ण्वः सूर्यो गायत्री ॥ अन्वाधाने ष्टिमध्ये सूर्यग्रहणदोषपरिहारार्थं प्रायश्चित्ताज्यहोमे विनियो
गः ॥ उदु त्यमिति द्वितीया ॥ उद्वयमित्यस्य प्रस्कण्वः सूर्योनुष्टुप् विनियोगः पूर्ववत् ॥ उद्वयं तमस
स्परीति तृतीया । एतेः कृत्वा अग्न्यलंकरणादितंत्रशेषं समापयेत् ॥ इदं प्रयोगपारिजाते स
ग्रहे ऽक्रं प्रायश्चित्तं ॥ ग्रंथांतरे तु शौनकोक्तमुक्तं तद्यथा । इष्टिदिने हविरासादनांते ऽन्वा ना०प्र० ६०

धाने ष्टिमध्ये चंद्रग्रहणजनितवैगुण्यपरिहारार्थं शौनकोक्तामाज्याहुतिमुपस्थानं च करिष्य इति
संकल्प्य ॥ अत्राह गोरित्यस्य राहूगणो गोतम ऋषिः चंद्रमा गायत्री । इष्टिमध्ये चंद्रग्रहणवैगुण्यपरिहा
रार्थमाज्यहोमे विनियोगः ॥ ॐ अत्राह गोरमन्वत नाम त्वष्टुरपीच्यं इत्था चंद्रमसो गृहे स्वाहा चंद्र
मसो गृहे स्वाहा चंद्रमसे इदं न मम नवो नवो नवो इत्यस्य सूर्यासावित्री चंद्रमास्त्रिष्टुप् ॥ चंद्रोपस्था
ने विनियोगः ॥ ॐ नवो । नवो भवति इत्येका अथ सूर्यग्रहे तु संकल्पादौ चंद्रपदस्थाने सूर्यपदं प्रयो
ज्यं ॥ उद्वयमित्यस्य प्रस्कण्वः प्रस्कण्वः सूर्योनुष्टुप् ॥ ॐ उद्वयं तमसः स्वाहा सूर्यायेदं न मम ॥ चि
त्रमित्यस्य कुत्सः सूर्यस्त्रिष्टुप् सूर्योपस्थाने विनियोगः ॥ ॐ चित्रं देवानां इतीष्टिमध्ये ग्रहणे निर्णय
॥ अन्वाधाने ष्टिमध्ये अग्निर्नुगतो ॥ अयाश्चेति मंत्रेण वक्ष्यमाणवसुनः संधानं कृत्वा ॥ ॐ भूर्भुवः
स्वः स्वाहेति मंत्रेण संकल्पपूर्वकं प्रायश्चित्तं संस्कृताग्नेन कृत्वा पुनरन्वाधानपूर्वकमिष्टिं कुर्या
त् ॥ अन्वाधाने ष्टिमध्ये प्रयाणोपस्थितं तु भ्यंता अंगिरस्तमेति संकल्पपूर्वकं संस्कृताग्निं कृत्वा
पूर्वस्या विधिसमारोप्य महेमकाले प्रतिष्ठाप्य प्रातर्होमपूर्वकमिष्टिं कुर्यात् ॥ तुभ्यं ता अंगिरस्त
म विश्वाः सुक्षितयः पृथक् अग्ने कामाय येमिरे । इति अकृतान्वाधानस्य प्रतिपदि प्रमादादिष्य

करणेतत्तीयादित्रितयिषु प्रात्वेपासनोत्तरंसंकल्पपूर्वकंसंस्कृताग्नमलसमस्तमाहुतिभिर्हुत्वापुन
स्त्वाधायपयागंकुर्यात्॥ अथप्रसंगादत्रैवनैमित्तिकप्रायश्चित्तान्युच्यन्ते॥ शम्यापरिमितदेशादूर्ध्वंकि
वहिरतनाहुतस्त्वेदग्निः सप्रायश्चित्तंसमाप्तिपर्यंतंतिष्ठतियोगपस्तदा॥ इदंतएकंपरउतएकं॥ इ
तायेनज्योतिषासंविशस्व॥ संवेशनेतन्वाचारुरेधिप्रियोदेवानांपरमेजनित्रे॥ इतिमंत्रेणायतनेप्र
क्षिप्याहुतिभिराज्याहुतिंजुहुयात्॥ अत्रकारिका॥ अथवक्रि शम्यापरास्तात्तुवहिरायतनाद्गत
॥ प्रायश्चित्तसमाप्ततंसमर्थोज्ञीवितंयदि॥ इदंतइत्यृचानस्पृष्टानेनाग्निंप्रक्षिपेत्पुनः॥ आज्याहुति
स्कन्नुहुयाच्चाहुत्यारमेघ्यपूर्ववत्॥ शम्यापरान्निर्दात्स्युलेसमस्तेन॥ शम्यापरिमितदेशादिरायत
नाद्गतेगोपथिकृतेग्नयेचरुंनिर्वपेत्॥ अग्नौक्षेपादूनागृहीतेनाज्येनस्तुचसंस्रवयित्वा॥ अग्नयेपथि
कृतेस्वाहेतिस्रुवाहुतिंजुहुयात्॥ स्रुवाहुतिंवातदकंकारिकायां॥ अतिक्रान्तेपदाशम्यापरास्त ना॰भ॰
मनलोभवेत्॥ चरुःपथिकृतेकार्यः स्रुवाहुतिरथापिवा॥ पूर्णाहुतिलक्षणंकारिकायामुक्तं॥ आ ६९
हारनाकृतस्त्वगृहीत्वाप्रस्वयेत्स्रुचं॥ तथाचाज्याहुतिःकार्यासास्रुवाहुतिरिमिष्यते॥ स्रुवस्रुर्णा
तिर्यास्याद्विसैकेयाज्ञिकाविदुः॥ यद्यग्निःस्वयंज्वलतितदाउद्दीप्यस्वजातेवेदोपदग्निक्रान्तिमम॥ प

मुक्तमसमावहजातवेदश्चादिग्धोदृशा॥ मानोहिंसीज्जातवेदोगामश्वंपुरुषंजगत्॥ अविभ्रदग्नआगहिश्रि
यामापरिपातय॥ इतिमंत्राभ्यांसमिद्वयमग्नावादध्यात्॥ अग्नेस्थमलमुत्राद्युपघातेपुनस्तेतनयासमि
त्॥ हूयमानाहुतिर्यदिवहिःस्यांदेतदादेवाञ्जनमिसंनेनतामभिमृशेत्॥ स्कन्नमंकदेसाज्याहुतिंजुहु
याहुतिभिग्नतत्ःस्कन्नमनलेक्षिपेत्॥ मंत्रोच॥ देवांजनमगन्यज्ञस्तस्यमाशीर्विदुवर्द्धतां॥ भूतिघृत
नमुंच॥ तुयाज्ञोयज्ञपतिंमहसं॥ भूपतयेस्वाहा॥ भुवनपतयेस्वाहा॥ भूतानांपतयेस्वाहा॥ यज्ञस्यत्वाप्र
मयोन्मया प्रतिमया॥ इमग्नयस्कं दप्रथमा॥ अनुद्युतिमंत्रयोनिमनुयज्ञपूर्वःसमानयोनिमनुसंच
रंत॥ दृश्यंजुहोम्यनुससप्तहोत्रा॥ अत्रकारिका॥ आहुतिहूयमानानुवहिःस्कन्देतदेवपरा देवांजनमग
न्नितरत्नेनाभिमृशेत्पुनः॥ इमम्भसाहुतिंहुत्वाप्रक्षिपेदनुधेपुनः॥ देवांजनेतिसर्वत्रस्कन्नंत्वभि
मन्त्रोदिः॥ होत्याज्याहुतिस्तत्रव्याहृत्याख्येःसमुच्चयात्॥ यागात्यागान्वाधानंनिर्वापादिषुजातोदे
वताव्युत्क्रामोपदाज्ञानस्तदाव्याहृतिभिर्हुत्वाविहितदेवतायजेत॥ यागादुर्दैवताव्युत्क्रमेज्ञानेतु
व्याहृतिभिर्हुत्वातदायागंनावर्त्तयेत्॥ परात्मकृतांकांविद्देवतायजेत्तदाव्याहृतिभिर्हुत्वाप्रकृत
देवतायेयागमावर्त्तयेत्॥ अत्रकारिका॥ यागमाव्युत्क्रमेज्ञातदृहुत्वायज्ञेनदा॥ यदात्वविदिता

कां विद्द्वत्तमिष्टवांस्तदाप्याग्नित्रमिदं कृत्वाप्यागंलादर्न्नयित्कृतं। इदंमाहुतिहोमारब्धं॥ अन्नान्पि
प्याग्निशान्तिकारिकाप्यं॥ पवित्रंयदिनस्यंत्रे तस्मात्सवित्र्यवते चरुः। यदा हविरुपकृत्स्याग्नेनैव हवि
षास्त्सजेत्॥ चरुःशरावमात्रंतुपचेद्व्रीहितिरोदनं॥ भोजयेत्तेन चान्नेन चतुरो ब्राह्मणानपि। व
ऊरगर्थं वा किंचिद्देवयदा हविः॥ शिष्टेन ह्यपुनर्योगःस्यादारभ्यादितस्त्वयं॥ कृत्स्नदग्धेपरान्
तस्मात्पुनरुत्सादयेद्धविः। एवं यागः कर्तव्यः पुनर्यागस्तु नेष्यते॥ मध्ये तत्रवर्धितोवत्त्र्यदि दुष्टं ह
विर्भवेत्। तस्यैव हविषो वेद्यां मध्यमत्रवर्धितः पुनः। इध्माधाने कृते दुष्टंप्रधानं हविरत्र चेत्॥ त
स्थानेन्तु कुर्यादाज्यमदुष्टं चजुहोत्तथा। एवं समाप्य ये दुष्टं तदप्सु प्रक्षिपेत्पुनः। अन्वाधाना
दिको यागः पुनः कर्तव्य एव तु॥ आगिध्माधानतो दुष्टे प्रधानहविषि त्वयं॥ तद्धविः पुनरुत्साद्य
सर्वं तत्समाचरेत्॥ प्रभूतैस्तु नखैः केशैः कीटैर्वामिथ्यसैर्विभिः। वसासक्तुमुक्तमज्जास्थि न॰भा॰ ६२
मूत्रविट्स्वेददूषकैः। श्लेष्माद्यैर्वापिवीभत्सैर्दुष्टाविनिस्तुहवींषि चेत्॥ भिन्नानिसर्वेचैवास्तिक्तो
दुष्टानि स्युः क्षिपेज्जले॥ स्रुक्स्रुवौ घृतं तत्र धर्मा सामा ह संयुक्तं याद्धविः वा न स्युः सा निर्भिन्नानि श
दग्धान्यनले क्षिपेत्॥ आज्यास्थुविसंवद्धमन्येयपवित्रमेव च। भूमिर्भूमिं तु मंत्रेण प्रक्षिपेद्देवता ज

ले॥ मंत्रः॥ भूमिर्भूमिमगान्माता मातरमप्यगात्। भूयास्म पुत्रैः पशुभिर्योनो द्वेष्टि स भिद्यता
मिति। संसृष्टे यदि गार्हपत्याग्निरन्यगार्हपत्याग्निनायदि। चरुर्विधिं तु पेक्रार्योयथाकृत्पूर्णाहुतिर्भवेत्॥ अ
ग्निर्गणीमदरेषु विविधिसादिको गुणाः। चरुः क्षामायकर्तव्यो गृहदाहेषु वैभवेत्॥ शाब्दाग्निना तु सं
सर्गं कुर्वीतशुच्चये चरुं। पवनाग्नेस्तु संसर्गे संवर्गाय चरुर्भवेत्॥ वैद्युतेन च संसर्गे कुर्याद्दप्सु
मते चरुं। आयुष्मते चरुस्तावान्पूर्णाहुतिरिष्यते॥ पर्वण्यातमागुपातैव कुर्याद्व्रतभृते चरुं। पै
र्णव्रतलोपेतु कुर्याद्व्रतपते चरुं॥ समानतंत्रं कुर्वति पार्वणे न तु कर्मणा॥ अकृतग्रयणो श्रीपा
त्ववान्नयत्तुवैनतः वैश्वानरायकर्तव्यश्चरुः पूर्णाहुतिस्तथा॥ क्षिपेदन्यं यदा भुक्ते तत्राप्येष चरुर्भ
वेत्। कपालं नाशेप्येवसा कूर्वणा कुर्मनामनि। कपालं तद्देविज्ञप्राग्गेवस्थपृणा ह्वृदि। तदानेत्रीतं
मंत्रेण कपालं संदधास्यं च। अभिन्नो घर्म इत्याभ्यामप्सुतत्प्रक्षिपेदथ॥ तस्येदस्थुविसंबद्धमप्या
मेवक्षिपेज्जलेभि वेद्यादिपुरोडाशाद्दं उद्धृत्य वा यदि। किमस्त्वननसि मंत्रेण बहिषेन्नानि धापयेत्॥
अभिमंत्र्यते तं तु माहिंसीरिति मंत्रतः। मंत्रस्तु। किंमुस्त निकिंमुस्तरोदृष्टाः तांतः त्रांतेरिहाग
हि॥ आघोरायधियोभत्वासोदसदनस्वमाहिंसीरिति॥ अस्यतेमतत्राप्य श्रेयजमानेतु जीवति

॥ अग्नये स्विष्टमिमं वै चरुः । पूर्णाहुतिस्ततः ॥ अथ यस्य वधूर्वर्गौ जनयेद्वै द्युमौ तदा । सप्तरूपमश्वरं
कुर्यात् पूर्णाहुतिमथापि वा । समारूढे समिनाशे पुनराधेयमिष्यते ॥ श्रौतौ क्रमाद्विरोधः स्मार्ते
तु रात्रिरं । प्रायश्चित्तविशेषस्य यत्र नोक्तो भवेद्विधिः । होतव्याहुतिस्तत्र भूर्भुवस्वरितीहतु ॥ नि
मित्तानंतरं सर्वप्रायश्चित्तं भवेदिह ॥ प्रागेवोल्लद्धे घृतदोषश्चाज्यसंस्कारतो यदि । प्रायश्चित्तं भवेदा
ज्यसंस्कारानंतरं तदा । उत्क्रमो देवतानां तु संकल्पादौ भवेद्यदि ॥ मंत्राणामुत्क्रमस्तत्र होमाद्धो
तु भवेद्यदि । मध्यान्तर्वा श्रुतस्त्वेतिष्वुत्क्रमस्त्वाङ्गवेद्यादिद्रव्याणां व्युत्क्रमः स्याद्येत्रथा निर्व्रणादिषु
प्रहारे वा अव्याहता जुहुयाच्च स्रुवाहुतिं ॥ यजमानस्तु जुहुयाद्भूत्विग्वा वेत्तु वाहुति । यन्नु
संस्थगृहे पुंवं होमकर्तारादेवि तत्र ॥ कस्मैचित् ॥ ब्राह्मणाय प्रसिमत्तं दद्यमंददातिनत ॥ होतयो का
हुतिश्चात्र व्याहृत्यात्मैः समन्वयात् ॥ सर्वत्रैव प्रायश्चित्तेऽसन्नुपजप होमं वाप्यरिमणेव कुर्यात् ॥ जु
होति यजतीति प्रायश्चित्तमुक्तं तस्मिन् तस्मिन् प्रायश्चित्ते कृते ऽतीतं कर्म कार्यं निवर्तितत्र मत
भेदः । वेतदुक्तं कारिकायां ॥ प्रायश्चित्ते कृते पश्चादतीतमपि कर्म यत् । कार्यमित्येके आचार्या
मेतस्मे तु विपश्चितः । कर्मसमाप्तिसमये गलोपेऽन्यो लेकुतालेवा प्रजापतिः प्रायश्चित्तमाह ॥ प्र

ना०भ० ६३

मादात्तु कर्तव्यं कर्मण्येवेतावधूरेषु यत् ॥ स्मरणादेव तस्य सर्वं संपूर्णं स्यादिति श्रुतिरिति ॥ एवमसान्म
प्रायश्चित्तानि गृह्यान्तरतो वगंतव्यानि ॥ अथ गोरक्षमपात्रस्मार्जिर्नलिखते ॥ ॥ इति श्रीरामेश्वर
सूनुनारायणभट्टविरचिते प्रयोगरत्ने दृष्टिप्रायश्चित्तानि ॥ नैमित्तिकप्रायश्चित्तानि च ॥ ॥ अथ स
कलकर्मसाधारणपरिभाषा ॥ ॥ तत्र कारिका ॥ अप्येकदमकेहोमस्याद्वेदाज्यपरिग्रहः स्यात्सरिस्
तिः । सर्वस्मिन्पाकयज्ञे तु आज्यभागो कृताकृतौ । सर्वेषु पाकयज्ञेषु भवेत्स्विष्टकृतकृतः । धन्व
तरिमखे श्रूलानिसः भूलगवेतथा । कृते होमे कचित्काद्यः पाकशिनिमंत्रपास्वकृते । नोभयं प
तत्रैष्टहवनं नामधेयस्य । नैकैकावनप सोऽपिचोल्लादा वक्षितो यदा । तदाग्निरिंद्र इत्सायाहोतमाहुत
सत्वकृत । अनेकेपाकयज्ञास्युरेकस्मिन्कालएव चेत् ॥ समानतंत्रकाः कार्यानितंत्राहुतिरिष्यते ॥
यात्रासादनमिच्छति आज्यादिश्रयणादि च ॥ स्रुवादिमार्जनं चैव रज्जुप्रहरणं तथा ॥ पूर्णपात्रं
प्रवर्गि समाज्यस्योत्सवनं तथा । ध्यानादेयश्चाज्ये स्याद्वदुक्तेसाधनं स्रुवः । जपानुमंत्रणे मंत्र उ
पस्थानाभिमंत्रणे ॥ मंत्रोयः कर्मकरणोग्राह्य कर्मण्यप्युपस्थपट । इदं कार्यमनेनेति न केचिद्दुस्म
तो विधिः ॥ लिंगादेवेदमर्थत्वं येषां ते मंत्रसंज्ञिताः ॥ मंत्रांते कर्मकेचेर्वममंत्रस्य करणं त्वतः ॥

कर्मविहितो तु मंत्रस्साया हविर्गृह्यकर्मणि। मंत्रीकृरदेवतानां तु तुष्टीमेकाग्रनिर्वपेत्॥ चतुरश्चतुरो
मुष्टीनज्ञो क्षणां तु तथा भवेत्। सहैव श्रपयेत्तत्र नास्ति पृथक्करणं तथा॥ आदिष्टमंत्रहोमेषु सर्व
त्रैवं प्रतीयतामिति॥ कृताकृतं वैकल्पिकं॥ कृ चरुरिति गृह्यसूत्रकारः॥ क्वचिन्नाम्ना होममाह॥
यथा सविश्रेत्रन्नाणाहुति॥ क्वचिन्मंत्रेणाह यथा॥ अग्नेनयसुपथा राये अस्मानिति चतस्र
भिरिति। यत्र तु न नाम ततो न वा मंत्रतो होम उक्त तेके वलं॥ तद्धितादिना देवतानाम्नाहोमइ
त्यर्थः। अग्नेक इति यथा आग्नेय०णा स्वयुजा कर्मणा यदा स्वमुञ्जीक्रियते तत्र तयोरेकक
त्वाजयेतिजयादिषु पक्षस्मृपस्तुताया मंत्र उक्तस्तस्य लक्षणमेतत्। लिंगादर्थप्रकाशनं
सम्यात्॥ इदमर्थं तिलंत्र कार्यार्थलिंगं तु मंत्रसामान्य लक्षणमिदमसाधारणादिदोषापत्ते
।तस्माद्दिशौमस्यैवं मंत्रस्य लक्षणं। एवं कर्मतंत्रराद्वाघार्थः। सामान्यार्थाविशेषार्थञ्च
ति भगवान्यत्रोपदिश्यते कर्मकर्तुरंगं न तु मते॥ दक्षिणास्तत्र विज्ञेयाः कर्मणां पारगः
कर॥ यत्रादिश्यमानो नोक्तो जपहोमादिकर्मसु दिक्स्वस्ततत्रदिशः प्रस्तारेंद्रासौम्यापरा
जितारेशानी॥ आसीनऊर्ध्वः॥ प्रक्लो वा नियमो यत्र नोक्तस्ततदासीनेन कर्तव्यं न तिष्ठ

ना०भा०
६४

ता॥ तथा अग्नेरिदं नेरवयं कर्मसिर्वेरुलिकृत्पुरोहिताः। आश्लतासा धनानां प्राक्तनं तत्तच्च कर्मणा। तथा
॥ अविद्यमानः स्वरमंत्राः प्रोक्तव्याः प्रयोक्तृभिः एकश्रुत्यैव हेमेषु प्रणवादिकः पत्रस्याः त्वतत्त्वं दण्डस्तत्त्वे
वृहयहम्यते॥ अगंते तत्र होतमस्वाहाकारं पठेत्ततः॥ जानीयात्स्वरं च मंत्रं तदस्मात्पदे इति। भूर्भु
वस्वस्वस्वेति तिस्रो व्याहृतयो जपेत्॥ आजिम्भहोमेति सूजिम्भतुणीस्यात्समासतः॥ अयप्रयोग
मंत्राणां विधिलक्षणं स्मृतं॥ जपाभुमंत्रणाप्यायनाममंत्राल्लध्वेच॥ उपस्थानकर्मकरणेषु उपांशु
प्रयोगः जपमुच्चारणं विधातव्यं यस्मात्फलं भवेत्॥ अर्थतः कार्यज्ञानम्बेदयतेर्वक्ते भवेत्॥ मंत्र
मुच्चारयेन्नेवमंत्रार्थलिंगेन संस्मरेत्॥ न्यायेनात्मना भूतास्याद्दे तदनुमंत्रणं॥ बाह्यकर्म यदे तेषु
कर्मकाले क्रियेत तत्। कर्मणः करणानस्य विहितार्थप्रकाशनं॥ मंत्रेण कृत्वा मंत्रान्तेक्रियते कर्मयेषु
तु। तथा। आज्यापत्तमुपांशु स्यान्नमधोसावित्रमेवच॥ कृताकृतं त्र्यंबकवरुणं आत्मा चाजपस्य संस्कृति
।संमार्गः स्रुवस्याग्नेश्चाज्यभागोपरिस्कृतिः। व्रीहीणामवघातश्च तंडुलेषु कृताकृतः॥ द्रवीभूत
घृतस्यापि विलापन विधिस्तथेति। अत्र विहितं कर्म पवित्रपाणिः कुर्वीत॥ यदाह हारीतः॥ जपहोम
महादीनेनसुरादिरूपिणः पवित्रकृतहस्तस्य विद्वंवंतिदिशोदश॥ अत्रिः॥ उभाभ्याम पिपाणि

मांविप्रैर्दर्भपवित्रके॥ धारणीयंप्रयत्नेन ब्रह्मग्रंथिसमन्विते॥ ब्रह्मग्रंथिलक्षणंगरुडपुराणे। अस्ता
मैर्वेष्टयेत्पामांग्रंथिविनिर्मितः। सकृत्प्रदक्षिणीकृत्यपवित्रमभिधीयते॥ तद्ब्रह्मग्रंथिमंतो
कंपवित्रंवेदवेदिभिः॥ पवित्रकंतुर्दभमुरवप्रदेशे ग्रांत्यमार्गा॥ पवित्रदर्भसंख्या चतत्रैवसप्तभिर्द
र्भपिंजलैः कुर्याद्ब्राह्मणपवित्रकं॥ पंचभिः क्षत्रियस्यैवचतुर्भिस्तु तथाविशः॥ द्वाभ्यांशूद्रस्यविहित
——राणांतथैवच॥ मार्कंडेयस्तु। चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्यपवित्रकं॥ एकैकंन्यूनमुद्दिष्टं
वर्णेवर्णेयथाक्रमं॥ सर्वेषांवाभवेद्द्वाभ्यांपवित्रंग्रथितेनच॥ त्रिभिस्तुशांतिकेकार्यंपौष्टिकंपंचभि
स्तथा। चतुर्भिरभिचारार्थंकुर्वन्कुर्यात्पवित्रकं॥ हेमपवित्रंविशिष्यप्रशस्तमुक्तंहेमाद्रौ॥ अन्या
निचपवित्राणिकुशादुर्वात्मिकानिच॥ हेमात्मकपवित्रस्यकलांनार्हंतिषोडशीमिति॥ द्रव्यभेदेन। ना०म० ६५
द्रुतिपरिमाणभेदउक्तः॥ सिद्धांतशेखरे॥ कूर्चप्रमाणमाज्यंस्यान्मधुक्षीरंचतत्समं तंडुलानांमु
ष्टिमात्रंपायसंप्रसृतःसमं। कर्षमात्राणिभक्ष्याणिलाजानांमुष्टिमितामता॥ अन्नंतुग्राससमं
ग्रास्यांग्रासाग्रासार्धमात्रकं॥ मूलानांतुत्रिभागःस्यात्कंदानामष्टमांशकः॥ इक्षुःपर्वप्रमाणः
स्यादिगुलदितयंसतां। प्रादेशमात्राःसमिधोव्रीहिणांमंजरीसमा॥ तिलसर्षपकणादीनांम

गामुद्राप्रमाणतः॥ पत्रपुष्पफलानांचस्वमानाकृतिरिष्यते। चंदनंश्वेतकस्तूरीकुंकुमागरुकर्दमा
॥ हरिमंथसमाःप्रोक्ताःगुग्गुलुर्बदरीसमः॥ आकृतानामिदंमानंकथितंवेददिग्भिः। हरिमंथसमाःपाकः
मृगीमुद्रालक्षणमुक्तंतत्रैव। सार्द्रिमुद्रामृगीमुद्राहोमेसर्वफलप्रदेति॥ अरणीजन्मादेरग्नेरुत्तमा
दित्वमुक्तंतत्रैव। उत्तमोरणिजन्मोग्निर्मध्यमःसूर्यकांतजः। उत्तमःश्रोत्रियागारान्मध्यमःस्वगृहादि
जः॥ एवमग्निंताम्रसुवर्णराजतादिपात्राभ्यांप्रणयेत॥ तथाचात्रिः॥ पात्रांतरेणापिहितेताम्र
पात्रादिकेशुभे॥ अग्निप्रणयनंकुर्यादित्तदेवताहृशैयिवा॥ आपस्तंबःनाप्रोक्षितमिंधनमग्नावाद
ध्यात। बर्हिरर्थंकुशाभावेप्रतिनिधयःस्मृत्यर्थसारे॥ बर्हिकार्यमर्यंग्राह्यंनलभ्यंतेकुशायदि
। काशाःशीरमूलन्धाम्रवालमुंजाजनेभ्रवः। सुगंधिनेजनाराररदुर्वाक्षीरद्रुमा अपि॥ यद्वासर्वत
णोभ्योपितत्रास्तंबर्हियचेक्षितं॥ शुष्कमूलंकृमिमूलंदुर्गंधितणवर्जितं॥ ज्ञानात्तपःसमित्कुश
फलादीनिआहवणःस्वयमाहरेत॥ मूड्रानीतैःकुमकुर्मस्य। वधमितिशेषः॥ कुशोसाटनेमंत्र
माहकाश्यपः। शुचौदेशेशुचिर्भूत्वास्थित्वापूर्वोत्तरामुखः+ वंतजलधिः। विष्णुः। दर्भोश्रावणमास
स्यसमंत्रोत्पाटिता॥ कुशाः। आयातयामास्तेज्ञानियोज्याःकर्मकर्मकरवः। हुंकारेणेवमंत्रेणकु

ण्णानष्टशुद्धिद्विजोत्तमः॥ विरंचिनासहोत्पन्नपरमेष्ठिनिसर्गज॥ नुदपापानिसर्वाणिदर्भस्वस्तिकरो
म॥ इमंमंत्रंसमुच्चार्यततःसर्वोत्तरामुखः॥ हुंफट्कारेणदर्भांस्तुसकृच्छित्वासमुद्धरेत्॥ हा
रीत॥ अच्छिन्नाग्रान्पवित्रांश्चसमूलान्कोमलान्शुभान्॥ पितृदैवद्विजार्थंहिसमादद्यात्कु
शान्द्विजः॥ रत्न्याद्यादशचांगुल्यःसमाःपंचदशास्मृताः॥ सरलाःसत्वचश्चैवसाग्राइध्मार्हदले
न्तमाः॥ ब्रह्मपुराणेपि॥ शमीपलाशन्यग्रोधप्लक्षवैकंकतोद्भवाः॥ अश्वत्थोदुंबरोबिल्वश्चंदन
ःसरलस्तथा॥ शालश्चदेवदारुश्चखदिरश्चैवयज्ञियाः॥ दक्षिणायांविशेषउक्तोमहाभारतेवेदोपनि
षदेचैवसर्वकर्मसुदक्षिणा॥ सर्वकृतसमुद्दिष्टाभूमिगोवीर्यकांचनं॥ बेडवापः॥ त्रिवनेत्रोज्ज्वं
यस्मात्तस्मात्त्रसितेवद्धर्मं॥ अमंगलंतद्धिज्ञेयंदैवकार्येषुवर्जयेत्॥ छंदस्तु॥ यज्ञोपवीतेद्वेधार्ये
येश्रौतस्मार्तेषुकर्मणि॥ तृतीयमुत्तरीयार्थेवस्त्राभावेतदिष्यते॥ सदोपवीतिनाभाव्यंसदाबद्ध
शिखेनच॥ विशिखोव्युपवीतश्चयत्करोतिनतत्कृतं॥ अत्रत्रैवर्णिकसदाराद्वृवशात्पुरुषार्थता॥
उत्तरार्द्धेनविपर्ययविदारकारेणासशिखसोपवीतत्वाभ्यांकर्तव्यंकर्मेतिक्रोतैनात्कर्मार्थता॥ एवंच
कर्मकालेशिखाबंधोपवीताभावेकर्मांगलोपनिमित्तंपुरुषार्थलोपनिमित्तंचेतिप्रायश्चि ना०प्र० ६६

त्तद्वयंभवति॥ दर्शपूर्णमासयोरिवानंतवदने॥ कर्मणोवहिस्तुपुरुषार्थलोपनिमित्तमेकमेवेतिवि स्मृति
वेकः॥ संग्रहे॥ प्रभुःप्रथमकल्पस्ययोनुकल्पेनवर्तते॥ नसाप्नोतिफलंतस्यपरत्रेतिश्रुतिः॥ बह्वृचं
वास्वगृह्योक्तंयस्ययत्कर्मचोदितं॥ तस्यतावतिशास्त्रार्थेकृतेसर्वःकृतोभवेत्॥ कर्मविशेषेग्निना
मानि॥ पावकोलौकिकोह्यग्निःप्रथमःसंप्रकीर्तितः॥ अग्निस्तुमारुतोनामगर्भाधानेविधीयते॥
ततःपुंसवनेत्वैंद्रःपवमानस्तथैवच॥ सीमंतेमंगलोनामप्रबलोजातकर्मणि॥ नाम्निवैपार्थिवो
ह्यग्निःप्राशनेतुशुचिःस्मृतः॥ सत्योनामसचौलेतुव्रतादेशेसमुद्भवः॥ गोदानेसूर्यनामाग्नि
र्विवाहेयोजकस्ततः॥ आवसथ्येद्विजोज्ञेयोवैश्वदेवेतुपावकः॥ प्रायश्चित्तेविटश्चैवपाकयज्ञेषुपा
वकः॥ देवानांहव्यवाहश्चपितृणांकव्यवाहनः॥ शांतिकेवरदःप्रोक्तोपौष्टिकेबलवर्द्धनः॥ पूर्णा
हुत्यांमृडोनामक्रोधोग्निश्चाभिचारके॥ वश्यार्थेकामदोनामवनदाहेतुदूतकः॥ कुक्षौतुजठरोज्ञे
यःक्रव्यादोमृतदाहके॥ वह्निनामालक्षहोमेकोटिहोमेहुताशनः॥ समुद्रेवाडवोह्यग्निःक्षये
संवर्तकस्तथा॥ ब्रह्मावैगार्हपत्यश्चईश्वरोदक्षिणस्तथा॥ विष्णुराहवनीयस्यादग्निहोत्रेत्र
योग्नयः॥ ज्ञात्वैवसमग्निनामानिगृह्यकर्मसमारभेत्॥ स्मृत्यर्थसारे॥ बह्वृचोक्तेधनेचाग्नीस्तु

सुमिद्धे विधूमके ॥ सांगारे लेलिहाने च होतव्यं नान्यथा क्वचित्स्रुवस्रुग्वा गादि प्रकृतिवृक्षाः स्मृताः सर्व
सोरे जुहूः पालाशस्युपभृताश्वत्थी वैकंकती ध्रुवा ॥ यद्वा सर्वाः स्रुचः कार्या एतेषामन्य वृक्षजाः
स्मीमयः स्रुवः कार्यः सिवर्णा भूर्ज वृक्षजाः । तदलाभे यथालाभं मृन्मयं यज्ञियवृक्षजाः ॥ खादि
रस्तु स्रुवः कार्यः शम्याशाखाशाखाग्रमेक्षणो ॥ खादिरो मुसलः कार्यः पालाशास्याउ लूखलः ॥
यद्वोभौ वारणौ कार्यौ तदभावेन्य वृक्षजौ । मुख्याभावे तु सदृशं द्रव्यं प्रतिनिधीयते । यावद्याव
सुसदृशं तत्र देवहि गृह्यते ॥ प्रस्तरोपूर्णपात्रार्थे राङ्कास्यमयो मुखे । खादिरेण स्रुवः कार्य
पालाशेन जुहूर्भवेत् ॥ स्रुक्प्रदेशा विलोस्याता मस्मेर्वा यज्ञियद्रुमैः ॥ तदभावे पलाशस्य पर्णा
ष्यांहूयते हविः ॥ पलाशपर्णाभावे तु पर्णैर्वा पिप्पलोद्भवैः ॥ पर्णैर्मत्र्यं न धर्मं ॥ मध्यमेन पर्णे ना०प्र० ६३
न जुहोतीति ॥ चमसं वा प्रणीता वा कांस्यपात्रमयापि वा ॥ घटनाप्रकारः संग्रहे । आयासं पूच
धा कृत्वा द्विभागं पात्रमुच्यते ॥ त्रिभागं दंडमित्याकृतेर्न राया मलक्षणं ॥ पात्रायामोर्धतः पा
त्रविस्तारश्चतुर्दशतः ॥ ग्रीवाविस्तारस्तस्या द्विबिलस्योच्छ्रायस्यते ॥ विस्तारद्विगुणं पात्रं ग्री
वाविस्तारमर्धतः ॥ अन्यानि तु लक्षणानि विस्तारभयेन नोक्तानि । तथा । काम्ये प्रतिनिधिर्ना

स्ति नित्ये नैमित्तिके च सः ॥ काम्येष्वुपक्रमादूर्ध्वमन्ये प्रतिनिधिं विदुः ॥ न स्यात्प्रतिनिधिर्मंत्रे स्वामि
देवाग्निकर्मसु ॥ सदेवकालयोर्नास्ति नारायणोग्निरेव सः ॥ नामावस्य प्रतिनिधिरभावान्तरमिष्यते
॥ नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित् ॥ इत्यादिनि यास्त्वकालादुक्तरेगौणः कालः सर्वस्य
कर्मणः ॥ तथा कुशाद्दर्भादयो मंत्राः ब्राह्मणाश्च बहुस्रुताः ॥ न तेनि ॥ र्माल्यतां यान्ति विनियोज्याः
पुनः पुनः ॥ कुशाः पद्मतु निर्माल्याः दर्भा ह्याज्ञाभिचारिके ॥ मंत्रास्तत्र च पूजार्थे ब्राह्मणाः श्रा
द्धभोजिनः ॥ पक्वतर्पणमाचासनभोजनमूत्रपुरीषकालस्पार्शनेषु ॥ तत्राभिचारिके कृतं च विहि
तं कर्म विष्णुवर्पणं कार्यं ॥ तथा च बृहन्नारदीये ॥ विष्णुवर्पितानि कर्माणि सफलानि भवंति हि ॥
ष्णुपितानि च कर्माणि भस्मनि पुरुहव्यवत् ॥ नित्यं नैमित्तिकं काम्यं यच्चान्यन्मोक्षसाधनं ॥ वि
ष्णोः समर्पितं सर्वं सात्विकं सफलं भवेत् ॥ तथा गीतायां ॥ यत्करोषि यदश्नासि यज्जुहोषि द
दासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति ॥ विहितमिति ॥ विहितमिति विशेष
॥ इत्यादि ॥ एवमन्या अपि परिभाषा ज्ञेयाः ॥ ॥ इति श्रीनारायणभट्टविरचिते परिभाषाप्रक
रणं समाप्तं ॥ ॥ अथ गर्भाधानाद्याः संस्कारा उच्यन्ते । तत्र प्रथमे रजोदर्शने मासादौ दुष्टे स

लिगअधिमनस्पर्शं॥ तिकस्वर्वककर्नर्मलाह्लं तिकंवल्कं रे ऽ इष्टकालाउच्यंते॥ प्रथमे रजसि चैत्रज्येष्ठा
षाढभाद्रपदकार्त्तिकपौषा: अशुभा:॥ आश्विने मध्यम:॥ शेषा: शुभा:॥ केचिद्वैशाखफाल्गुनश्रावणाद्वि
योरधमत्वमुक्तं॥ तिथिषु प्रतिपच्चतुर्थीषष्ठ्यष्टमीद्वादशीचतुर्दशीपौर्णमास्यमावास्या: अशु
भा:॥ शेषा: शुभा:॥ केचिद्विशस्यैकादश्यौ अशुभे॥ अष्टमीद्वादश्यौ शुभे उक्ते॥ वारेषु रविमंद
भौमवारा अशुभा:॥ अन्ये शुभा:॥ केचित्सोमोऽप्यशुभ उक्त:॥ नक्षत्रेषु भरण्यार्द्रापुष्याश्लेषापूर्वा
ज्येष्ठामूलपूर्वाषाढा पूर्वाभाद्रपदास्वेतेऽशुभा:॥ चित्राविशाखाश्रवणाश्विनीमघास्वात्यो मध्यम
:॥ अन्यानि शुभानि॥ केचित्तु कृत्तिकापुनर्वस्वनुराधा अप्यशुभा उक्ता:॥ एवं च तासां मध्यमत्वं॥ एव
मन्यत्रापि योगेषु॥ आघातस्याद्यानवनाड्यो गंडातिगंडयो: षट् शूलस्य पंचदश परिघस्यार्द्धं वैधृति न०प्र०
व्यतिपातस्य सकलमशुभ: वज्रं मध्यमं॥ अन्ये शुभा:॥ करणानि विष्टिं विना सर्वाणि शुभानि॥ अह्नि त्रेधा ६६
विभक्ते आद्यो भाग: शुभ:॥ द्वितीयो मध्यम:॥ तृतीयो दुष्ट:॥ एवं रात्रौ सूर्योदयात्तमयावदशुभो॥
रविसंक्रमणाद्धोनाडीचतुष्टयमूर्ध्वं चाप्यशुभं। संक्रांत्यादिदिनमध्यमदिनेऽप्यशुभं॥ रविचंद्रोप
परागयोरप्यशुभं॥ संध्यापञ्चदशाबाह्यौ चेच्छुभ — तुरात्मनश्च चतुर्थाष्टमद्वादशस्थे चंद्रे जीर्णार

के नीलमलिनकृष्णाम्बरस्त्रेषु परिहितेषु न शुभं। संमार्जनीकाष्ठमृत्तृणाग्निसूर्पतुषप्रभृतिस्पर्शे क्षतलोहपा
षाणशस्त्रादिधारिणां एतेषु केशेषु वाप्यशुभं॥ देहलीद्वाररथ्यादिपितृमातृगृहेऽप्यशुभं॥ ऊर्ध्वस्थिता
मानिद्रितायाश्चाशुभं॥ पित्रादिसरिविनिर्दिष्टमशुभं॥ शय्यारोगमित्यादि ज्ञेयं॥ दुष्टमासादौ प्रथ
मरजोदर्शनेतु बूलभक्षणादिमंगलारंभं न कुर्यात्॥ द्वितीये तु शुभे तत्र कुर्यादिति केचित्॥ अथ
म एव यथा॥ शक्तिशांतिं चरेद्दिप्र परे॥ अत्रैकस्मिन्नप्यशुभे वक्ष्यमाणा: शांति: कार्या॥ द्वित्राद्यशु
भेसन्निपाते तु सर्वविनवक्ष्यशुभानिरासार्थं वक्ष्यमाणा कुंतिसंरभादि विशेषश्चाकार्या॥ यथा शांतौ
स्यादितियं॥ इति शुभाशुभविचार:॥ अथ शांतिरुच्यते॥ तत्रएवं॥ विनायकं तु संप्र
ज्याग्रहांश्चैव विधानत:॥ कर्मणा: फलमाप्नोति नियान्नतव॥ तेन कर्मफलसिद्धावविघ्नत्वेन ग्रह
पतस्यावश्यकत्वेनोक्तेरिह चशौनकेन॥ आर्तवाभां तु नारीणां शांतिं वक्ष्यामि शौनक॥ रजसु
पक्रमग्रहातिथ्यपुर:सरामिति प्रकरणोक्ते राकृपतारेकु देशकालकृतकार्णाच विशेषवचना
भावेनंत्रैणकर्मसंगृह्यसर्वकतंत्रेण शांतिकप्रयोग उच्यते॥ रजोदर्शनानंतरं पंचमादि
दिने चंद्रताराद्यानुकूले शुभदिने स्नातया पत्न्या सह:॥ पति:॥ प्राङ्मुख उपविश्य प्राणानाय

मद्देवाकालोस्मत्तामपत्न्याः अथ मरुजोरद्रनिमुक्तमासादिसुखिलसकलारिष्टनिरासद्वारा श्रीपरमे
श्वरश्रीसर्थसिद्ध्यहमरुत्तां श्रीनको रुद्रशांतिं करिष्ये इति संकल्प्य गणेशपूजनं पुण्याहवाचनं गोत्र
दिपीठ ऊर्ध्वमातृकापूजनं नांद्यादि सप्तमातृकापूजनं नांदीश्राद्धं निकृत्वा शं तं कुर्याद्विनं मंत्र
तंत्रसमाचार्यं ब्रह्मणानं वर्णानि जप्यजपहोमाद्युपदिष्टेषु द्वत्रां वा हुत्वा गंधाद्रिना पूजयेत्॥
ततः प्राचार्यगृहे ऐशान्ये कुंभ चौमहाद्यौरिति मंत्रेण भूमिं स्पृष्ट्वा तद्दक्षिणतो व्रतश्चेत तथैव मंत्रा वृ सा
भूमिं स्पृष्ट्वा ओषधयः संवदंत इति द्रोणप्रमाण आदि निर्मध्य तद्दक्षिणतो व्रतलक्ष तु थैव मंत्रा
वृ सारांत्रीवयं हुत्वा तेनैव क्रमेण राशित्रयोपरि नवकलशं भैरवं कुर्यात् यं आकृष्णेति मं
त्रा सा स्थापयेत्॥ एवं सर्वत्र मंत्रावृत्तिः॥ ततः प्रसु व आप इति नवतंस्य सुकल्य सिंधुक्षित्रैय्य
मेधो नदीजगती कलशस्थापने विनियोगः॥ प्रसु व आपो महिमानमुत्तमं कारुर्वोचाति
सदने विवस्वतः। प्र सप्त सप्त त्रेधा हि चक्रमुः प्रसत्वरीणामति सिंधुरोजसा॥१॥ प्र तेरदद्वरुणो
यातवे पथः सिंधो यद्वाजा॥२८॥ अभ्य द्रवस्त्वं भूम्या अधि प्रवता यासि सानुना यदेषामग्रं जगा
तामिरज्यसि॥२॥ दिवि स्वनो यतते भूम्योपर्यनंतं शुष्ममुदियर्ति भानुना। अभ्रादिव प्रस्तनयंति वृ ना०भा० ६८

ष्टयो नदीरोरुवत्॥३॥ अभि त्वा सिंधो शिशुमिन्न मातरो वाश्रा अर्षंति पयसेव धेनवः। राजेव युध्वा
नयसि त्वमित्सिचौ यदासामग्रं प्रवतामिनक्षसि॥४॥ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचत
ता परुष्ण्या। असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया॥५॥ सितासिते सरिते यत्र
संगते तत्राप्लुतासो दिवमुत्पतंति। ये वै तन्वं विसृजंति धीरास्ते जनासो अमृतत्वं भजंते॥६॥ तृष्टामया प्र
वंसुवर्णस्यताम्रलोहस्यामांगलिकद्विगुणपदादिसूत्रोपेतयासौचिकेनासिनवाकुशलेनवा
स्वर्णकारेणस्त्रियावाशुभहस्तस्यवाकर्णौविधयेदनात्रैवसूर्यंच॥ अभिपातस्थलेंगणादोक्षालनमुष्णेन
वारिणापित्रादिःकुमारस्यपूर्वंदक्षिणंततःकुमार्यास्तुपूर्वंवामःकर्णोविध्येत्। वेधनक्षत्रात्तृतीय
नक्षत्रेकर्णक्षालनमुष्णवारिणारोहणार्थंकार्यं। रूपरोचकयोर्यथाभरणधारणक्षमताभ
वतितथावर्धनायपुंसः। सूर्यरश्मिप्रवेशयोग्यरंध्रपर्यंतंवर्धयेत्। अवकर्णनात्तुनिषिद्धास्त्रीणांय

येत्॥ ॥इति कर्णवेधः॥ ॥अथ सूर्यविलोकनं निष्क्रमणं च॥ ॥जन्मात् तृतीये मासि जन्मनक्षत्रे इष्ट
देवतापूजनपूर्वकं अलंकृतेन शिशुना सोत्सवं सूर्यदर्शनं कारयित्वा चतुर्थे मासे शुभकालेऽग्निं
चंद्रं धेनुं च दर्शयेत्। केचित्तु स्वस्ति न आत्रेयो विश्वेदेवास्त्रिष्टुप्॥ शिशोरक्षारोपणे विनियोगः॥
ॐ स्वस्ति नो मिमीतामश्विना भगः इति त्र्यृक्। अनेन पित्रादिः शिशुमंकमारोप्य आयुः शिशुना न इति त्र्य
यां दशानां स्याप्रतिरथः सूक्तं इंद्रोऽप्रतिरथ इंद्रस्त्रिष्टुप् चतुर्थ्या बृहस्पतिर्देवता त्रयोदश्यनुष्टुप् प्रा
णारापुण्याममभिष्टये जपे विनियोगः॥ ॐ आशुः शिशानः इति सूक्तं।१३। असौ या सेनेति तानि द्विपरि
शिष्टश्चावो जपेत्॥ सूक्तं तु प्रसिद्धं। तच्चक्षुः वसिष्ठः सूर्यः पुर उष्णिक् कुमारस्यादित्यावेक्षणे वि
नियोगः। ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतं जीवेम शरदः शतं॥
इति मंत्रेण सूर्यं निरीक्षयेदिति वदंति। तृतीये मासि सूर्यविलोकनं न कारितं चेन्निष्क्रमणेन सह
कार्यं॥ ॥इति सूर्यविलोकनं॥ ॥अथ निष्क्रमणप्रयोगः॥ ॥ततश्चतुर्थे मासि षष्ठे वा शुक्लपक्षे श्रेष्ठ
भतिथ्यादौ पिता सभार्यः सशिशुः शुभासनगः स्नातः॥ मम शिशोरायुः श्रीवृद्धिबीजगर्भसमुद्भवैनोनि
वर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं निष्क्रमणाख्यं कर्म करिष्ये इति संकल्प्य तदंगतया विहितां स्वस्ति

ना०सं०
९२

वाचनाभ्युदयिकश्राद्धान् कृत्वा इंद्राग्नियमनिर्ऋतिवरुणवायुकुबेरईशानानां आदिमतिदिशां च
चंद्रार्कवासुदेवगगनानां च यथाक्रमं तंडुलपुंजेषु पूजां च कृत्वा ब्राह्मणान् भोजयित्वा तैः स्वस्त्ययनं वाच
यित्वा सापिसंधादिकं कृत्वा शिशुं सौवर्णैः कृत्रिमैर्वाभरणैर्यथाशक्त्यलंकृत्य सर्वं न कृतं चेदिदानीमु
माग्निचंद्रधेनूनां दर्शनं कारयित्वा अश्वादिवाहनस्थः शिशुमात्रा तेन धात्र्या वाहयित्वा भार्यापुत्रविप्रब्रा
ह्मणगानवाद्यघोषयुक्तः। कनिक्रदज्जनुषमिति शाकुंतादिसुमंगलसूक्तपठनं गृहाद्बहिर्ग
त्वा मंत्रमेतमुदीरयेत्॥ चंद्रार्कयोर्दिगीशानां दिशां च वरुणस्य च॥ निक्षेपार्थमिदं दद्मि ते त्वां रक्षंतु
सर्वदा॥१॥ अप्रमत्तं प्रमत्तं वा दिवारात्रावथापि वा॥ रक्षंतु सततं सर्वे देवाः शक्रपुरोगमाः॥ एवं शिशु
रक्षणार्थं देवान् संप्रार्थ्य विघ्नशिवालययोरन्यतरद्गृहं गत्वा तत्र देवं सुमंगलवाद्यघोष
पुष्पोपहारादिभिः संपूज्य गोमयपिंडानुलिप्तचतुरस्रदेशे धान्यादि निधाय तत्र शिशुं वासयित्वा मंत्रेण
रक्षां कुर्यात्॥ मंत्रश्च। त्र्यंबकमित्यस्य वसिष्ठ ऋषिः मृत्युंजय रुद्रो देवता अनुष्टुप्॥ शिशोरक्षायां विनियो
गः॥ ॐ जूं हंसः॥ ॐ भूर्भुवः स्वः त्र्यंबकं यजामहे इति पठन्॥ ॐ जूं हंसः ॐ जूं सः ॐ हौं इत्येवंरूपम्.
मृत्युंजयं विनिमंत्र्य जपेत्। विभूत्या अक्षतैर्वा मूर्ध्नि ललाटे च रक्षां कृत्वा अपसर्पादिभिर्भूतेशान

गणेशमभ्यर्च्यशिशुंनमस्यादिभिस्तोषयित्वाऽऽशिषोवाचयित्वादेवताप्रणामंप्रदक्षिणत्रयंच
शिशुनाकारयित्वामातुलाद्याः। आसन्नबंधुगृहंप्रवेशनीत्वातत्रदानोपहारादिभिःशिशुंतोष
यित्वाब्राह्मणेराशिषोवाचयित्वास्वगृहंगत्वाब्राह्मणाराशिषोरभ्यर्चयित्वातेभ्यःसुवासिनीभ्यश्च
यथाशक्तिदक्षिणांदत्वाबंधुभिःसहभुंजीत॥ कुमार्याअप्येतत्समानं॥ होमोऽत्रकृत्वाकृतः। होम
पक्षेशिशोरलंकरणानंतरंनांदीकरणानंतरंलौकिकाग्निंप्रतिष्ठाप्यजातकर्मवदनादिशदेवताभ्यो
कृत्वाऽग्निचंद्रदर्शनादिस्वगृहगमनांतंकृत्वास्विष्टकृदादिहोमशेषंसमाप्यब्राह्मणाशीर्वा
दादिकारयेदितिक्रमः॥ ॥इतिप्रयोगरत्ने निष्क्रमणप्रयोगः॥ ॥अथोपवेशनविधिः॥ ॥पंच
ममासेशुक्लपक्षेज्योतिःशास्त्रोक्तशुभतिथ्यादौपूर्वाह्णेस्वस्तिवाचनंकृत्वावराहपृथिवीदेवौपू नाoसंo
जानहजयित्वाभूमिमुपलिप्यतत्रगोधूमधान्यादीनांमंडलंकृत्वातत्रशारदत्वसादिमांगलिकध्वनौ ९३
क्रियमाणेशिशुमुपवेशयेदिमैर्मंत्रैः। रक्षैनंवसुधेदेवीसदासर्वगतंशुभे॥ आयुःप्रमाणंनिखि
लंनिक्षिपस्वहरिप्रिये॥ अचिरादायुषस्त्वस्ययेकेचित्परिपंथिनः॥ जीवितारोग्यवित्तेषुनिर्दहस्वा
चिरेणतान्। धारिण्यशेषभूतानांमातात्वमधिकाह्यसि॥ कुमारंपाहिमातस्त्वंब्रह्मातदनुमन्य

मतामिति। ततोब्राह्मणान्पूजयित्वाऽऽशिषोवाचयित्वानीराजनाद्युत्सवंकुर्यात्॥ एवंकुमार्याअ
पि॥ ॥इत्युपवेशनविधिः॥ ॥अथान्नप्राशनप्रयोगः॥ ॥जन्मतःषष्ठेमासेऽष्टमेवादंतेषुजातेषु
वाऽसोतिशास्त्रोक्ततिथिनक्षत्रादिशुभकालेपूर्वाह्णेपित्रादिःशिशोरन्नप्राशनंकुर्यात्। अष्टमा
सेचेत्क्रियतेतदागुरुशुक्रमौढ्यादिदोषाधिकमासादिदोषश्चनास्ति॥ पित्रादिःसभार्यःशि
शुमंगलादिस्नानंकृत्वादेशकालौस्मृत्वाममास्यशिशोर्मातृगर्भमलप्राशनशुद्ध्यन्नाद्यब्रह्म
वर्चसतेजइंद्रियायुर्लक्षणफलसिद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारापरमेश्वरप्रीत्यर्थं
अन्नप्राशनाख्यंकर्मकरिष्येइतिसंकल्प्यतदंगत्वेनस्वस्तिवाचनाभ्युदयिकेकृत्वाशिशुमलंकृत्यसजा
तकर्मलौकिकाग्निंप्रतिष्ठाप्यानादेशाज्याहुतीःकृत्वाऽज्योपहारादिभिरिष्टदेवतामभ्यर्च्यततु
तःस्वदक्षिणोत्संगेवस्त्रोपरिस्थमातुरुत्संगेप्राङ्मुखोपविष्टस्यशिशोः। प्रथमान्नप्राशनंकारये
द्दधिमधुघृतमिश्रमन्नंशुभेभाजनेनिक्षिप्य॥ अन्नपतेइत्यस्यकवेरोऽन्नपतिर्जगतीशिशोरन्नप्रा
शनेविनियोगः॥ ॥अन्नपतेऽन्नस्यनोधेह्यनमीवस्यशुष्मिणः॥ प्रप्रदातारंतारिषऊर्जंनोधेहिद्विपदेच
तुष्पदेइतिमंत्रेणसुवर्णहस्तेनान्नमाहृत्यप्रथमकवलंप्राशयित्वायथेष्टंभोजयित्वामुखंप्रक्षा

ल्पवालं भूमावुपवेश्य पतद्गेषु पुस्तकशस्त्रवस्त्रादिष्वेकत्र निविष्टस्य जीविकापरीक्षां कुर्यात्
॥ शिशुः स्वेच्छया यत्प्रथमं स्पृशति सास्य जीविकेति विद्यात् ॥ ततः स्विष्टकृदादि होमशेषं समा
प्य यथाशक्ति ब्राह्मणान्भोजयित्वा दक्षिणां दत्वाशिषो वाचयित्वा बंधुभिः सह स्वयं भुंजीत ॥
होमोत्र कृताकृतः ॥ होमपक्षे सर्वे गृह्योक्तमार्गं कुर्यात् । कुमार्याश्चैतदमंत्रकं कार्यं ॥ केचि
त्तु सप्तमे मासे ॥ ॥ इत्यन्नप्राशनप्रयोगः ॥ ॥ अथ वर्धापनविधिः ॥ ॥ आदित्यपुराणे ॥ संवत्स
जन्मदिवसे स्नातो मंगलैर्वारिभिः ॥ गुरुदेवाग्निविप्रांश्च पूजनीयाः प्रयत्नतः ॥ स्वनक्षत्रं च पितरस्त
थादेवः प्रजापतिः ॥ प्रतिसंवत्सरं यत्नात्कर्तव्यश्च महोत्सवः ॥ स्वनक्षत्रदेवतां स्वनक्षत्रं चित्रपक्ष्म
ति कचित्साधः ॥ तद्यवित्तपः कुबेरः ॥ अत्र प्रयोगः प्रतिवर्षं जन्मदिने जन्मनक्षत्रे वा यजमानः स्व ना०सं०
७ गृहो सज्ज स्नात्वा सर्वौषधिजलसरित्तं कलशं संस्थाप्य तदुदकेन स्नातः शुक्लांबरधरो यथाविभ ९४
वमलंकृतो विधिवत्स्वस्तिवाचयित्वा विधिवत्कौतुकमावध्य दुर्वाहोमं कुर्यात् ॥ तत्रायं क्रमः ॥ दे
शकालौ संकीर्त्य मम अमुकशर्मणो जन्मदिवसे आयुरभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं दुर्वाहोमं करि
ष्य इति संकल्प्य विधिवदग्निं प्रतिष्ठाप्य पूर्ववत् देशकालौ संकीर्त्य समिधावाद्यास्मिन्दुर्वाहोमे देवता

परिग्रहार्थमन्वाधानं करिष्य इत्युक्त्वा अस्मिन्नन्वाहिते अग्नावित्यादि चक्षुषी आज्येनेत्यन्तमुक्त्वा प्रधा
नदेवतां मृत्युंजयं अष्टोत्तरशतं दुर्वाद्रव्येण शेषेण स्विष्टकृतमित्यादि सद्यो यक्ष्य इत्यन्तमुक्त्वा समि
धावग्नावाधाय एवं परिसमूहनाद्याज्यभागांतं कृत्वा दधिमधुघृताक्तांकुरान् [illegible] दुर्वात्रयं
त्र्यंबकमित्यस्य वसिष्ठो मृत्युंजयस्त्र्यंबको अनुष्टुप् दुर्वाहोमे विनियोगः ॥ ॐ ह्रौं जूं सः ॐ त्र्यंबकं यजाम
हे [illegible] उर्वारुकमिव [illegible] मामृतात् ॥ ॐ स्वः भुवः भूः ॐ जूं सः ह्रौं ॐ इत्यनेन मंत्रेणाष्टोत्तरशतं कृत्वा स्विष्टकृदादि हो
मशेषं समापयेत् ॥ ततो विधिवत् चरुपक्षं कृत्वा आयुष्यचरुहोमसंकल्पपूर्वकं कुर्यात् तत्रायं क्रमः ॥ दे
शकालौ संकीर्त्य अस्मिन्होमदेवतापरिग्रहार्थमित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा विश्वान्देवान्
दशवारमग्निं [illegible] जातवेदोग्निमेकवारं चरुद्रव्येण शेषेण स्विष्टकृतमित्यादि सद्यो यक्ष्य
इत्युक्त्वा समिधावग्नावाधाय परिसमूहनाद्याज्यभागांतं [illegible] प्रोक्षणांतं कृत्वा सिद्धान्नमाज्यस
स्थापेनिधाय आज्येन सह तस्त्रिः पर्यग्निं कृत्वा [illegible] नादि स्रुवसमार्जनांतं कृत्वान्नपात्रे पृथ
क्कृत्वा आवधिश्रित्य स्रुवेण [illegible] दक्षिणतो बर्हिष्यासाद्य पुनरभिधारणाद्याज्य
भागांतं कृत्वा आनो भद्रा इति दशर्चस्य गोतमपुत्रो विश्वेदेवा आद्याः पंच सप्तमी जगत्यः षष्ठी वि

राद्रस्त्रा॥ ना॥ अष्टम्याद्य॥ स्तिस्त्रस्त्रिष्टुभः चरुहोमे विनियोगः॥ एवं सर्वत्र विनियोगः॥ आनो भद्रा इति
दशर्चस्य सूक्तस्य स्वस्त्ययन प्रकारेणो लिखितं॥ इमं स्तोममिति स्य षोडशर्चस्य सूक्तस्यांगिरसः॥
कुत्सोग्नि राद्दितश्चतुर्दशजगत्यः अंत्ये द्वे त्रिष्टुभौ॥ एवदेवा भवत्विति सादित्रयः पादा देवता॥ त
ञ्चमित्रो इत्यर्चलिंगोक्ता देवता अग्निर्देवतान्या। इमं स्तोममर्हते जातवेदसे रथमिव संमहेमाम
नीषया॥ भद्राहिनः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव॥१॥ यस्मै त्वमायजसे स साध
त्यनर्वा क्षेति दधते सुवीर्यं॥ स तूताव नैनमश्नोत्यंहतिरग्ने सख्ये मा रिषामा वयं तव॥२॥ शकेम त्वा
समिधं साधया धियस्त्वे देवा हविरदंत्याहुतं॥ त्वमादित्सो ऽ आ॰ त्विं आधिर पुष्पसग्ने सख्ये॥३॥ भर
मेध्मं कृणुवामा हवींषि ते चितयंत पर्वणा वयं। जीवातवे प्रतरं साधया धियोग्ने सख्ये॥४॥ विषांगो
पा अस्य चरंति जंतवो द्विपच्च यदुत चतुष्पदक्तुभिः॥ चित्रः प्रकेत उषसो महा अस्यग्ने सख्ये०
५ त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः। विश्वा विद्वार ऽ आ॰ त्विज्यार पुष्यस
ग्ने सख्ये०६ यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित्सन्तळिदिवाति रोचसे। रात्र्याश्चिदंधो अति
दपुष्यस्यग्ने सख्ये०७ पूर्वो देवा भवतु सुन्वतो रथोस्माकं शंसो अभ्यस्तु दूढ्यः॥ तदा जानीतोत

ना०म०
९५

पुष्यता वचोग्ने सख्ये०८ वधैर्दुःशंसां अप दूढ्यो जहि दूरे वा ये अंति वा के चिदत्रिणः॥ अथा यज्ञाय गृण
ते सुगं कृध्यग्ने सख्ये०९॥ यदयुक्था अरुषा रोहिता रथे वातजूता वृषभस्येव ते रवः॥ आदिन्वसि वनिनो
धूमकेतुनाग्ने सख्ये०१०॥ अध स्वनादुत बिभ्युः पतत्रिणो द्रप्सा यत्ते यवसादो व्यस्थिरन्॥ सुगं तत्ते ता
वकेभ्यो रथेभ्योग्ने सख्ये०११॥ अयं मित्रस्य वरुणस्य धायसे वयातां मरुतां हेळो अद्भुतः। मृळा नो भूत्वे
षां मनः पुनरग्ने सख्ये०१२॥ देवो देवानामसि मित्रो अद्भुतो वसुर्वसूनामसि चारुरध्वरे॥ शर्मन्स्या
म तव सप्रथस्तमेग्ने सख्ये०१३॥ तत्ते भद्रं यत्समिद्धः स्वे दमे सोमाहुतो जरसे मृळयत्तमः॥ दधासि
रत्नं द्रविणं च दाशुषेग्ने सख्ये०१४॥ यस्मै त्वं सुद्रविणो ददाशोनागास्त्वमदिते सर्वताता। यं भद्रेण श
वसा चोदयासि प्रजावता राधसा ते स्याम॥१५॥ स त मग्ने सौभगत्वस्य विद्वानस्माकमायुः
प्रतिरेह देव॥ तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः॥१६॥ जातवेदस इत्यस्य मरीचिः क
श्यपो जातवेदाग्निस्त्रिष्टुप्॥ सर्वत्र मंत्राणां चरुहोमे विनियोगः॥ एवं सर्वत्र सप्तविंशतिमंत्रेषु विनि
योगोन्तेयः॥ एतैः सप्तविंशतिमंत्रैर्वृद्धानधूमं कृत्वा स्विष्टकृदादिहोमशेषं समाप्य वास्तुदेवनक्ष
त्रदेवतां चंद्रस्त्वन क्षत्रं वरुणं च षोडशोपचारैरभ्यर्च्य तत्सूक्तादौ कैर्मंत्रैः घृतेन ते माय यथाशक्तिहो

मंक्रु त्वा ग्रहयन्तोक्तविधिना भिषेको क्रयथानुक्तिगोभूहिरण्यादिदत्वा देवगुरुब्राह्मणसुहृद्बंधुजनस्त्रोंस्त्ववाहनायुधपीवस्तु त्रस्त्रं नां चक्रत्व मविधिवन्नांदीश्राद्धं च कृत्वा ब्राह्मणान्भोजयित्वा शुभमुहूर्ते गंधादिभिरलंकृतः स्रक्भूषणधारणपूर्वकं सुवर्णमयकटिसूत्रं नूतनवस्त्रं च धृत्वा पतिपुत्रवतीभिः स्त्रीभिर्नीराजितो ब्राह्मणाशीर्वादं गृहीत्वा स्वयं हविष्याशी जितेन्द्रियो वर्त्तेतेति ।हृदं सर्वं मावत्सा त्त तावत्सित्रादिभिः कार्यं ।। पश्चात्तु प्रतिवर्षं स्वयमेव वेति ।। तत्रात्मकाशकमंत्रास्तु। वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवो भवा इति वास्तु देवस्य मंत्रः ।। नक्षत्र देवतानां मंत्र आपस्तंबशाखायां आष्टोवाक्यानीरुद्राप्रसिद्धाः ।। आश्वलायनानां नु ग्रहणजातरजो दृष्टान शांतिविधौ उक्तं ।। नक्षत्र देवतानाममिवी आपस्तंब शाखोक्ते रष्टवाक्येर्वा घृतहोमः ।। नवो नवो भवती चंद्रस्य मंत्राः ।। तत्वायामि ब्रह्मणेति वरुण मंत्रः ।। ।। इति प्रयोगपारिजातोक्त अब्दपूर्त्तिविधिः ।। अथ तत्तु वर्षपर्यंतं प्रतिमासं तत्तः ।। ।। प्रतिवर्षमागामस्तानं कृत्वा कुमुद्रादिदेवताः संपूज्य यथाशक्ति ब्राह्मणभोजनं दक्षिणां च दत्वा सुवासिनीभिर्नीराजितो धृत नूतनवस्त्रो ब्राह्मणेभ्यः शिशुभ्यश्च अपूपशर्कराः साक्षाः कुमुदादि देवता प्रीतये आयुर्वृध्ये च वाहनानि दद्यात् ।। जन्म

ना०म०
९६

र्क्षदेवतामासे च दद्यात् ।। वर्षांते तु सुहृद्बंधुदशांवर्ज्ञ पेटिकादिस्वमोदकादिस्वाद्यं निधाय नूतनवस्त्रादिना पेटिकाः ।जीववत्सतिपुत्राभ्यो दत्वा तदा द्विस्वामा दद्यात् ।। इदं जीवंतीमंतिवपुत्रापरसुकुर्यात्।। ग्रंथांतरे तु।गणेशं ग्रहानिष्टदेवतां मार्कंडेयं च संपूज्य प्रार्थयेत् ।। मार्कंडेय नमस्तेस्तु सप्तकल्पांतजीवन।कुरुष्व मुनिशार्दूल तथा मां चिरजीविनं ।। ततः मार्कंडेय महाभाग सप्तकल्पांतजीविन ।। आयुरारोग्यसिध्यर्थमस्माकं वरदो भव।सतिलगुडसंमिश्रं मंजल्यर्धमितं पयः।मार्कंडेयाद्वरं लब्ध्वा पिबाम्यायुर्विवृद्धये ।। इति सतिलमंजल्यर्धमितं दुग्धं पिबेत् ।। अश्वत्थामा बलिर्व्यासो हनुमांश्च विभीषणः । कृपः परशुरामश्च सप्तैते चिरजीविनः।सप्तैतान्संस्मरेन्नित्यं मार्कंडेयमथाष्टमं ।जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः।इति नारदवचनादश्वत्थामादीन्मार्कंडेयांतानष्टौ स्मरेत्।।पुरंदरवद्भूपितं यदि जन्ममासो संक्रांतेस्तदा शुद्ध एव कार्यं न त्वधिके।। ।।इति वर्धापनप्रयोगः समाप्तः ।। अथ चौलं ।। तत्र कालस्तावत् ।। प्रथमे द्वितीये तृतीये पंचमे सप्तमे वा वर्षे गते तृतीयभागे भगत तृतीयभागे वा उपनीतासह वा यथाकुलधर्मं चौलं कार्यं ।। तत्रापि द्वितीया तृतीयभागे भगत तृतीयभागे वा उपनीतासह वा यथाकुलधर्मं चौलं कार्यं ।। तत्रापि द्वितीयादेवर्षे जन्मतो मुख्यमतं गौणं ।। उदगयने शुक्लपक्षे गुरुशुक्रयोर्बाल्यवार्धकास्तमयाभा

वेअक्षयेनधिकेचमासिउपोतिथः शास्त्रोक्तप्रशस्ततिथिवारलग्नेशुभमुहूर्तेदिनएवनतुरात्रौ
कार्यं। इदंकर्मलौकिकाग्नौतंनामसम्भृत्य। यदिगर्भाधानादिसंस्कारलोपस्तदाप्रायश्चित्तंकृ
त्वाकालोस्ययानिमित्तंप्रायश्चित्तहोमंकृत्वाचौलहोमः कार्यः तदाहभगवान् आरभ्याधानमाचौ
लात्कालेतीतेतुकर्मणां॥ व्याहृत्याज्यंसुसंस्कृत्यकृत्वाकर्मयथाक्रमं। कार्यमितिशेषः प्रायश्चि
त्तंचसएवाह। एतेष्वेकैकलोपेतुपादकृच्छ्रंसमाचरेत्॥ चूडायाअर्धकृच्छ्रःस्यादापदित्वेयमा
रितं॥ आपदितुसर्वत्रद्विगुणंद्विगुणंभवेत्। मनुः जातकर्मादिसंस्काराः स्वकालेनभवंतिचेत्
। चौलादर्वाक्प्रकुर्वीतप्रायश्चित्तादनंतरं॥ प्रायश्चित्ते कृते होमे तत्तत्कर्मकृताकृते॥ तथाचका
रिका॥ प्रायश्चित्तेकृतेपश्चात्ततीतमिकर्मवै। कार्यमित्येके आचार्याः प्रायश्चित्तस्मेतुविपश्चितः प्रायश्चि ना०५०
त्तहोमस्तुप्रधानहोमास्तुवैसमस्ताभिस्त्रिया हुतिभिः। प्रत्येककर्मलोपेएकैकाज्याहुतिः कार्येति॥ ७१
अथचौलप्रयोगः॥ ॥उक्तेतृतीयादौवर्षेउदगयनेशुक्लपक्षेप्रशस्ततिथिवारनक्षत्रयोगयुतेषु
मेमुहूर्तेकुमारस्यचौलकर्मकरिष्यन्। कर्तापिवृद्धः स्वस्तिवाचनपूर्वकंनांदीश्राद्धंग्रहयज्ञमंकु
रार्पणंचकृत्वापरेद्युः कृतमंगलस्नानंकुमारमलंकृत्यब्राह्मणैः पुण्याहवाचनपूर्वकंनांदीश्राद्धं

नांदीश्राद्धंग्रहयज्ञमंकुरार्पणंचकृत्वापरेद्युः कृतमंगलस्नानंकुमारमलंकृत्यब्राह्मणैः पुण्याहं
वाचयित्वामातुर्दक्षिणतः कुमारमुपवेश्यपूर्वेद्युः कालोऽस्मिन्नमुष्यकुमारस्यबीजगर्भसमुद्भवैनो
निबर्हणेनबलायुर्वर्चोभिवृद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंचौलाख्यंकर्मकरिष्ये इतिसंकल्प्यतदंगमेमु
कृत्वैस्थंडिलोपलेपनादिसभ्याग्निप्रतिष्ठांतंकृत्वापुनर्देशकालौनिर्दिश्यममास्यक्रियमाणेचौलकर्मणि
देवतापरिग्रहार्थमन्वाधानंकरिष्ये अस्मिन्नन्वाहितेअग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वा अत्राग्निं
पवमानंप्रजापतिंचेतिप्रधानदेवताआज्यद्रव्येणशेषेणस्विष्टकृतमित्याद्युक्त्वासमिद्द्वयमग्नावाधा
यपूर्णपात्रनिधानांतंषट्पात्रप्रयोगादितंत्रंकृत्वा उष्णशीतोष्णुदर्भेषु॥ व्रीहियवमाषतिलैः पृथक्
पृथक्पूरितानिनवानिशरावाणिचत्वारिकर्मणैकैकशः आकृतंस्थाप्यासादयेत्॥ माताप्रस्तराग्रेण
सोत्तरस्यकर्तुर्दक्षिणतः कुमारमुत्संगेकृत्वासीत॥ ततः कुमारेणान्वारब्धः कर्तापुरस्तन्नमाधारांत
कर्मकृत्वा अग्नआयूंषिपवसइतितिसृणांशतंवैखानसाऋषयः अग्निः पवमानोदेवतागायत्रीछंदः चौल
कर्मप्रधानाज्याहुतिहोमेविनियोगः॥ ॐ अग्नआयूंषिपवसआसुवोर्जमिषंचनः। आरेबाधस्वदुच्छु
नांस्वाहा। अग्नयेपवमानायेदंनमम॥ ॐ अग्निर्ऋषिःपवमानःपांचजन्यःपुरोहितः। तमीमहेमहागं

यंस्वाहा॥ अग्नयेपवमानायेदंनमम॥ अग्नेआयूंषिपवसआसुवोर्जमिषंचनः। आरेबाधस्वदुच्छुनांस्वाहा॥ अग्नयेपवमानायेदंनमम॥ अग्नेपवस्वस्वपाअस्मेवर्चः सुवीर्यं। दधद्रयिंमयिपोषं
स्वाहा। अग्नयेपवमानाय० प्रजापतयेहिरण्यगर्भः प्रजापतिस्त्रिष्टुप्प्रजापत्याज्यहोमेविनियोगः।
प्रजापतेनत्व० स्वाहा। प्रजापतयइदं० ततः शीतमुष्णं चोदकेजले दक्षिणवामकरयोर्गृहीत्वा उष्णेनवा
युरुदकेनेहीतिमंत्रेणयुगपत्प्रियत्सदेत्तामगृहीत्वानवनीतेनदधिद्रप्सेनवामिश्रयित्वाकुमारस्यवा
मकर्णमारभ्यदक्षिणंकर्णंयावत्केशानार्द्रयित्वा पडंद लुवर्चस इतिमंत्रेणशिरस्त्रिवारंकेदये
त्॥ प्रतिकेदनंमंत्रावृत्तिः। ततोब्रह्मणहस्तस्थितेकविंशतिकुशपिंजूलमध्यात्त्रीणिकुशपिंजूलमा
दायकुशाग्राणितेन्नमस्थितेनपिंमंत्रेणकुमारशिरसिपश्चिमाग्रेषुतस्यदक्षिणकेशभागेनिधा
यलोहिताम्रमयंक्षुरं॥ ओंस्वधितेमैनंहिंसीरितिमंत्रेणनिधायपयेनावपन्सवितास्रुरेणसोमस्यराज्ञोवरु
णस्यविद्वान्। तेनब्राह्मणोवपतेदमस्यायुष्मान्जरदृष्टिर्यथासदितिमंत्रेणसकेशानिकुशपिंजूलानि
छित्वाग्राणिनिदध्यात्॥ एवंद्वितीयादिछेदनेषुपिंजूलनिधानादिमंत्रकंकार्यं॥ छेदनमंत्रे। तेनविद्वा
न्॥ येनधातावृहस्पतेरग्नेरिन्द्रस्यचायुषेवपत्। तेनतआयुषेवपामिसुश्लोक्याय स्वस्तयइतिद्वितीय
छेदने॥ येनभूयश्चरात्र्यांज्योक्चपश्यातिसूर्यं। तेनतआयुषेवपामिसुश्लोक्याय स्वस्तयइतितृतीयेछे

ना०अ०
५६

दने॥ चतुर्थेपिन्नयोः मंत्राः येनावपत्सविता० येनधाता० येनभूयश्चेतित्रयोमंत्राः। एवंदक्षिणकेशा
भागेचत्वारिछेदनानिकृत्वोत्तरेपिकेशभागेएवंप्रत्येकमेवमंत्राद्यानित्रीणिछेदनानिकुर्यात्॥ नतुसर्वेषु
भागेचत्वारिछेदनानिकृत्वोत्तरेपिकेशभागेएवं ततःपृष्ठतःकेशान्॥ अधिक्षारमसिस्वायुः प्रमोरि
त्रेश्मनुर्यततः ओंयत्क्षुरेणमर्चयतासुपेशसावप्तावपसिकेशान्॥ शुंधिशिरोमास्यायुः प्रमोषीरि
तिमंत्रेणाग्नेतत्क्षुरस्यमूलंक्षुरधारांनिमृज्य॥ नापितमाहूययत्क्षुरेणेतिमंत्रेणशिरस्तथाकुर्वितिप्रे
ष्यनकुशलीकुर्वितिप्रेषेणानुशास्यतत्प्रेषार्थंचावबोध्यनापितेनएवंविधिविधिवितन्नीतोस्त्वक्षुर
रादिकृत्कुमारशिरोयथाकुलाचारंकृत्स्नंशिरखंवापयित्वाकुमारस्नापयित्वाभूषयित्वा
रात्क्रतंकुमारशिरोयथाकुलाचारंकृत्स्नंशिरवंवापयित्वाकुमारस्नापयित्वाभूषयित्वा
ववन्मातुरुत्संगेवस्थाप्यस्विष्टकृदादिहोमशेषंसमाप्यब्रह्मादिसर्णशराववचतुष्टयंनापिता
यदद्यात्। भूयसीदक्षिणांदत्वाब्राह्मणेभ्योदशसंख्याकेभ्योभोजनंचसंकल्पकमंसंपूर्णतां
वाचयित्वायस्यस्मृत्याचेत्युक्त्वा॥ विसृज्यनमस्कृत्यआशिषोब्राह्मणोक्ताःस्वपकुमारस्यगृहीत्वा
न॥ एतच्चदंकुमार्याःप्रथमंत्रकंहोमस्तलसमंत्रकंहोमस्तसमंत्रकइति। मध्येशिरसिचूडास्था
नंशिरसिष्टानांदक्षिणे। उभयोःपार्श्वयोरेत्रिकद्वपयानांशिरखामात॥ शिखोपशिखोतेहिगर्भिण्यां
चूडाकर्मनकारयेत्॥ सहोपनीसाकुर्यात्तदातदादोषोनविद्यते॥ ॥इतिचूडाकर्मप्रयोगः॥ ॥अथो

पनयनं॥ ॥ तत्र जन्मतोष्टमेष्टमे वा द्वेष्यं कार्यं। अष्टे तु धनकामस्य विद्याकामस्य सप्तमे॥ अष्टमे सर्व
कामस्य नवमे कान्तिमिच्छतः तथा संग्रहे। सप्तमे वाष्टमे वर्षे नवमे दशमे तथा। एकादशे द्वादश
शे वाप्युपनेयो द्विजायः ब्रह्मवर्च[illegible]मायुष्यं तेजो श्राद्धं तथैव च॥ पञ्चकामसमायोगाद्वै प्राप्नुवन्ति
यथाक्रमं॥ नृसिंहः। उत्तरायणगते सूर्ये कर्तव्यं चोपनायनं॥ स्मृतिः। वसंते ब्राह्मणमुपनयीत
।वराहः। माघादिपंचमासेषु मेखलाबंधनं द्विजः। ज्येष्ठमासे न ज्येष्ठस्य जन्ममासे न सर्वेषां। शु
क्लपक्षे द्वितीयादिस्वाध्यायतिथिषु नानध्यायेन नैमित्तिकानध्याये रवौ गृहे गुरु शुक्रे शुभचंद्रे दोषु
रु शुक्रयोर्बाल्यवार्धक्यास्तराहित्ये दोषु तिर्विलोकितशुभकाले उपनयनं कार्यं॥ उपनयने तत्क्रम
माह वृद्धगर्गः॥ पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः। उपनयने धिकारिस्यात्पूर्वाभावे पर
ः परः तथा। पितैवोपनयेत्सुतं तदभावे पितुः पिता॥ तदभावे पितुर्भ्राता तदभावे तु सोदरः॥ ना०प्र०
अधिकारस्तिरूपे प्रायश्चित्तमाह विष्णुः। कृच्छ्रत्रयं चोपनेता त्रीन् कृच्छ्रान्बटुश्चरेत्। आचार्योद्वा ८८
दशसाहस्रं गायत्रीं जपेत्। तथा। नांदीश्राद्धे कृते पश्चादनध्यायस्त्वकालिकः। मौंजीबंधं तथा
कुर्याद्विद्यारंभं न कारयेत्। अकालिकः। गर्जनिर्घातादिनिमित्तकः। आश्वलायनानामुपनयनदिने

सर्ववेदादिसावेक्षणभूमिस्पर्शग्रंथोदनप्राशननिवेदनानि कुर्यात्। ततआचार्यो महाव्रतस्थाने उ
पनिषदे स्वाहेति कृत्वा सर्वमनुप्रवचनीयं कुर्यात्॥ आचार्योप्यवश्यमेव महाव्रताध्ययनादिकं कु
र्यात्॥ इत्युपनिषद्व्रतानि॥ ॥ इति प्रयोगरत्ने महानाम्न्यादिव्रतत्रयं समाप्तं॥ ॥ अथ गोदा
नव्रतप्रयोगः॥ ॥ जन्मतः षोडशे वर्षे उदगयने शुक्लपक्षे चौलोक्ततिथ्यादौ गोदानं कुर्यात्॥ त
त्र एवं धुराचार्यः॥ कृतनित्यक्रियः॥ कृतस्नानो ब्रह्मचारिणं दक्षिणत उपवेश्य प्राणानायम्याति
थ्यादि संकीर्त्य अस्य ब्रह्मचारिणो गोदानकर्म तंत्रेण तदंगस्वस्तिवाचनं कुर्यात् पूर्णं गृहयज्ञाभ्युदयि
कानि करिष्य इति संकल्प्य॥ तानि क्रमेण कृत्वा परेद्युः कृतनित्यक्रियं बटुं दक्षिणत उपवेश्य को
तुकमाबध्य॥ गुरुर्नत्वा उपलेपनाद्यग्निप्रतिष्ठापनांतं कृत्वा पुनर्देशकालौ स्मृत्वा मया क्रिय
माणे गोदानहोमे देवतापरिग्रहार्थं मन्त्वाधानं करिष्ये॥ अस्मिन्नन्वाहिते ग्रावि साद्या धारा वाज्ये
ने संतमुक्त्वा त्रिरग्निपवमानप्रजापतिर्देवताः॥ आज्येन शेषेण स्विष्टकृतमित्याद्युक्त्वा समि
ध्यमग्नावाधाय पूर्णपात्रनिधानांतं कृत्वोदकेग्नेः सात्पर्णदर्भेषु व्रीहियवमाषतिलैः इ
थक्पूरितं नववृषंगवचतुष्टयं क्रमेणैककशः प्राक्तसमोसाद्यप्रत्यगग्नेरासीनस्य क

न्नेर्दक्षिणे बटोर्माता प्राङ्मुखासीत। मातुः पुरस्तादग्नेः पश्चादानुडुहमा कुक्कुरावं शमीपर्णा
रावं च स्थापयेत्। ततो ब्रह्मैकविंशतिकुशांकुरांस्तद्धारतो मातुर्दक्षिणतो तिष्ठेत्। ततो बटो
नान्वारब्धः कर्त्ता पूर्ववत्तन्त्रमाघारान्तं कृत्वा॥ अत्र आयुषा सादि चतुर्भिर्मन्त्रैः पूर्ववद्दार्वा
ज्याहुती हुत्वा देशास्रागो कृत्वा उष्णशीतजले पात्रांसां पृथग्गानीय बटोः पश्चिमतः स्थि
त्वा तदुदकमसमिन्नपात्रे पाणिभ्यां उष्णेन वाय उदकेनेहीति युगपन्निनाय तदेकदेशं न
वनीतं दनद्ध्या वा मेलयित्वा बटोर्वामश्मश्रुप्रदेशमारभ्य प्रदक्षिणं अदितिः श्मश्रूणि
वपयित्वाप उन्दन्तु वर्चस इति मन्त्रावृत्ता त्रिः श्मश्रूण्येवं क्लेदयित्वा ब्रह्महस्तस्थैकविंशा
तिकुशांकुरेषु त्रीन्कुरानादाय बटोरभिमुखं पश्चिमाग्रान्कृत्वौषधे त्रायस्वैनमिति
दक्षिणश्मश्रुभागे निधाय तेष्वंकुरेषु त्रीन्कुरानादाय बटोरभिमुखपश्चिमाग्रान्कृ
त्वौषधे त्रायस्वैनमिति दक्षिणश्मश्रुभागे निधाय तेष्वंकुरेषु ताम्रमयं क्षुरं स्वधिते
मैनं हिंसीरिति निधाय॥ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य वि
द्वान्। तेन ब्रह्माणो वपतेदमस्यायुष्माञ्जरदष्टिर्यथासदिति सहस्तेनकुशान्कु

ना०सं०
११३

शांकुरान्छित्वा सशमश्रुकान्शरावस्थशमीपर्णैरक्तौ कृत्स्नमातुः करे दद्यात्। सा च तानानडुहे गो
मये अग्नेरुत्तरतो निदध्यात्॥ एवं द्वितीयादिच्छेदने कुशांकुरत्रयनिधानादि समन्त्रकं कार्यं विशेषस्तु
मन्त्रे। येन धाता बृहस्पतेरग्नेरिन्द्रस्य चायुषेऽवपत्। येन त आयुषे वपामि सुश्लोक्याय स्वस्तये इति मं
त्रो द्वितीयच्छेदने। येन भूयश्च रात्र्यां ज्योक्च पश्याति सूर्यम्। तेन त आयुषे वपामि सुश्लोक्याय स्वस्तये
इति मन्त्रो द्वितीयच्छेदने॥ चतुर्थे त्विमे त्रयोऽपि मन्त्राः॥ एवं दक्षिणश्मश्रुभागे च्छेदनानि कृ
त्वोत्तरभागे तथैव त्रीणि छेदनानि आदितो मन्त्रत्रयेण कुर्यान्न च चतुर्थं॥ ततः क्षुरधारां निम
ज्य। यत्क्षुरेण मर्चयता सुपेशसा वप्ता वपसि केशश्मश्रूणि। शुन्धि मुखं मास्यायुः प्रमोषीरिति॥
प्रयत आरभ्य मूलमवमृज्य। नापितमाहूय शीतोष्णाभिरद्भिरर्थं कुशलः क्षुरेण कुशलो केशा
श्मश्रुलोमनखान्युदकसंस्थानि कुर्वीत॥ प्रेष्यप्रैषार्थं चावबोधतः। पूर्वस्मिन्काले बसिष्ठः आतो श्म
श्रुशिर उपपाणिना कृत्स्नकेशश्मश्रुलोमनखान्युदकसंस्थानि वापयित्वा स्नानं बटुः पूर्ववदु
पविश्य स्विष्टकृदादि होमशेषं समापयेत्। ब्रीह्यादिपात्रचतुष्टयं नापिताय दद्यात् ततो बटुरहःशे
षं मौनेन नत्वा वंदित्वा सायं संध्यो गुरोरंतिकं गत्वा वरं ददामीति वाचं विसृजेत् तस्मै अनडुह

गं च दक्षिणां तेन वाचयित्वा वादयीत ॥ ततः परिद्युः संस्कारं केशान्तमप्यपि कृत्वा पूर्वोक्तं ब्रह्मचारिनिय
मेन गुरुसमीपे व्रतं चरेत् ॥ ॥ इति भट्टकृते प्रयोगरत्ने गोदानव्रतप्रयोगः ॥ ॥ अथ ब्रह्मचारिव्र
तलोपप्रायश्चित्तं ॥ तत्र बौधायनः ॥ ॥ अथ शौचाचमनसंध्यावंदनदर्भभिक्षाग्निकार्याहिसशू
द्रादिस्पर्शनकौपीनकटीसूत्रयज्ञोपवीतमेखला ॥ दंडाजिनत्यागदिवास्वापछत्रधारणपादुका
धारोहणमालाधारणोद्वर्तनानुलेपनांजनजलक्रीडाद्यूतनृत्यगीतवाद्याद्यभिरतिमांसखंडा
हिंसाभाषणपर्युषितभोजनादिब्रह्मचारिव्रतलोपसकलदोषपरिहारार्थं ब्रह्मचारी कृच्छ्रत्रय
चरेत् ॥ महाव्याहृतिहोमं च कुर्यादिति बौधा ॥ लौकिकाग्निं प्रतिष्ठाप्य ॥ अस्मिन्नन्वाहितेऽग्नौ विसादि
चक्षुषी आज्येनेत्यन्तं कृत्वा ॥ अग्निं पृथिवीं महान्तं । वायुमन्तरिक्षं ।२। आदित्यं द्यां महान्तं ॥३। चंद्र
मसं नक्षत्राणि दिशः महान्तं ॥ अग्निं ।५। अग्निं विश्ववेदसं ।६। विभावसुं ।७। शतक्रतुं ।८। अग्निं ।९ ना॰प्र॰
अग्निं ।१०। अग्निं वायुं सूर्यं प्रजापतिं चैताः ॥ प्रधानदेवताः ॥ आज्येन तंत्रेण स्विष्टकृतमित्यादि १२५
सद्यो यक्ष्ये ॥ प्रथमं समस्ताभिर्व्याहृतिभिस्तत्रस्थाहुतीः कृत्वा ॥ ॐ भूरग्नये च पृथिव्यै च महते
स्वाहा ॥ ॐ भुवो वायवे चांतरिक्षाय च स्वाहा ॥ ॐ सुवरादित्याय च दिवे च महते च स्वाहा ॥ ॐ भूर्भुवः स्व

श्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते स्वाहा ॥ ॐ पाहि नो अग्न एनसे स्वाहा ॥ ॐ पाहि नो अग्न एनसे स्वाहा
॥ ॐ पाहि नो अग्ने विश्ववेदसे स्वाहा ॥ ॐ यज्ञं पाहि विभावसो स्वाहा ॥ ॐ सर्वं पाहि शतक्रतो स्वाहा ॥ ॐ
पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा ॥ पुनर्नः पाह्यंहसः स्वाहा ॥१॥ ॐ सह रय्या निवर्तस्वाग्ने पिन्वस्व धा
रया विश्वप्स्न्या विश्वतस्परि स्वाहा ॥ पुनराहुतिभिः कृत्वा स्विष्टकृदादि होमशेषं समापयेदिति ॥ ए
तच्च धर्मलोपप्रायश्चित्तं ॥ बहुधा धर्मलोपे तु प्रायश्चित्तं विशेषमाह विधानं शौनकेनोक्तः ॥ तत्र बौ
धायनः जपेन्मंत्रेण ध्रुवं चैत्रे शिवालये ॥ ब्रह्मचारी च धर्मं च ... रिहन्मिदं तदिति ॥ तत्र बौधाय
नः स्याद्विष्टं प्रत्ते ... सह ध्वंसनाव ... मनिमानः सुब्रह्मण्यो विश्वामित्रो हिरण्यो इति
बौधायनमंत्रः ॥ महानाम्न्यादिव्रतेषु ... पुनर्व्रतं मारभेतेति
स्मृत्यर्थसारे ॥ ॥ इति प्रयोगरत्ने ब्रह्मचारिव्रतलोपप्रायश्चित्तं ॥ ॥ अथ समावर्तनप्रयोगः ॥
तत्राचरितब्रह्मचर्यनियमो महानाम्न्यादिव्रतचतुष्टयो ब्रह्मचारी विद्यां गुरुमर्यादानेन संप्र
प्य तेनानुज्ञातो ज्योतिर्विमुक्ते शुभे काले आचार्यगृहे समावर्तनं नामकर्म कुर्यात् ॥ तत्रायं क्र
मः ॥ पूर्वेद्युस्तिष्यादि संकल्प्य मम शौचाचमनादि सर्वब्रह्मचर्यनियमलोपप्रायश्चित्तं कृत्वा ॥

श्रीपरमेश्वरप्रीत्यर्थं होमपूर्वकं कृच्छ्रत्रयमाचरिष्ये इति संकल्प्य लौकिकाग्निं प्रतिष्ठाप्याज्यहो
मधर्मेणान्वाधानं सर्वं कृत्वा काष्ठादग्नौ कृत्वा कृच्छ्रप्रत्याम्नायत्वेन कल्पितगोदानाति
जसहस्रहोमसहस्रगायत्रीजपादिष्वन्यतमं चरित्वा होमशेषं समापयेत्। महाना॰
म्न्यादिव्रतलोपप्रायश्चित्ते प्रत्येकं गायत्र्या अष्टविंशतिमष्टौ वाज्याहुतीर्हुत्वा एकैकं कृच्छ्रं चरित्वा शुभ
दिने महानाम्नीव्रतं कृत्वा तथैव महाव्रतादित्रयं कृत्वा तेनानुज्ञातो मणिपादीमेकादशोपकल्प
येत्॥ तानि च मणिं कुण्डले वस्त्रयुग्मं छत्रमुपानद्युगं दण्डं स्रजं णाकबीजकुरजफलपिष्टं श्रीखण्डा
द्यनुलेपनमाञ्जनमुष्णीषमिति॥ एतान्यात्मने चाचार्याय च यद्युभयोर्न विद्यते तदाचार्यायैव संपाद्या
नि। यस्मिन् दिने समावर्तनं तस्मिन् प्रातरपराजितां दिशं गत्वा यज्ञियवृक्षस्यैकामार्द्रां शाखां छि ना०प्र०
त्वाश्रमं प्रविश्य तां समितां समिधमाहृत्य सम्भृतस्यत्रोपरि निदध्यात्॥ अथ क्रमः॥ ब्रह्मचारी कृ ११५
तनित्यक्रियः॥ कृतप्रातरग्निकार्यः प्राणानायम्य तिथ्यादि संकीर्त्य मम गृहस्थाश्रमाधिकार
प्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं समावर्तनं करिष्ये इति संकल्प्य तदङ्गभूतस्वस्तिवाचनाङ्कु
रार्पणगृहयज्ञनान्दीश्राद्धानि करिष्ये इति संकल्प्य सर्वं कृत्वा प्रागुक्तलक्षणां समिधमा॰

हृत्योपरि निधाय ब्रह्मचर्यव्रतं संसर्जयेद्ब्राह्मणाय गां दत्त्वा ऋत्विजान् भोजयित्वा विधिवत्कौतुकमाबध्यास्मु
मकाले स्थण्डिलोपलेपाद्यग्निप्रतिष्ठापनान्तं कृत्वा पुनर्दैवज्ञेन निर्दिष्टसमये क्रियमाणे समावर्तनहोमे
देवतापरिग्रहार्थमन्वाधानं करिष्ये॥ अस्मिन्नन्वाहितेऽग्नावित्याद्याघारावाज्येनेत्यन्तमुक्त्वा त्रिरग्निं पव
मानं प्रजापतिं चैकैकया। प्रधानदेवता आज्येनाग्निं पूर्णमसिधां विश्वान्देवान् द्वाभ्यां समिद्भिः शेषेण
स्विष्टकृतमित्यादि सद्यो यक्ष्ये। इत्युक्त्वा समिद्द्वयमग्न्यादाधाय परिस्तरणानि च। त्वा। रिक्षारा
वाणि क्रमेणैकैकशः आज्यसंस्कारमासादयेत्। ताम्रमयं लौहं वा क्षारं तत्र शुक्लं चोदकं नवनीतं दधि
द्राक्षात्वा मणिपादीन्येकादशद्रव्याणि चाग्नेरुत्तरत आसादयेत्॥ ततः प्रत्यगग्नेरेकासीनस्य कर्तुर्द
क्षिणतो माताऽऽचार्यो वाऽऽसीदेत॥ तस्याः पुरः अग्नेः पश्चात् एकस्मिन्नुदशरावेऽपां पूर्णमपरस्मिन्नानु
डुहं गोमयमासादयेत्॥ ततो ब्रह्मैकविंशतिकुशाङ्कुरान् दधानो मातुर्दक्षिणतस्तिष्ठेत्॥ त
तो ब्रह्मचारी पुरस्तात्तन्त्रमाघारान्तं कृत्वा अग्न आयूंषीति तिसृणां शतं वैखानसा ऋषयः॥
अग्निः पवमानो देवता गायत्री छन्दः प्रधानाज्यहोमे विनियोगः॥ ॐ अग्न आयूंषि० स्वाहा। अ
ग्नये पवमानायेदं न ममेति सर्वत्र त्यागः॥ ॐ अग्निर्ऋषिः॥ तामीमहे० स्वाहा। अग्नये पवमाना॰

यवमानायेदं न ममेति॥ ॐ अग्नेपवस्व० ऋधक्ष्यि० अग्नेयेपव० प्रजापते हिरण्यगर्भः प्रजापतिस्त्रि
ष्टुप्प्रधानास्वहोमे विनियोगः। प्रजापते० स्वाहा प्रजापतय इदं॥ ततो ब्रह्मोसितोष्णवारिणी पा
त्रोष्मांष्टथगानीय वटोः॥ पश्चिमदेशे स्थित्वा तत्र उदकमसिञ्चन्मन्त्रे ॐ उष्णेन वाय उदकेनेहि
मन्त्रे० त्युगपत्त्रिनीय तदेकदेशं गृहीत्वा नवनीतेन दध्ना वा मिश्रयित्वा वटोर्दक्षिणश्मश्रुदेशमा
रभ्य प्रदक्षिणं॥ ॐ अदितिः श्मश्रूणि वपत्वाप उन्दन्तु वर्चसे। इदं मन्त्रं प्रतिच्छेदं नमावर्त्यं स्त्रिवारं
श्मश्रूण्यपवृक्लेदयेत् ततः स्वहस्तस्थितेष्वेकविंशतिकुशांकुरेषु त्रीनंकुरान्गृहीत्वा दक्षिणश्मश्रुभागे
ब्रह्मचारिमुखं पश्चिमाग्रं निदध्यात्॥ तदा ब्रह्मचारी स्वधीते मा मा हिंसीः येनावपत्सविता क्षुरेण
सोमस्य राज्ञो वरुणस्य विद्वान्। तेन ब्रह्माणो वपतेदमस्यायुष्मान् जरदष्टिर्यथासदिति जपे ना०सं०
त्। ततो ब्रह्मचारिणा येनावपदिति मन्त्रे उच्चारिते ब्रह्मा तास श्मश्रूणि सकुशांकुरान्छित्वाता ११६
न्कुरान्प्रागग्रान् शरावस्थशमीपर्णैः सहैकीकृत्य मातुः करे दद्यात्॥ सा च तान् शमीपर्ण
कुशांकुरानानडुहे गोमये प्रागग्रान्निदध्यात्॥ एवं द्वितीयादिछेदनेषु कुशांकुरादित्रय
निधानादि समं त्रैकं कार्यं॥ द्वितीयछेदने तु येन धाता बृहस्पतेरग्नेरिन्द्रस्य चायुषेऽवपत्। ते

न त आयुषे वपामि सुश्लोक्याय स्वस्तये इति मन्त्रेण ब्रह्मचारिणा उच्चारिते ब्रह्मा छेदनादि सर्ववत्॥ इति
द्वितीयछेदनं॥ तृतीयछेदने तु। येन भूयश्च रात्र्यां ज्योक् च पश्याति सूर्यं। तेन त आयुषे० इति मन्त्रेण
ब्रह्मचारिते ब्रह्मा छेदनादि सर्ववत्॥ इति तृतीयछेदनं॥ चतुर्थछेदने तु येनावपत्सविता० येन
धाता बृहस्पते० येन भूयश्च रात्र्यां इति त्रिष्वपि मन्त्रेषु ब्रह्मचारिणोच्चारितेषु सत्सु ब्रह्मा छेदनादि
सर्ववत्॥ इति चतुर्थछेदनं॥ एवं दक्षिणश्मश्रुभागे चत्वारि छेदनानि कृत्वोत्तरश्मश्रुभागेप्य
नयारीत्याः श्मश्रूणि त्रीणि छेदनानि प्रत्येकं मन्त्रैः कुर्यात्। न तु सर्वैर्मन्त्रैश्चतुर्थं। ततः क्षुरेण
मर्चयता सुपेशसा वप्ता वपस श्मश्रूणि॥ शुन्धि शिरो मुखं मा म आयुः प्रमोषीरिति अनेनाग्र
त आरभ्य सलोमनखमज्ज नापितमाहूय॥ शीतोष्णाभिरद्भिरवधर्यकुर्वाणो क्षुरमेव न कुशलीकु
र्विति प्रैषेणानुज्ञाप्य प्रैषार्थं चावबोधनापितः सर्वान् शीतोष्णाभिरद्भिराहृत्सकेशार
श्मश्रुलोमनखान्वापयित्वा तच्छिद्रादिपात्रे चतुष्टयं नापिताय दद्यात्। ततः
करंजपष्टेन स्वशरीरस्य हस्तशीतोष्णैरुदकैः स्नात्वा शिरा नभ्यपुनर्वह्निरितिकं गत्वा एकं वस्त्रं
समन्त्रे परिधायाग्नस्य दक्षिणभागे गृण्यात्॥ तन्त्रमन्त्रः। युवं वस्त्राणि सस्परो घृतमामित्रावरुणो

त्रिष्टुप्। वस्त्रपरिधाने विनि०। ततो द्विराचम्य पाणिनांजनमादाय। ॐ अश्मनस्तेजोसि चक्षुर्मे पा
हीति मंत्रेणानृसादक्षिणसव्यचक्षुषी क्रमेणांजयेत्। तथैवं ॐ अश्मनस्तेजोसि श्रोत्रं मे पाहीति
मंत्रेण कुंडलं सादक्षिणसव्ययोः श्रोत्रयोरलंकृत्य कुंकुमाद्यनुलिप्ताभ्यां पाणिभ्यां मुखमनु
लिप्य पश्चादितरांगान्यनुलिप्य करौ प्रक्षाल्य स्रजनात्रसानात्रोहंभूयासमित्यनेन शिरसि स्र
जं बध्वा। ॐ देवानां प्रतिष्ठस्थः सर्वतो मां पातेति अनेन चर्ममय्यावुपानहौ दक्षिणसव्याभ्यां
पादाभ्यामारुह्य ॐ दिवः पल्लासीति मंत्रेण छत्रं धृत्वा॥ ॐ वैणवोसि वानस्पत्योसि सर्वतो मां
पाहीति वैणवं दंडं गृहीत्वा आयुष्यमिति सूक्तेन स्वर्णमणिकं कंठे बध्नीयात्॥ आयुष्यमिति
सूक्तस्य सनकसनंदनसनातनादयऋषयः॥ हिरण्यं देवता। आद्यास्तिस्रोनुष्टुभः। पंचमी
त्रिष्टुप् षष्ठ्यनुष्टुप् सप्तम्यतिजगती। अष्टमी नवमी त्रिष्टुभौ दशम्यनुष्टुप् एकादशी जगती कं ना०सं०
ठे मणिधारणे विनियोगः॥ आयुष्यं वर्चस्यं रायस्पोषमौद्भिदं॥ इदं हिरण्यं वर्चस्वज्जैत्रायाविश ११३
तादु मां॥१॥ उच्चैर्वादि पृतनाजित् सत्रासाहं धनंजयं॥ सर्वाः समग्रा ऋद्धयो हिरण्येस्मिन्समा
हिताः॥२॥ शुनमहं हिरण्यस्य पितुर्नामेव जग्रभ। तेन मां सूर्यत्वचमकरं पुरुषप्रियं॥३॥ संम्रा

जं च विराजं चाभिष्टिर्या च मे ध्रुवा। लक्ष्मी राष्ट्रस्य या मुखे तया मामिंद्र संसृज॥४॥ अग्नेः प्रजातं परि य
द्धिरण्यममृतं जज्ञे अधिमर्त्येषु। य एनद्वेद स इदेनमर्हति जरामृत्युर्भवति॥५॥ यद्वेद राजा वरुणो यदु दे
वा सरस्वती। इंद्रो यद्वृत्रहा वेद तन्मे वर्चस आयुषे॥६॥ न तद्रक्षांसि न पिशाचास्तरंति देवानामोजः
प्रथमजं ह्येतत्॥ यो बिभर्ति दाक्षायणं हिरण्यं स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दी
र्घमायुः॥७॥ यदाबध्नन् दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः। तन्म आबध्नामि शतशा
रदायायुष्मांजरदष्टिर्यथासन्॥८॥ घृतादुल्लुप्तं मधुमत्सुवर्णं धनंजयं धरुणं धारयिष्णु
ऋणक्सपत्नानधरांश्च कृण्वदारोह मां महते सौभगाय॥९॥ प्रियं मा कुरु देवेषु प्रियं राजसु मा कु
रु प्रियं विश्वेषु गोप्तेषु मयि धेहि रुचा रुचं॥१०॥ अग्निर्येन विराजति सूर्यो येन विराजति॥ विरा
ड्येन विराजति तेनास्मान् ब्रह्मणस्पते विराजं समिधं कुरु॥११॥ अर्वाचाममिंद्रममुतो हवामहे यो
गोजिद्धनजिदश्वजिद्यः॥ इमं नो यज्ञं विहवे जुषस्वास्य कुर्मो हरिवो मेदिनं त्वा इति॥ अनंतरमुष्णी
षेणाग्रादक्षिणेन शिरः संवेष्ट्य उपानहौ संत्यज्य उपरिनिहितां प्रागुक्तां समिधं गृहीत्वा तिष्ठन्ने
व स्मृतं च मे इत्याद्यान् स्वाहांतान् मंत्राननुक्त्वा आवदध्यात्। स्मृतं च म इत्यादिमंत्राणां प्रजापति

रग्निरष्टिः समिदाधाने विनियोगः॥ ऋतंच मेऽमृतंच मे तन्म उभयव्रतं॥ निंदाच मेऽमृतंच मेत
न्म उभयव्रतं॥ निंदाच मेऽनिंदाच मे तन्म उभयव्रतं॥२॥ विद्याच मेऽविद्याच मे तन्म उभयव्रतं
॥३॥ श्रद्धाच मेऽश्रद्धाच मे तन्म उ०॥४॥ प्रज्ञाच मेऽप्रज्ञाच मे तन्म उ०॥५॥ इष्टंच मेऽनिष्टंच मे
तन्म उ०॥६॥ दत्तंच मेऽदत्तंच मे तन्म उ०॥७॥ अधीतंच मेऽनधीतंच मे तन्म उभय०॥८॥ कृतंच
मेऽकृतंच मे तन्म उ०॥९॥ सत्यंच मेऽसत्यंच मे तन्म उ०॥१०॥ श्रुतंच मेऽश्रुतंच मे तन्म उ०॥१
१॥ व्रतंच मेऽव्रतंच मे तन्म उभयव्रतं॥१२॥ यदग्ने सेंदुस्य सप्रजापतिकस्य सऋषिकस्य स
ऋषिराजन्यस्य सपितृकस्य सपितृराजन्यस्य समनुष्यस्य समनुष्यराजन्यस्य साकाशस्य
सानुकाशस्य सप्रतिकाशस्य सदेवमनुष्यस्य सदेवमनुष्यस्य सदेवगंधर्वाप्सरस्य सह
रण्येभ्यः पशुभिर्ग्राम्यैश्चाध्यन्नः आत्मन आत्मनि व्रतं तन्मे सर्वव्रतमिदमहमग्ने सर्वव्रतो भवा ना०म०
मि स्वाहेति पवित्रा। अग्नयपहृदनमम। इति समिधं सजेत॥ अथोपविश्य प्रब्रुमः आरेद्वासं मि ११६
तादृशास्य सिद्धो ममाग्ने वर्चो विहवेष्वित्यस्य सूक्तस्य विहव्य ऋषिः। विश्वे देवा देवता। अंसा
जगती। अंसास्त्रिष्टुभः समिदाधाने विनियोगः॥ ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेंधानास्त

न्वं पुषेम। मह्यं नमंतां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम स्वाहा॥ विश्वेभ्यो देवेभ्य इदं न मम॥१॥
वमग्नेपिसागः॥ मम देवा विहवे संतु सर्व इंद्रवंतो मरुतो विष्णुरग्निः। ममांतरिक्षमुरुलोकमस्तु मह्यं
वातः पवतां कामे अस्मिन्॥ स्वाहा॥ विश्वेभ्यो देवेभ्य इदं॥२॥ मयि देवा द्रविणमायजंतां मय्याशीरस्तु म
यि देवहूतिः। दैव्या होतारो वनुषंत पूर्वेऽरिष्टाः स्याम तन्वा सुवीराः स्वाहा॥ विश्वेभ्यो०॥३॥ मह्यं यजंतु
मम यानि हव्याकूतिः सत्या मनसो मे अस्तु॥ एनो मा निगां कतमच्चनाहं विश्वे देवासो अधिवोच
तानः॥ स्वाहा॥ विश्वेभ्यो०॥४॥ देवीः षळुर्वीरुरुणः कृणोत विश्वे देवास इह वीरयध्वं॥ मा हास्महि प्रज
या मा तनूभिर्मा रधाम द्विषते सोम राजन् स्वाहा॥ विश्वेभ्यो०॥५॥ अग्ने मन्युं प्रतिनुदन्परेषामद
ब्धो गोपाः परिपाहि नस्त्वं प्रत्यंचो यंतु निगुतः पुनस्ते। अमेषां चित्तं प्रबुधां विनेशत् स्वाहा॥ वि
श्वे०॥६॥ धाता धातृणां भुवनस्य यस्पतिर्देवं त्रातारमभिमातिषाहं। इमं यज्ञमश्विनोभा बृहस्प
तिर्देवाः पांतु यजमानं न्यर्थात्॥ स्वाहा॥ वि०॥७॥ उरुव्यचा नो महिषः शर्म यंसदस्मिन्हवे पुरुहूतः
पुरुक्षुः। स नः प्रजायै हर्यश्व मृळय इंद्र मा नो रीरिषो मा परादाः स्वाहा॥ विश्वेभ्यो०॥८॥ ये नः स
पत्ना अप ते भवंत्विंद्राग्निभ्यामव बाधामहे तान्। वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्ता

रमधिराजमकन्स्वाहा।विश्वे०८०।ॐअर्वांचमिंद्रममुतोहवामहेयोगोजिद्धनजिदश्वजिद्यः।इमंनो
यज्ञंविहवेजुषस्वास्यकुर्मोहरिवोमेदिनंत्वास्वाहा।विश्वेभ्योदेवेभ्यइदंनमम॥इतिदशमंत्रैर्दश
समिधोहुत्वाततःस्विष्टकृदादिहोमशेषंसमापयेत्॥ततःस्नातकोनैमित्तिकंविनानक्तंनग्नश्च
नस्नामि।मैथुनादन्यत्रनग्नांस्त्रियंनपश्येत्॥वर्षतिनधावामि।वृक्षंनारोहामि।कूपंनावरोहामि।मि
।प्राणसंशयेनाभ्यायघो।इत्येवंसंकल्पयेत्।ततःकौपीनंमेखलांचविसृजेत्।केशश्मश्रु
लोमनखान्यपराजितायांदिशिखनति॥ततोयत्रमधुपर्कादिस्तत्रास्यसंभावितातत्रैतां
रात्रिंवसेत्॥समावर्तनानंतरंत्रिरात्रमाशौचंकुर्यात्॥ ॥इतिश्रीभट्टनारायणकृतेप्रयोग
रत्नेसमावर्तनप्रयोगः॥ ॥अथक्रमप्राप्तोविवाहः॥ ॥तत्रतावदुपयोगितयाकिंचित्संक्षेपेणो ना०म०
च्यते॥अनाश्रमीनतिष्ठेतदिनमेकमपिद्विजः॥आश्रमेणविनातिष्ठन्प्रायश्चित्तीयतेहिसः ११८
इति।१।गुरवेतुवरंदत्वास्नायीततदनुज्ञया।वेदंव्रतानिवापारंनीत्वाह्युभयमेववा।२।अवि
प्लुतब्रह्मचर्योलक्षण्यांस्त्रियमुद्वहेत्॥अनन्यपूर्विकांकांतामसपिंडांयवीयसीम्।३।अरो
गिणींभ्रातृमतीमसमानार्षगोत्रजामिति॥याज्ञवल्क्योक्तेः।त्रिविधोपिवेदव्रतोभयस्नातको

ऽविलंबेनलक्षणादिविशिष्टांस्त्रियंनपुंसकत्वमात्रत्वयेस्त्वा।स्वेनपरीक्षितामुद्वहेत्।तत्रापिकुलम
ग्नेपरीक्ष्येतेतिगृह्यवचनात्।हारीतोसदाचारागुणवत्तयाहीनक्रियत्वादिदोषहीनतयापरीक्ष्यकुलंततो
दाद्या॥तदनुलक्षणान्यपिपरीक्ष्य।लक्षणानिचशुभाशुभसूचकानितनुलोमकेशदशनत्वादी
निप्रशस्तगम्यानिबाह्याभ्यंतराणिचाष्टौपिंडान्कृत्वेत्यादिनागृह्योक्तानिद्विविधान्यपिम
ताग्रंथेभ्योज्ञेयानि॥विस्तरभयान्नलिखितानि॥अनन्यपूर्विकांदानेनोपभोगेनवापुरुषांतरस
विकाभवतिसान्यपूर्विकातां॥अनेनवाग्दत्तामनोदत्ताग्निपरिगतासप्तमंपदंनीताभुक्ताग
हीतगर्भाप्रसूताचेति॥सप्तपुनर्भुवोभार्यावर्जयेत्।कांतांवोढुर्मनोनयनयोरानंदकारां॥अस
पिंडांसमानः।एकःपिंडः।पिंडदानक्रियायांमूलपुरुषशरीरंवायस्यानविद्यतेसाऽसपिंडा।ता
।कथंचिदेकक्रियानुप्रवेशेननिर्वाप्यसापिंड्यमेकेविदुः॥निर्वाप्यसापिंड्यंयथा।सपिंडताव
सप्तपुरुषपर्यवसायिनी॥तत्रैकःपिंडदातात्रयःपिंडभाजःपितृपितामहप्रपितामहाः।त्र
योलेपभाजः।वृद्धप्रपितामहाद्याः।तथाचमत्स्यपुराणे।लेपभाजश्चतुर्थाद्याःपिंडभागिन

॥पिंडः सप्तमस्तेषां सापिंड्यं सप्तपौरुषमिति॥ अयं भावः सप्तानां पुरुषाणामेकपिंडक्रियान्
प्रवेशः सापिंड्यं॥ तथा च देवदत्तस्यैकस्य स्वकीयैः पित्रादिभिः षड्भिः सह सापिंड्यं तथा पुत्रादि
भिः षड्भिरिति एकशरीरान्वयेनावयवसापिंड्यं विज्ञानेश्वरादयो निर्दोषं मेनिरे। अवयवसापि
ड्यं यथा॥ अवयवानां शरीरसंबंधिनां रक्तमज्जादीनां यः शरीरांतरे प्रवेशः स एव सापिंड्य
पुत्रे पित्रवयवानां साक्षात्प्रवेशः। पितामहाद्यवयवानां तु पितृद्वारा अतः सापिंड्यं पत्न्या सह
एकशरीरारंभकत्वात्सापिंड्यं — — — — — — एकशरीरारब्धैः स्वपितृभिः सह एकशरीरारं
भकत्वेन सापिंड्यं। तदेवमाधारतयाधेयतया वा एकशरीरावयवान्प्रविष्टाः सोऽसपिंड इति फ
लितं॥ नन्वेवमादावतिप्रसंगः॥ किं बहुना विधातृद्वारा तेनान्वयोऽस्तु परिहरस्तु साशंकासंकोचस्तूक्तो
मन्वादिभिः। वृद्धावरस्य कालतः कूटस्थाद्यः सप्तमः। पंचमी चेत्तयोर्माता तत्सापिंड्यं निवृत्तं
वदति॥ कूटस्थो मूलपुरुषः यतः संतानभेदः॥ अत्र बहुतरं वक्तव्यं विचारस्त्वेतावता प्रयोग
रत्नेतद्भंगभासानोक्तेः। नन्वेवं विधातृद्वारान्वयेन सापिंड्यातिप्रसंगेन सर्वत्र सपिंडतेस्य

ना०भ०
१२०

तत्राह। याज्ञवल्क्यः। पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथेति मातृपक्षे पंचमादूर्ध्वं पितृपक्षे सप्तमा
दूर्ध्वं सापिंड्यं निवर्तते इति निष्कर्षः। कूटस्थमारभ्यात्र गणना। एवं च मातृपक्षेऽपि पितृद्वारकं सापिंड्यं व
र्तमानं कस्मान्नाभियं संख्या कल्पना। उच्यते। पितरौ पितुः पितरौ तज्जन्यकं दंपती द्वंद्वतस्य चतु
ष्कमष्टकमतोऽपरस्य क्रमात्तथोक्ता। वंशारंभकदंपती प्रतिरिक्ता सप्तकस्तत्तदेकैकान्वयक
स्मात्पितृकुलेत्वासप्तकस्य संभवे। अयमर्थः। सप्तमपर्यंतं पितृपक्षे वंशारंभकाणां द्वंद्वानां संख्या
त्रिंशत्। तथाहि वरः प्रथमः। तन्मातापितृरूपं द्वितीयकक्षानिविष्टमेकं द्वंद्वं।२। पितामह्याः पिताम
हस्य जनकं चतुर्थकक्षानिविष्टं द्वंद्वद्वयं।४। तद्द्वंद्वकस्य मातृपितृचतुष्कस्य जनकं पंचमकक्षानिवि
ष्टं द्वंद्वचतुष्कं।८।५। तद्द्वंद्वकस्य मात्राष्टकस्य जनकमष्टकक्षानिविष्टं द्वंद्वाष्टकं।१६। तद्द्वं
द्वकस्य मातृपितृषोडशस्य सप्तमकक्षानिविष्टं द्वंद्वषोडशकं।१६।३२। तदेवमुक्तप्रकारेण द्वात्रिंश
द्द्वंद्वमध्ये एकैकस्य द्वंद्वस्यान्वये सपिंडाः कस्मान्निषिद्धाः। यद्यप्येकस्य वंशद्वयोऽपि सुतास्तदपि ह
न्तु संबंधसाम्यादेकैव गणना तेन व्यवधार्यतां। सुगमोऽर्थः। एकस्मादपि पुत्रात्सुतोऽथ दुहिता द्वंद्व
यं तत्तद्द्वयात्तस्माद्द्वंद्वचतुष्कमष्टवत्ता तेन ततः षोडशात्तोरद्वाः। यावत्सप्तमकक्षमग्निज्ञातव्यः

कंमां दृहेकान्वये तादृते गुणिता स्सैक खद्दशो वंशो सपिंडाः पितुः ॥ १ ॥ अस्यार्थः ॥ तदेवमुक्त द्वात्रिंश
त् दंष्ट्र मध्ये एकैकस्य दंष्ट्रस्यान्वये सपिंडाः क्रमाः त्रिषष्टिः तथाहि ॥ उक्तेषु तेषु मातामहो नामैकं दंष्ट्र
कूटस्थभूतं प्रथमकक्षा निविष्टं तत्सुतौ दुहिता च द्वितीयकक्षा प्राप्तौ मातुलस्य दंष्ट्र द्वयं तत
यकक्षायां ॥ तद्वृटकाभूतमक्षि चतुष्टयात् सुतत्रं दंष्ट्र चतुष्कं चतुर्थकक्षायां ॥ तद्वृटकाम त्वोष्टको
डलन्नं दंष्ट्राष्टकं पंचमकक्षायां ॥ तद्वृटकमक्षिषोडशकात् सत्रं दंष्ट्र षोडशकं षष्टकक्षायां ॥ तद्वृ
टक द्वात्रिंशद्वक्षिजनितं द्वात्रिंशत् दंष्ट्रात्मकं सप्तमकक्षायां तदेवमुक्ता एकान्वये त्रिषष्टि मात
वः त्रिषष्टिः क्रमाः तस्यां त्रिषष्ट्यां स्वेकि द्वात्रिंशता गुणितायां सस्यां स्सैक खद्दशः षोडशानि र
द्विसहस्रा पितृवंशे फलिता भवति । मातृवंशोनु ॥ मातुर्जन्मद दंपती त्रि मिथुनं दंष्ट्रं तयोः साग
राः स्वस्माः पंचमकस्यमस्थमिति रिसेकान्वयः पुंसुतः ॥ दंष्ट्रात् दंष्ट्रयुगं ततो व्यय इतोष्टा पंचक ना० म०
स्पंद्वार स्लोएपः सप्तगुण्याः द्वारा अविधयो मातुः सपिंडाः ॥ कु लो ॥ ४ ॥ अस्यार्थः ॥ मातृवंशे तु अ १२१
रंभक दंष्ट्रानि सप्त ॥ तथाहि ॥ मातुः पितृरूपमेकं दंष्ट्रं वरात तीयकक्षा निविष्टं ॥ १ ॥ तद्वृटक
अक्षिद्वयस्य जनकं दंष्ट्र द्वयं चतुर्थकक्षा निविष्टं ॥ ३ ॥ तद्वृटकमक्षिचतुष्टयस्य जनकं दंष्ट्र च

तुष्टयं ॥ ७ ॥ पंचमकक्षायामिति ॥ उक्तस्य दंष्ट्रसप्तकस्य मध्ये एकैकस्य दंष्ट्रस्यान्वये सपिंडाः क
माः पंचदश तथा उक्तेषु सप्तसु नमं दंष्ट्र दंष्ट्रकं कूटस्थभूतं प्रथमकक्षायां । तस्मात् पुत्रो दुहिता
चेति द्वितीयकक्षायां । तज्जन्यं दंष्ट्रयुगं तृतीयकक्षायां ॥ २ ॥ तज्जन्यं दंष्ट्र चतुष्टयं चतुर्थकक्षा
यां ॥ ४ ॥ तज्जन्यमष्टकं दंष्ट्राष्टकं पंचमकक्षायामिति ॥ ८ ॥ १५ ॥ तदासां पंचदशानां सर्वोक्त सप्त
भिर्गुणितानां पंचोत्तरं शतं फलितं ॥ कुलद्वयस्य कन्यका युता मिथः सापिंडकाः ॥ हिमांशुदृक्ध
राद्दृशो ॥ २१ ॥ २१ ॥ विवाहकर्मवर्जिता हि ते ॥ ५ ॥ अस्यार्थः ॥ तदेवं पितृकुलांतर्गतायाः षोडशाधिक
द्विसाहस्राः मातृकुलांतर्गतं पंचाधिकशतेन सहसंकलनायां हिमांशुदृक्धराद्दृशाः ॥ २१ ॥ २१ ॥ ए
कविंशतिसहिता शताधिका द्विसाहस्रा फलिता भवति सैषा विवाहकर्मणि वर्जनीया । यवीयसीं
स्वापेक्षया वयसा वपुषा च न्यूनां अरोगिणीं अविकित्स्य राजयक्ष्मादिरोगरहितां । भ्रातृमतीमिति
पुत्रिकाकरणशंकानिवृत्त्यर्थं यत्र तु पुत्रिकाकरणाभावनिश्चयः तां अभ्रातृकामप्युद्वहेत् ॥ अ
समानार्षगोत्रयस्य यज्ञायामभवत्तां । यास्करा धूलमौनकानां भिन्नगोत्राणामपि भार्गववैतहव्य

सा वेतसेति प्रवरैकसत्त्वे तत्र विवाहो मा भूदिति असमानार्षजामित्युक्तं ॥ आंगिरसां वरीधयो वना
स्येति मा धात्रं वरीधयो वनास्येति आंगिरसमाधातृप्रवरमध्ये दृष्टापि योवनात्मगोत्रे कांता हरूं विवाह
वारणाय असमानगोत्रजामित्युक्तं । तथा च गोत्रप्रवरोद्दिष्टे यकपस्तुदासोनि मित्रो ॥ प्रवरैक्येपि
इदमाह बौधायन: । पंचानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयो: ॥ भृग्वंगिरोगणेष्वेवं शेषेष्वेकोपि
वारयेदिति ॥ इति गोत्रप्रवरनिर्णय: ॥ सपिंडसप्रवरसगोत्रविवाहप्रायश्चित्तादि च मत्कृतग्रंथतोव
सेयं । विस्तरभयेनेह नोच्यते ॥ सापत्नमातामहकुलेप्या त्रिदैवत्रिकात्सापिंड्याद्विवाह: । तथा
च सुमंतु: । पितृपत्न्य: सर्वा मातरस्तद्भ्रातरो मातुलास्तद्भगिन्यो मातृष्वसारस्तदुहितरश्च
भगिन्यस्तदपत्यानि भागिनेयानि अन्यथा संकरकारिण: स्युरिति ॥ अत्र यावद्वचनं वाचनिक
मिति न्यायेन परिगणितेष्वेवातिदेशिकं सापिंड्यं न तु पंचमसप्तमपर्यंतं । केचित्तु वचनादेव वि
वाहनिषेध: ॥ तथा गृह्यपरिशिष्टे ॥ अथ विवाह्यामुपक्रम्य समानधर्मां अविरुद्धसंबंधामुपयच्छेतेत्यु
क्त्वेदं पश्चात् । मिथ: । पितृमातृसाम्ये विरुद्धसंबंध: । यथा । भार्यास्वसृदुहिता पितृव्यपत्नीस्वसा

ना०सं०
१२२

चेति स्वयमेव विरुद्धसंबंधे विवृते ॥ तथा च नारद: । प्रत्युद्वाहो नैव कार्यो नैकस्मै दुहितृद्वयं ॥ न चैक
जन्मयो: पुंसोरेकजन्मे च कन्यके ॥ नैवं कदाचिदुद्वाहो नैकदा मुंडनद्वयं ॥ अमत्रापि । एकजन्मे द्वि
पुत्रयोर्नैकजन्मयो: । न पुत्रीद्वयमेकस्मै प्रदद्यात्तु कदाचनेति ॥ ॥ अथ वरगुणा: ॥ ॥ तत्र बुद्धिम
ते कन्यां प्रयच्छेदिति गृह्यं यम: । कुलं च शीलं च वयश्च रूपं विद्यां च वित्तं च सनाथतां च । एता
न्गुणान्सप्त परीक्ष्य देया कन्या बुधै: शेषमचिंतनीयं ॥ याज्ञवल्क्य: ॥ एतैरेव गुणैर्युक्त: सवर्ण
: श्रोत्रियो वर: ॥ यत्नात्परीक्षित: पुंस्त्वे युवा धीमान्जनप्रिय इति ॥ एतै: कन्यकायामुक्ते पुत्र
सापिंड्यसमानार्षगोत्रादिषु अमयपयोग्यै: तत्र भ्रातृमत्त्वं वरेनापेक्षितं ॥ पुत्रिकाकरणादुं
कानिदानिस्तत्फलाभावात् ॥ असपिंडत्वं तदपेक्षितं ॥ तेन कुष्टस्तभारभ्य पंचम्या: पुत्रीयपश्च
पि असपिंडा तथापि पंचमस्य पुत्रेण सपिंडेन नोद्वाह्या ॥ यत्नादिति ॥ पुंस्त्वपरीक्षोपायमाह
नारद: । यस्याप्सु प्लवते बीजं ह्रादि मूत्रं च फेनिलं ॥ पुमान्स्याल्लक्षणैरेतैर्विपरीतैस्तु षंढ
क इति । हारिद्धानिमत्त । वर्ज्यानाह कात्यायन: ॥ दूरस्थानामविद्यानां मोक्षमार्गानुसारिणां ॥
शूराणां च निर्धनानां न देया कन्यका बुधैरिति ॥ गुणान्यवरालाभे निर्गुणायापि देया । तदाह

बौधायनः। दद्याद्गुणवते कन्यां नग्निकां ब्रह्मचारिणे। अपि वा गुणहीनाय नोपरुंध्याद्रज
स्वलामिति। नग्निका नववार्षिकी रोहिण्यपरपर्याया॥ मनुरपि उत्कृष्टायाभिरूपाय वराय
सदृशाय च॥ अप्राप्तामपि तां तस्मै कन्यां दद्याद्विचक्षणः॥ इति॥ अप्राप्तां अप्राप्तविवाहसम
यां बालिकामपीत्यर्थः। कालांतरे तु गुणापात्रे देयत्वाय तेरित्ति भावः॥ यत्तु यमेनोक्तं। काममामर
णात्तिष्ठेद्गृहे कन्यर्तुमत्यपि। न त्वेवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् इति। तद्गुणवद्वराभावे नि
र्गुणाय न देयेत्येवंपरं न तु ऋतुमत्यापि तिष्ठेदित्यस्मिंस्तात्पर्यमित्यर्थः॥ अपि वा गुणहीनायेति
बौधायनोक्तानुकल्पस्य निर्विषयतापत्तेः। वयोविशेषेण दातुः फलविशेषमाह मरीचिः॥ गौ
रीं ददन्नाकपृष्ठं वैकुंठं रोहिणीं ददत्॥ कन्यां ददद्ब्रह्मलोकं रौरवं तु रजस्वलामिति गौर्यादिल
क्षणमाह यमः॥ अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी॥ दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्व
लेति॥ अत्रापि गुणदोषविशेषा ग्रंथांतरादवसेयाः। विस्तरभयान्न लिख्यते। अथ मासः॥ कुलेऽत्र तु
त्रयादर्वाक् मंडनात्रतमुद्वहेत्॥ पुत्रोद्वाहान्नैव पुत्रीविवाहोपि अत्र तु त्रये॥ अब्दांतरे तु उद्वहनं वरं
कार्यामुंडनं ध्रुवं॥ अब्दभेदे तु न दोष इति संहितासारावल्यां॥ फाल्गुने चैत्रमासे तु पुत्रोद्वाहो

ना०भ०
१२२

पदीयते॥ अब्दार्द्धस्य कुर्वीत तत्त्रयविलंबनमिति। इत्यादि द्रष्टव्यं कालो महाग्रंथतो ज्ञेयः। वधूव
रयोर्ज्येष्ठत्वे हि द्विर्विवाहे कन्यासु द्विर्वर्जवृत्तादिष्वृत्तैरेवोदाहृत्कावाधकमवस्थाचर्ज्योतिषग्रं
थेभ्यो विवेचनीये इति दिक्॥ तथा ज्येष्ठमासे ज्येष्ठगर्भस्य जन्मभादौ च सर्वेषां मंगलकार्यं निषिद्धं
रत्नकोशे। जन्मभे जन्मदिवसे जन्ममासे शुभं त्यजेत्॥ ज्येष्ठमासाद्यगर्भस्य शुभं कर्म न नित्यया
श्रुपाति॥ अथ कन्यादातारः॥ पिता पितामहो भ्राता सकुल्यो जननी तथा॥ कन्याप्रदः पूर्वनाशे
प्रकृतिस्थः परः परः॥ अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ। गम्यं त्वभावे दातॄणां क
न्या कुर्यात्स्वयंवरं॥ सकुल्यश्च प्रत्यासत्तिक्रमेण ते पितृकुलस्थः तदभावे मातामहकुलो
त्थः। सर्वाभावे जननी॥ उन्मादकुष्ठरोगादिदोषरहित एवैदधिकारी स
र्वाभावे जननी। सापि तथैव उन्मादादिदोषहीना चेत्॥ अत्र यथाक्रमेण गम्यं गामनार्हं सावर्ण्ये
विद्यादिगुणयुक्तं वरं स्वयं वरेण वृणुयात्॥ नारदोपि॥ पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पि
तुः॥ मातामहो मातुलश्च सकुल्यो बांधवस्तथा॥ माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते॥ तस्यामप्र
कृतिस्थायां कन्यां दद्युः स्वजातयः॥ यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेदिति॥ ॥ अथवि

वाहभेदा उच्यंते॥ मनुः॥ ब्राह्मो दैवस्तथा चार्षः प्राजापत्यस्तथासुरः॥ गांधर्वो राक्षसश्चैव पैशाचश्चाष्ट
ष्टमो मतः॥ तेषां लक्षणं फलं वालंकृत्य कन्यामामिति गृह्य देवगं तमं। यज्ञस्थ ऋत्विजे दैवः॥ आदा
यार्षस्तु गोद्वयं मनुः॥ सहोभौ चरतां धर्ममिति वाचानुभाष्य तु॥ कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधि
स्मृतः॥ यद्यप्यन्येष्वपि विवाहेषु सहधर्मचरणमस्ति तथाप्य॥ त्रयावृत्तौ तु सहधर्मचरणासेवनं॥
तु मध्ये आश्रमांतरपरिग्रहः॥ आश्रमांतरपरिग्रहो वेति विशेष इति प्रयोगरत्ने नृसिंहः॥ हरदत्तश्च॥
याज्ञवल्क्यः॥ आसुरो द्रविणादानाद्गांधर्वः समयान्मिथः॥ राक्षसो युद्धहरणात्पैशाचः कन्यकाछ
लादिति। एषां व्यवस्थामाह मनुः॥ षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान्॥ विट्शूद्रयोस्तु तानेव
विद्याद्धर्म्यान्नराक्षसानिति॥ आदितः षड्विवाहाः विप्रस्य धर्म्याः। आसुरादयश्चत्वारः क्षत्रियाणां
धर्म्याः इति माधवः॥ नारायणस्तु पैशाचस्य शूद्रेष्वपि निंदितत्वात्प्राजापत्यादयश्चत्वारोऽग्रा
ह्या॥ इति तानेव चतुरः स्त्रीष्वपि असुरराक्षसमिति कुदासात्तु त्रयः प्राजापत्यासुरगांधर्वाः॥
श्रेष्ठं त इति माचरवः॥ एतेषामध्ये प्रशस्तान्मनुरेवाह॥ चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कव
योविदुः॥ राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोरिति तस्य संततेः। चत्वारो ब्राह्मणस्याद्याः शस्ता

गांधर्वराक्षसौ॥ राज्ञस्तथैवासुरो वैश्ये शूद्रे पैशाचस्तु गर्हित इति। गर्हितो न कस्यापि प्रशस्तस्तदस्यार्थः॥ अ
स्य विवाहासंभवे ब्राह्मणादीनां सर्वेषां पैशाचमप्यनुज्ञातं नातिवक्तः॥ सर्वोपायैरसाध्या स्यात्स्वक
न्यापुरुषस्य या। चौरेणापि विवाहेन सा विवाह्या रहः स्थितेति॥ गांधर्वादिष्वपि भार्यापतिभावाय
पश्चाद्धोमादि संपाद्यं तत्कार्यं॥ गांधर्वासुरपैशाचा विवाहा राक्षसश्चयः॥ पूर्वं परिग्रहस्तेषु पश्चा
द्धोमो विधीयते इति परिशिष्टात्॥ होमाद्यभावे वरांतराय देया॥ सा तु नेति विशेषः॥ तदुक्तं वसि
ष्ठबौधायनाभ्यां। बलादपहृता कन्या मंत्रैर्यदि न संस्कृता॥ अन्यस्मै विधिवद्देया यथा कन्या तथैव
सेति। बलादिति छलादेरप्युपलक्षणं॥ इत्यादि सर्वं परिवित्तिपरिवेत्तृविधित्वादिव्यपथानसात्र
याविवायविवाहः कार्यः॥ अस्याभिविस्तरभीतेर्न लिख्यते॥ यदि त्वासुरादिविवाहः कृतः तदा प्रायश्चि
त्तं कार्यं। तदुक्तं स्मृत्यर्थसारे॥ आसुरे त्रुपवासः स्याद्गांधर्वे तु त्रिरात्रकं राक्षसे चैव पैशाचे कुर्यात्कृच्छ्रं
प्रयणं तथेति॥ ॥ अथ मुख्यब्राह्मविवाहांगभूतवाग्दानविधिर्गृह्यपरिशिष्टे चार सपत्नीमते॥
ज्योतिर्विदादिष्टे विवाहनक्षत्रादियुते शुभकाले द्वौ वा त्रयो वा प्रशस्तवेषा वरेण तत्पित्रादि
नावा॥ अनृक्षरा ऋजवः संतु पंथा इति मंत्रहितास्तावत्सभाः॥ तेषां मंत्राः॥ अनृक्षरा ऋजवः संतु पंथा

इतिसहितास्त्वावतीभिः॥ तेचमंत्राः॥ अनृक्षराऋजवःसंतुपंथायेभिःसखायोयंतिनोवरेयं॥ समर्यमा
संभगोनोनिनीयात्संजास्पत्यंसुयममस्तुदेवाः॥ प्रत्वामुंचामिवरुणस्यपाशात्॥ येनत्वाबध्नात्स
विता सुसेवाः॥ ऋतस्ययोनौसुकृतस्यलोकेरिष्टांत्वासहस्त्रगदधामि॥ त्विनात्वाप्रवहतारथेन॥ गृहा
न्गच्छगृहपत्नीयथासोवशिनीत्वंविदथमावदासि॥ इहप्रियंप्रजयातेसमृध्यतामस्मिन्गृहे
गार्हपत्यायजागृहि॥ एनापत्यातन्वा३ संसृजस्वाधाजिव्रीविदथमावदाथः॥ तावतीभिः पुरंध्री
भिःमंगलगीतं तत्रयेभ्यःसहवाकु नदत्रीनपूर्वकंकृतमंगलवरंसुतास्तद्युतावाकस्मात्गृहमसुष्मे
सवस्त्रपीठासनप्राङ्मुखांसालंकारांसुवेषांकन्यामुपवेश्यतद्दक्षिणतोबृजादिदत्वावरपित्रादि
:पुरतः॥ श्रीगणपत्यादिस्मरणपूर्वकंप्राङ्मुखासीनामन्यङ्मुखेवावा॥ अमुकप्रवरान्वितायाः
मुकगोत्रोत्पन्नायाममुकपौत्र्यायामुकपुत्र्या॥ यामुकनाम्नेवराय॥ अमुकप्रवरोपेताममुक
गोत्रोत्पन्नाममुकपौत्रीममुकनाम्नीकन्यांभार्यात्वावृणीमहे॥ इतिब्रूयुः॥ अथदाता॥ भार्या
ज्ञातिबंधुनुमतिंकृत्वापूर्वोक्तमनुध्यानन्दयुवावृणीध्वमितिवदेत्॥ एवपुनर्द्विःप्रयुज्य
प्रदास्यामि॥ तिचोच्चैस्त्रिर्वदेत्॥ ततोवरपित्रादिर्गंधाक्षतवस्त्रपुष्पभूषणतांबूलपु

ना॰मं॰
१२५

ष्पादिभिःकन्यांप्रपूजयेत्॥ संप्रदायागतमंत्रैः॥ तेचमंत्राः॥ गंधद्वारामितिगंधं॥ अक्षतांश्चसुर
श्रेष्ठेतिअक्षताः॥ युवंवस्त्राणीतिवस्त्रयोः॥ हिरण्यरूपइतिभूषणानां॥ पूगीफलंमहद्दिव्यमिति
तांबूलं॥ करवीरेजातिकुसुमैः॥ याःफलिनीर्याःअफलाइतिपुष्पाणां॥ ततःकन्यादाताप्राङ्मुखः
कन्यांवामतउपवेश्य॥ आचम्यदेशकालौस्मृत्वा॥ ममास्याःकन्यायाःकरिष्यमाणविवाहांगभूतं
वाग्दानमहंकरिष्यइतिसंकल्प्यगंधादिदक्षिणांतैर्गणपतिंपूजयित्वायथाचारंकलशंपूज
नादिचकृत्वा॥ स्वस्थानेकन्यांपूजितारउपवेशयेत्तत्राभ्यांप्रत्यङ्मुखउपविश्यगंधतांबूला
दिनाप्रपूजयेत्॥ सचदातारं॥ ततोदाताआचारतोहरिद्राखंडपंचपूगफलानिचगंधा
क्षतालंकृतानिगृहीत्वा॥ अमुकप्रवरोपेतायामुकगोत्रायामुकप्रपौत्रायामुकपौत्रायामुक
पुत्रायामुकनाम्नेवरायामुकप्रवरान्विताममुकप्रपौत्रीममुकस्यममपुत्रीममुकनाम्नीमिमां
कन्यांज्योतिर्विदादिष्टेमुहूर्तेदास्यइतिवाचासंप्रददेइतिचोक्त्वा॥ अंगो॥ पतितेः क्लीबदन्यादोषवि
वर्जिते॥ इमांकन्यांप्रदास्यामिदेवाग्निद्विजसन्निधौ॥ इतिवरपित्रादीनांस्ववस्त्रप्रांतेतानिपूगा
फलानिप्रक्षिप्यप्रतिष्ठामंत्रेणतद्ग्रंथिसादिनावस्त्रेबध्वाग्रंथिंचंदनेनार्चयेदित्याचार॥

प्राप्तं॥ प्रतिष्ठामंत्रस्तु॥ गृहा वै प्रतिष्ठा सूक्तं तत्प्रतिष्ठिततमिति मंत्रेण प्रतिष्ठा॥ तदस्तु मित्रावरुणा तदग्ने
शंयोरस्माकमिदमस्तु शस्तं॥ अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय॥ ततो हरिद्राखंड पंच
पूगीफल निर्तयैव वरपित्रादिर्गृह्णाति॥ अमुकप्रवरोपेतामुकगोत्रोत्पन्नाममुकप्रपौत्रीममुक
पौत्रीममुकपुत्रीममुकनाम्नीममुकप्रवरोत्पन्नायामुकवरविषये भवतो निश्चितं भवतु इति दातृ
वस्त्रान्तं पक्षे पादिपूर्ववत् कुर्यात्॥ ततो दाता॥ वाग्दत्ता मया कन्या पुत्रार्थं स्वीकृता त्वया॥ क
न्यावलोकनविधौ निश्चितस्त्वं सुखी भवेति ततः सवरपित्रादि॥ वाग्दत्ता त्वया कन्या पुत्रार्थं स्वी
कृता मया वरस्य लोकनविधौ निश्चितस्त्वं सुखी भवेति दातारं प्रतिपठेत्॥ मात्रादीन् सीकर्त्तरि भ्रा
त्रर्थमिन्नार्थमित्यादि कार्यः। ततो ब्राह्मणाः॥ शिवा आपः संतु॥ सौमनस्यमस्तु॥ अक्षतं चारि ना०अ०
ष्टं चास्तु। दीर्घमायुः शांतिः पुष्टिश्चास्तु॥ एतद्वः सत्यमस्त्विति उक्त्वा॥ समानीव आकूतिः स १२६
मानाहृदयानि वः। समानमस्तु वो मनो यथा वः सुसहासति॥ प्रस्तुमंताधियसानस्य सक्ष
णिवरेभिर्वराँ अभिषुप्रसीदत॥ अस्माकमिंद्रः उभयं जुजोषति यत्सोम्यस्यांधसो बुबो
धति॥ इमौ मंत्रौ पठेयुः॥ ततो दाता पात्रस्थसिततंदुलपुंजे मामीमाबाद्याषोडशोपचारैः पूज

येत्। तां च कन्यैवं प्रार्थयेत्। देवेंद्राणि नमस्तुभ्यं देवेंद्रप्रियभामिनि॥ विवाहं भाग्यमारोग्यं पुत्रलाभं च दे
हि मे रति॥ ततः पुरंध्रीभिर्नीराजनादि मांगलिकं कार्यं॥ विप्राश्च गंधताम्बूलाद्यैः संपूजिताः आशीर्वादा
न् दद्युः। ते चाशीर्वादमंत्राः। हिरण्यवंती वसुपत्नी वसूनां वत्समिच्छंती मनसा भागात्॥ दुहामश्वि
भ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय। १। समिद्धस्य श्रयमाणः पुरस्ताद्ब्रह्म वन्वानो अज
रं सुवीरं॥ आरे अस्मदमतिं बाधमान उच्छ्रयस्व महते सौभगाय। २। वनस्पते शतवल्शो वि
वयं रुहेम॥ यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगाय। ३। हृदु ईवानामुपसरेव
मापस्तेत्स हस्तधारः पवते मृदाय॥ नृभिस्तवानो अन्नुधाम सर्वमग्ने द्युम महते सौभगाय॥
४। अस्य पिब क्षुमतः प्रस्थितस्येंद्र सोमस्य वरमा सुतस्य॥ स्वस्तिदा मनसा मादयस्वार्वाचीनो
रेवते सौभगाय। ५। घृतादुल्लुप्तं मधुमत्सुवर्णं धनंजयं धरुणं धारयिष्णु॥ ऋणक् सपत्नान्धरां
श्च कृण्वदारोह मां महते सौभगाय। ६। इति सौभगायपर्यंताः षट्। तदस्तु मित्रावरुणा०। गृहा
वै प्रतिष्ठा० मंत्रौ तु पूर्वं लिखितौ॥ अन्येपि आशीर्वादमंत्राः यथा स्वारिपठनीयाः॥ ते चानियताः
अतः कारणान्न लिखिताः॥ ॥ इति विद्वन्मुकुटमाणिक्य श्रीरामेश्वरभट्टसूनुनारायणभट्टकृ

तेप्रयोगरत्ने वाग्दानविधिः समाप्तः ॥ ॥ ततो वैवाहिके शुभमुहूर्ते वधूवरयोस्तैलहरिद्रारोपणा
द्यथाचारं कार्यं ॥ वाग्दाने नोत्तरं देशांतरगतो वरे नारदः ॥ प्रतिगृह्य तु यः कन्यां वरो देशांतरं व्र
जेत् ॥ त्रीनृतून्समतिक्रम्य कन्यान्यं वरयेद्वरं ॥ वरणे तु वसिष्ठः ॥ अद्भिर्वाचा च दत्तायां म्रियेताद्यो
वरो यदि ॥ न च मंत्रोपनीता स्यात्कुमारी पितुरेव सा ॥ यस्मै वाग्दत्ता तस्य योगरोगप्रयोगे प्रशस्त
वरांतरलाभे वा तस्मै न देयेत्याह याज्ञवल्क्यः ॥ दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेदिति ॥ अत्र
पूर्वस्य दोषयोग इति विज्ञानेश्वरः ॥ अतिक्रांतस्य धर्मेण दोषयुक्ताय न दद्यादिति स्मृतिः ॥ अ
थ्याहरणे स एव दंडमाह ॥ सकृत्प्रदीयते कन्या हरंस्तां चोरदंडभागिति ॥ ॥ विवाहे मंडपप्रकार
माह वसिष्ठः ॥ ॥ षोडशारत्निकं कुर्याच्चतुर्द्वारोपशोभितं ॥ मंडपं तोरणैर्युक्तं तत्र वेदिं प्रक ना०म०
ल्पयेत् ॥ अष्टहस्तं तु रचयेन्मंडपं वा द्विषट्करं द्विषट्करं स्याद्दशाकरं । वेदिकानिर्माणप्रकार १२१
माह नारदः ॥ हस्तोच्छ्रितां चतुर्हस्तैश्चतुरस्रां समंततः ॥ स्तंभैश्चतुर्भिः सुश्लक्ष्णां वामभागे तु पू
र्वनि समां तथा चतुर्दिक्षु सोपानैरतिशोभितां ॥ प्रागुदक्प्रवणां रम्यां स्तंभहंसशुकादिभि
र्विचित्रामंकितां कुंभैर्विविधैस्तोरणांकुरैः ॥ शृंगारपुष्पनिकरैर्वर्णकैः समलंकृतां ॥ विप्रा

शीर्वचनैः पुण्यस्त्रीभिर्दीपैर्मनोरमां ॥ वादित्रनृत्यगीताद्यैर्हृदयानंदिनीं शुभां ॥ एवंविधामारुह्य
सोग्निं हुनेत्साग्निं वेदिकामिति । हस्तोत्र बाहुः ॥ सोपानकरणं पश्चिमभागे ॥ उपरि चतुर्दिक्षु वा ॥ अ
यवा यथाचारं सोपानातिरेकेण चतुरस्रा इति विवाहवेदिकालक्षणं ॥ ॥ अथ विवाहस्य वरदिन
कृत्यं ॥ ॥ वधूपिता वरपिता च विवाहात्पूर्वेद्युः सर्वात्मिसपत्नीकः कृताभ्यंगो धृतमांगलिक वे
षः कृतोपलेपनरंगमालिके प्रांगणे शुभासने प्राङ्मुख उपविश्य स्वदक्षिणतः पत्नीं तद्दक्षि
णतः पत्नीदक्षिणतः कन्यां वरं चोपवेश्य पात्रस्थ प्राणानायम्येष्टदेवतागुर्वादिनमस्कारं कृत्वा दे
शकालौ संकीर्त्य ममामुकनाम्न्याः कन्यायाः अमुकशर्मणः पुत्रस्य वा करिष्यमाणविवाहां
गभूतं स्वस्तिवाचनमंकुरार्पणं नांदीश्राद्धं ग्रहयज्ञं मंडपदेवताप्रतिष्ठां च करिष्ये इति उक्त्वा
स्वस्तिवाचनादि कुर्यात् ॥ नांदीश्राद्धात्पूर्वं वंशपात्रोपरि वस्त्रे गणपतिं लाद्यभागोपादिषु उक्ता
मातृकाः स्थापयित्वा मम मातृकास्ततो लक्ष्म्याज्येष्ठ्योः प्रतिष्ठापूर्वकं पूजयेत् कन्यापिता पितृ
अमुकनाम्न्याः कन्यायाः स्वः करिष्यतया विशेषसंकल्पसर्वं कुर्यात् । एवमपि समुच्चयेन सं
कल्पो लिखितः । प्रयोगपारिजाते । नांदीश्राद्धमातृपितृपूर्वकं स्वस्तिवाचनादि तु वरकर्तृक

कर्मसु कंकणस्य धारणायं ॥ ततो वारस्पता आचार्येण कौतुकबंधार्थं सूत्रद्वयं पंचवर्णै क्रियासाकारये
त् ॥ तद्द्वयमाचार्यः कौतुकबंधोक्तमंत्रैः अभिमंत्र्य आज्ञातवेदस हस्ते चमत्रान्हस्या गंधेन लेप
यित्वा मुखे दृष्टो प्रतिज्ञातं निदध्यात् ॥ मंडपदेवतादि प्रतिष्ठा चेत्सा कार्या ॥ दुर्वाशीमापल्लवकु
लदेववृक्षपल्लवान् आम्रादि पत्रास्तत्र क्षपत्रवेष्टितान् सूत्रेण यो रावेष्टयेत् ॥ तत्रैकत्र मुसल
मेकत्र छुरिका दिशास्तंभमध्ये प्रक्षिप्य वेष्टयेत् ॥ तानि घटं ताम्रपात्रे निधाय तन्मध्ये उदकस्थैक्षुव
दुग्धक्रमेण नंदिनी नलिनी मैत्रा उमा वा घ्रात्तदुत्तरस्थे मुद्गलगर्भे पशुवर्द्धनी आवाह्यातदुर
सैर्शास्नुगर्भे भगवती आवाह्यात तस्तंडुलपूर्णे हरिद्राखंड पूगीफलयुते स्तुः वचनाराद्वापिहि
ते हरिद्रादिभिः दुर्लेनाराचेण सहे सवेष्टितेसु धूमकलशे अविघ्नसंतं गणपति मावाह्य ॥ तदस्तु ना०भ०
मित्रावरुणेति मंत्र गृहादेवे प्रतिष्ठेति मंत्रेण प्रतिष्ठाप्य नीराज्य आसनादि आचमनांतोपचा १२८
रैः पूजयित्वा नैलोत्कृष्टं नोक्षादके रम्यं गृहस्थानं यणपां वेष्टितानां कारयित्वा गंधादि दक्षिणांतोप
चारैः पूजयेत् ॥ पुष्पांजलिं दत्वा नाराङ्गोस्याय सपत्नीकः आग्नेयकोणस्थमंडपस्तंभोपरि नं
दिनीनामकं वेष्टितं तदस्तु मित्रा० गृहादे० इति स्थापयित्वा तत्र नंदिनीं पूजयेत् ॥ तत्रैवं स

मुद्रज्येष्ठा० आपोहिष्ठेति मंत्राभ्यां प्रोक्ष्य गंधद्वारामिति गंधाक्षतं दधिक्राव्ण इति दधि । कांडात्कां
डादिति दूर्वा पुष्पाणि समर्पयेत् ॥ समुद्रज्येष्ठा इति मंत्रेण आपोहिष्ठेति मंत्रेणेति प्रोक्ष्य गंधद्वारामि
ति गंधाक्षतं दधिक्राव्ण इति दधि । कांडात्कांडादिति दूर्वापुष्पाणि ॥ ततो नैर्ऋत्यवायव्येशानस्त
भेषु मंडपमध्योपरि भागे काष्ठे काष्ठे चक्रमेणा नलिनी मैत्रोपसुवर्द्धनी नामकं वेष्टितानि उक्तवत्स्था
पयित्वा पूजयेत् ॥ नैर्ऋत्यकोणस्थमंडपस्तंभोपरि नलिनीनामकं वेष्टितं तदस्तु मित्रा० गृहादे० इ
ति स्थापयित्वा तत्र नलिनीं पूजयेत् ॥ या: आपो दिव्या इति मंत्रेण यो वः शिवतम इति मंत्रेण प्रोक्ष्य
गंधद्वारेत्यादि सर्ववदर्चयेत् ॥ ततः वायव्यकोणस्थमंडपस्तंभोपरि मैत्रानामकं वेष्टितं तदस्तु मित्रा
० गृहादे० इति स्थापयित्वा तत्र मैत्रां पूजयेत् ॥ यासां राजा वरुणः तस्मा अरंगमाम वः ० इति
मंत्राभ्यां प्रोक्ष्य गंधद्वारेत्यादि सर्ववत् पूजयेत् ॥ ततः ईशानमंडपस्तंभोपरि उमानामकं वेष्टितं तद
स्तु मित्रा० गृहादे प्रतिष्ठा० इति मंत्राभ्यां स्थापयित्वा तत्र उमां पूजयेत् ॥ तत्रैवं ॥ यासां राजा वरु
णो० शं नो देवीरभिष्टय० इति मंत्राभ्यां प्रोक्ष्य गंधद्वारेत्यादि सर्ववत्समर्पयेत् ॥ ततः मंडपम
ध्योपरि भागे यत्काष्ठं तत्र पशुवर्द्धनी नामकं वेष्टितं तदस्तु मित्रा० गृहादे प्रतिष्ठा० इति मंत्रा

मांस्थापयित्वा तत्र पशुपर्णीं पूजयेत् । तन्मंत्रः । समुद्रज्येष्ठा ०।१। या आपो दिव्या ०।२। यासां राजा ०।३।
यासु राजा वरुणो ०।४। इति व्रतसृष्टिः आपो हि ष्ठा ०।२। यो वः शिवतमो रसः ।।२। तस्मा अरं गमाम ०।
३। शन्नो देवीरभिष्टय इति च तस्मिञ्जघ्नोऽस्नगंधकारे स्नादिभिर्द्वितसमर्पयेत् ।। ततो वज्रपात्रे
ण सह भगवतीगोपालिकास्थाद्रिमातृकास्थापनवज्रपात्रे जलं संगृहीत्वा अविघ्नकलशं च प
त्वा ग्राहयित्वा ब्राह्मणैः सह कुनिक्रदज्जनुषमिति सुमंगलसूक्तपठनमंगलवाद्यघोषेण
गृहांतर्गत्वा प्रशस्तालंकृते ईशानदेशे तंडुलादिपुंजत्रयोपरि त्रीण्यपि स्थापयित्वा तद्दस्तमित्रा
०गृहावे० इति स्थापयित्वा कुनिक्रदत्सूक्तं पवित्रां च रत्नां पूजयेत् ।। अत्र सद्यपिपूयाकुलधर्मसं
र्वं कुर्यात् ।। एवमेव मंडपोमंडपे देवकप्रतिष्ठा चोपनयने विज्ञेया ।। ततः कमंगिदेवताकुलदेव
ताप्रीत्यर्थं द्विजसुवासिन्यादिभोजनं कार्यं ।। अगतौ तु सर्वमेतद्विवाहदिन एव पूर्वदिने वा कु ना०प्र०
र्यात् ।। ।।इति प्रयोगरत्ने देवकप्रतिष्ठापनविधिः ।। ।।अथ वरस्य वधूगृहगमनं ।। ।।तद्यथा ।। १२५
वरः कृतनित्यक्रियो विधिवत्कृतस्वस्तिवाचनो ब्राह्मणैः सह सालंकारो हारं मुक्ता । मुक्तावा
द्यं धौतेन वस्त्रेण सहद्वयापरेण । धृतं वस्त्रयुगलं धृत्वालंकृतः स्रग्वी इष्टदेवतां पित्रादींश्च नम

स्कृत्य तैस्तनुमोदितो यथाविभवमश्वादियानमारुह्य धृतसितच्छत्रः सुवितैतानि बांधवैः कनिक्रद
ज्जनुषमिति सूक्तं सुमंगलं पठनपरैर्ब्राह्मणैः पुरंध्रीभिः स्वर्णकलशदर्पणकरमाभिः पुष्पाक्ष
तदीपमालाधूपजलं जैर्हस्तैर्लोकैर्मंगलतूर्यघोषसह वधूगृहं गत्वा तद्वारदेशे प्राङ्मुखः स्थितो न
राजनस्पर्यां कुलपुत्रैः पुरंध्रीजनैः प्रत्युद्यातो न गृहं गत्वा ।। प्रविश्य तदंगणे मंडपाधः सोत्तर
च्छदे हरितदर्भोस्तीर्णे चतुष्पादमडपीठे प्राङ्मुख उपविशेत् ।। ।।अथ मधुपर्कः ।। ।।तत्र का
रिका पत्रपल्लवेनायमस्ति ।। तत्र कन्यादाता वरस्य पुरतः सुस्नाता समलंकृता महतवाससा स
सुगंधानुलिप्ता स्रग्विणी भक्तावतीं कन्यां तया विष्टासने प्रत्यङ्मुखीमुपवेश्य तां पुरस्कृत्य स
सीमांतः सपत्नीक उपविश्य । गतायवरायतद्धारदोक्तविधिना मधुपर्कं कुर्यात् । तत्रायं क्रमः
।पाद्यार्घ्यमर्घ्यार्थमंत्रवरातृमनार्थेषु राचमनीयार्थं च जलपात्रचतुष्टयं मधुयुक्तदध्याख्यम
धुपर्कं कांस्यपात्रं गां पंचविंशतिदर्भैः आगमवामावर्तेन कृतं विष्टरं च संपाद्य प्रायानायम्
दैशाकालौ स्मृत्वा कन्यार्थिने गृहागताय अमुकस्नातकाय वराय कन्यादानांगभूतं मधुपर्कं करि
ष्ये इति संकल्प्य । कन्यार्थिनं गृहागतं अमुकस्नातकं वरमिति द्वितीयांतमुक्त्वा मधुपर्केणार्हयि

ष्प॥ इति वा संकल्प्य प्रागग्रैः सप्तदर्भमयं कूर्चं विष्टरो विष्टर इति त्रिर्निवेदयेत्। आसनार्थं वरहस्ते
दद्यात्। वरस्तु अहं वर्ष्मेत्यस्य वामदेवो विष्टरोऽनुष्टुप्॥ विष्टरोपवेशने विनियोगः॥ अहं वर्ष्मसु
जातानां विद्युतामिव सूर्यः इदं तमधितिष्ठामि यो मा कश्चाभिदासति इति मंत्रेणोदगग्रे विष्टर उ
पविशेत्। विष्टरमंत्रेण पुनः माक्रमस्वासीत॥ प्रयोगपारिजातकारादयस्तु सोत्र मंत्रेणा
दिस्मरणेनेच्छंति। ततो वरं केवलपाद्यं पाद्यं पाद्यमिति त्रिर्निवेदितं पाद्यं वरो गृह्णीयात्। ततोर्घ
कलशेनोदकेन वरस्य दक्षिणसव्यौ पादौ क्रमेण क्षालयेत्॥ तत्र मंत्रः॥ अस्मिन्राष्ट्रे श्रियमावे
शयाम्यतो देवीः प्रतिपश्याम्यापः॥ दक्षिणपादमवनेनिजेस्मिन्राष्ट्र इंद्रियं दधामि। सव्यंपाद
मवनेनिजेस्मिन्राष्ट्र इंद्रियं वर्धयामि। पूर्वमन्यमपरमन्यं पादावनेनिजे। देवा राष्ट्रस्य गुप्त्या अ
भयस्यावरुध्यै॥ आपः पादावनेजनी द्विषंतं निर्दहंतु मे॥ ततो वरो लौकिकेन जलेनाचम्य ना०म०
गंधमाल्यफलादिसंयुक्तं पूर्ववत्त्रिर्निवेदितं अर्घ्यमर्घ्यमिति प्रतिगृह्यतां प्रतिगृह्णामीति अं १३०
जलिना प्रतिगृह्य पूर्ववत्त्रिर्निवेदितं आचमनीयमाचमनीयमिति प्रतिगृह्यतां प्रतिगृह्णामी
ति प्रतिगृह्य तस्यैकदेशं गृहीत्वा अमृतोपस्तरणमसीति मंत्रेणापो लौकिकजलेनाचम्य

आचमनीयानमधुपर्के॥ मित्रस्य त्वा चक्षुषा प्रतीक्षे इत्यवेक्ष्य मधुपर्को मधुपर्को मधुपर्क इति प्रति
गृह्यतां प्रतिगृह्णामीति त्रिर्दत्त्वा निवेदितं मधुपर्कं देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो ह
स्ताभ्यां प्रतिगृह्णामीति मंत्रेणांजलिना प्रतिगृह्यांजलिस्थमेव मधुवाता इति तृचेनावेक्षयेत्। मधु
वाता इति तृचस्य राहूगणो गोतमो विश्वेदेवा गायत्री। मधुपर्कावेक्षणे विनियोगः॥ मधुवाता ऋता
यते मधु क्षरंति सिंधवः। माध्वीर्नः संत्वोषधीः। मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौर
स्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः। माध्वीर्गावो भवंतु नः॥ ततस्तत्पात्रं सव्ये
हस्ते धृत्वा अंगुष्ठानामिकाभ्यां मधुपर्कं त्रिः प्रदक्षिणमालोड्यांगुष्ठगतं मधुपर्कलेपं वसवस्त्वा
गायत्रेण छंदसा भक्षयंत्विति पूर्वस्यां क्षिपेत्। एवं रुद्रास्त्वा त्रैष्टुभेन छंदसा भक्षयंत्विति पूर्व
स्यां क्षिपेत्। एवं रुद्रास्त्वा त्रैष्टुभेन छंदसा भक्षयंत्विति दक्षिणतः॥ आदित्यास्त्वा जागतेन
छंदसा भक्षयंत्विति पश्चात्। विश्वे त्वा देवा आनुष्टुभेन छंदसा भक्षयंत्विति उत्तरतः क्षिपेत्। भूते
भ्यस्त्वेति त्रिरावृत्य तेन मंत्रेण मध्यात्किंचित्किंचिद्गृहीत्वा विराजो दोहोसीति प्रथमं प्राश्य लौकिको
दकेनाचम्य पुनर्गृहीत्वा विराजो दोहमशीयेति द्वितीयं प्राश्य पूर्ववल्लौकिकोदकेनाचम्य पुनः

गृहीत्वाभ्यर्पितोहः पद्यायैविराज इति तत्तां पंच्यारूपस्वर्वविष्टरोकोदकेनाचम्यमधुपर्कशेषमुदङ्मुखो
ब्राह्मणायप्रयच्छेत। लोकविधिष्टत्वात्कमलं निक्षिप्य षैमर्द्धवल्लिवेदिता च मनीयेकदेशाममृता
पिधानमसीतिपीत्वा लौकिकोदकेनाचम्य। ब्राचम्यात्यजलं ऽशेषसर्वांगहीत्वासत्यं यशः श्रीर्म
यिश्रीः श्रयतामितिप्रारूप। लौकिकोदकेनद्विराचामेत। ततो दाता गौर्गौरितिनिवेदितां गां माता
रुद्राणामित्यस्य भार्गवोजमदग्निर्गौस्त्रिष्टुप्॥ गोत्सर्जने विनियोगः। माता रुद्राणां दुहिता वसू
नांस्वसादित्यानाममृतस्य नाभिः। प्रनुवोचं चिकितुषेजनाय मा गामनागामदितिं वधिष्ट॥ ॥इति
मंत्रं जपित्वा॥ ॥ॐ मुत्सृजंत्येते तृणान्यत्ति विसर्जयेत॥ ततो दाता गंधमाल्यवस्त्रयुगोपवीतयुगाभर
णादिभिर्वरं यथाविभवं मंत्रैः पूजयेत। मंत्रास्तु। गंधद्वारामितिगंधं। याः फलिनीरितिपुष्पं। युवं
वस्त्राणीतिवस्त्रयुगं॥ यज्ञोपवीतमितिउपवीतं॥ हिरण्यरूप इति आभरणं। हिरण्यरूपः सहिर
ण्यसंदृगपांनपात्सेदुहिरण्यवर्णः। हिरण्ययात्परियोनेर्निषद्याहिरण्यदाददत्यन्नमस्मै॥ कुसुम
ग्रास्तुलिखिताः। ततो वरेण सहागतांस्तद्बंधूनपियथाविभवं पूजयेत॥ विष्टरलक्षणमुक्तंप
रिशिष्टे॥ पंचाशताभवेद्ब्रह्मातदर्धेनतुविष्टरः। दक्षिणावर्तको ब्रह्मावामावर्तस्तुविष्टरइति

।पक्षा।पंचविंशतिदर्भाणां वेण्यग्रे ग्रंथिभूषितः विष्टरे सर्वयज्ञेषु लक्षणं परिकीर्तितमिति॥ मधुपर्केद
ध्यलाभेपयो जलं वा प्रतिनिधिः। मधुलाभे घृतं गुडो वा। वरशाखया मधुपर्कदानमुक्तं गृह्यप
रिशिष्टे। वरस्यया भवेच्छाखा तच्छाखा गृह्यचोदितः। मधुपर्कः प्रदातव्यं न तु शाखेभेदी दातरी
ति॥ ॥इति मधुपर्कः॥ ॥अथ कन्यास्नाता परिहिताहतवस्त्रा गृहान्तः सूत्रवेष्टितोपलसहित
दृषदुपरि हरिद्रानिर्मितां गौरी हरौ सौभाग्यपादिकामनया पूजयित्वा इंद्राणी चतत्रैवाक्षतपु
ञ्जे पूजयेत्संप्रार्थयेत॥ देवेंद्राणि नमस्तुभ्यं देवेंद्रप्रियभामिनि॥ विवाहं भाग्यमारोग्यं पुत्रलाभं
च देहि मे रत्ने। ततो गौरी सौभाग्यं प्रार्थयमाना तत्रैव तिष्ठेत॥ ॥अथ कन्यादानार्थं जलशुद्धिः
॥ ॥पुरोधा वरदक्षिणत उदङ्मुख उपविश्य मध्ये प्रागग्रान् उदगग्रान्वा दर्भानास्तीर्य तेषु तैजसं
मृद्देनीयादिजलं सर्वं किलशं निधाय यवव्रीहियवानोप्य गंधपुष्पादिनिरलंकृत्य उदपात्रं देवम्
रवमवस्तीयान्विंगान्भिरापोहिष्ठेत्यादिनवस्नानिरभिमंत्रयेत॥ अथ कन्यादानादि॥ ब्राह्मणः स्व
लंकृतैर्वेदमनिस मंगलगीतं तूर्यनिर्घोषे क्रियमाणे वरवधुपरभागयोर्हस्तात्तरालंविहाय प्रसे
कं मस्तकमस्तं सितं तंडुलैर्द्वौराशीकृत्य मध्ये कुंकुमादिकृतस्वस्तिकांकितमंतःपटं धार

ष्पोमध्ये उत्तरदत्रां धारयेसु॥ अथ सर्वरात्रौ प्रसंकृत्य खं वरं पश्चिमरात्रे ओवसाप्राङ्मुखी कर्मांतंडुल
गुडजीरकपूताजली ३ आवपिश्च वस्त्राण्यसलेतानि ऋमितेति सृकं पवेषु॥ सुसत्येनोत्तभिता भूमि
ः सूर्येणोत्तभिता द्यौः॥ ऋतेनादित्यास्तिष्ठंति दिवि सोमो ऽ अधिश्रितः॥ सोमेनादित्या बलिनः
सोमेन पृथिवी मही॥ अथो नक्षत्राणामेषामुपस्थे सोम ऽ आहितः॥ सोमं मन्यते पपिवान्यत्सं
पिंषंत्योषधिं॥ सोमं यं ब्रह्मणो विदुर्न तस्याश्नाति कश्चन॥ आच्छद्विधानैर्गुपितो बार्हतैः॥
सोमरक्षितः॥ ग्राव्णामिच्छृण्वंतिष्ठसि न ते ऽ अश्नाति पार्थिवः॥ यत्त्वा देव प्रपिबंति तत ऽ आप्याय
से पुनः॥ वायुः सोमस्य रक्षिता समानां मास ऽ आकृतिः॥ रैभ्यासीदनुदेयी नाराशंसी न्योचनी॥
सूर्याया भद्रमिद्वासो गाथयैति परिष्कृतं॥ चित्तिरा ऽ उपबर्हणं चक्षुरा ऽ अभ्यंजनं॥ द्यौर्भूमिः को
श ऽ आसीद्यदयात्सूर्या पतिं॥ स्तोमा ऽ आसन्प्रतिधयः कुरीरं छंद ऽ ओपशः॥ सूर्याया ऽ अश्विना व
राग्निरासीत्पुरोगवः॥ सोमो वधूयुरभवदश्विनास्तामुभा वरा॥ सूर्यां यत्पत्ये शंसंतीं मनसा सविता
ददात्॥ मनो ऽ अस्या ऽ अन ऽ आसीद्द्यौरासीदुत च्छदिः॥ शुक्रावनड्वाहावास्तां यदयात्सूर्या गृहं॥
२ ऋक्सामाभ्यामभिहितौ गावौ ते सामनावितः॥ श्रोत्रे ते चक्रे ऽ आस्तां दिवि पंथाश्चराचरः॥ शु

चि ते चक्रे यात्या व्यानो ऽ अक्ष ऽ आहतः॥ अनो मनस्मयं सूर्यारोहत्प्रयती पतिं॥ सूर्याया वहतु
प्रागात्सविता यमवासृजत्॥ अघासु हन्यंते गावो ऽर्जुन्योः पर्युह्यते॥ यदश्विना पृच्छमाना अया
यातं त्रिचक्रेण वहतुं सूर्यायाः॥ विश्वे देवा ऽ अनु तद्वामजानन्पुत्रः पितराववृणीत पूषा॥ यदया
तं शुभस्पती वरेयं सूर्यामुप॥ क्वैकं चक्रं वामासीत्क्व देष्ट्राय तस्थथुः॥ ३ द्वे ते चक्रे सूर्ये ब्रह्माण
ऽ ऋतुथा विदुः॥ अथैकं चक्रं यद्गुहा तदद्धातय ऽ इद्विदुः॥ सूर्यायै देवेभ्यो मित्राय वरुणाय च॥ ये
भूतस्य प्रचेतस ऽ इदं तेभ्योऽकरं नमः॥ पूर्वापरं चरतो माययैतौ शिशू क्रीडंतौ परियातो ऽ अ
र्णवं॥ विश्वान्यो भुवना विचष्ट ऽ ऋतूंरन्यो विदधज्जायसे पुनः॥ नवोनवो भवति जायमानो ऽ
ह्नां केतुरुषसामेत्यग्रं॥ भागं देवेभ्यो विदधात्यायन्प्रचंद्रमास्तिरते दीर्घमायुः॥ सुकिंशुकं शल्म
लिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रं॥ आरोह सूर्ये ऽ अमृतस्य लोकं स्योनं पतिभ्यो वहतुं कृणुष्व॥ उ
दीर्ष्वातः पतिवती ह्येषा३ विश्वावसुं नमसा गीर्भिरीळे॥ अन्यामिच्छ पितृषदं व्यक्तां स ते भा
गो जनुषा तस्य विद्धि॥ उदीर्ष्वातो विश्वावसो नमसेळामहे त्वा॥ अन्यामिच्छ प्रफर्व्यं॥ सं जा
यां पत्या सृज॥ अनृक्षरा ऋजवः संतु पंथा येभिः सखायो यंति नो वरेयं॥ समर्यमा सं भगो नो

नियात्वंजास्यत्वंसुयममस्तुदेवाः॥ प्रत्वामुंचामिवरुणस्यपाशाद्येनत्वाबध्नात्सवितासुशेव
॥ ऋतस्ययोनौसुकृतस्यलोकेरिष्टांत्वासहपत्यादधामि॥ प्रेतोमुंचामिनामुतःसुबद्धाम
मुतस्करं। यथेयमिंद्रमीढ्वःसुपुत्रासुभगासति॥ पूषात्वेतोनयतुहस्तगृह्याश्विनात्वा
प्रवहतांरथेन। गृहान्गच्छगृहपत्नीयथासोवशिनीत्वंविदथमावदासि॥ इहप्रियंप्रजयाते
समृध्यतामस्मिन्गृहेगार्हपत्यायजागृहि। एनापत्यातन्वंसंसृजस्वाधाजीव्रीविदथमाव
दाथः॥ नीललोहितंभवतिकृत्यासक्तिर्व्यज्यते। एधंतेअस्याज्ञातयःपतिर्बंधेषुबध्यते। प
राद्देहिशामुल्यंब्रह्मभ्योविभजावसु। कृत्यैषापद्वतीभूत्व्याजायाविशतेपतिं॥ अश्रीरात
नूर्भवतिरुशतीपापयामुया। पतिर्यद्वध्वोवाससास्वमंगमभिधित्सते। येवध्वश्चंद्रंव
हतुंयक्ष्मायंतिजनादनु। पुनस्तान्यज्ञियादेवानयंतुयतआगताः॥ माविदन्परिपंथिनोय
ऽआसीदंतिदंपती। सुगेभिर्दुर्गमतीतामपद्रांत्वरातयः॥ सुमंगलीरियंवधूरिमांसमेतपश्य
त। सौभाग्यमस्यैदत्वायाथास्तंविपरेतन॥ तृष्टमेतत्कटुकमेतदपाष्ठवद्विषवन्नैतदत्तवे॥
सूर्यांयोब्रह्माविद्यात्सइद्वाधूयमर्हति॥ आशसनंविशसनमथोअधिविकर्तनं॥ सू ना०म०

१३३

र्यायाःपश्यरूपाणितानिब्रह्मातुशुंधति॥ गृभ्णामितेसौभगत्वायहस्तंमयापत्याजरदष्टिर्य
थासः। भगोअर्यमासवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः॥ तांपूषंछिवतमामेरयस्वयस्यां
बीजंमनुष्यावपंति। यानऊरूउशतीविश्रयातियस्यामुशंतःप्रहरामशेपं। तुभ्यमग्रे
पर्यवहन्सूर्यांवहतुनासह। पुनःपतिभ्योजायांदाग्नेप्रजयासह। पुनःपत्नीमग्निरदादायुषा
सहवर्चसा। दीर्घायुरस्यायःपतिर्जीवातिशरदःशतं। सोमःप्रथमोविविदेगंधर्वोविविद
उत्तरः। तृतीयोअग्निष्टेपतिस्तुरीयस्तेमनुष्यजाः॥ सोमोददद्गंधर्वायगंधर्वोददग्नये॥
रयिंचपुत्रांश्चादादग्निर्मह्यमथोइमां॥ इहैवस्तंमावियोष्टंविश्वमायुर्व्यश्नुतं॥ क्रीडंतौपुत्रै
र्नप्तृभिर्मोदमानौस्वेगृहे॥ आनःप्रजांजनयतुप्रजापतिराजरसायसमनक्त्वर्यमा॥ अदु
र्मंगलीःपतिलोकमाविशशंनोभवद्विपदेशंचतुष्पदे॥ अघोरचक्षुरपतिघ्न्येधिशिवापशुभ्य
ःसुमनाःसुवर्चाः। वीरसूर्देवकामास्योनाशंनोभवद्विपदेशंचतुष्पदे। इमांत्वमिंद्रमीढ्वःसुपुत्रांसु
भगांकृणु। दशास्यांपुत्रानाधेहिपतिमेकादशंकृधि। सम्राज्ञीश्वशुरेभवसम्राज्ञीश्वश्र्वां
भव। ननांदरिसम्राज्ञीभवसम्राज्ञीअधिदेवृषु। समंजंतुविश्वेदेवाःसमापोहृदयानिनौ। संमा

तरिश्वासंधानासमुद्धातुनो।।८।।अविधावामववपाणिग्रातंसायंतुसन्नते।तेजस्वी वपत्रास्वी वध
र्मपत्नीपतिव्रता।।जनयद्बहूपुत्राणिमा च दुःखंलभेत्क्वचित्।।मन्त्रानिस्तोमपानिसंभवेद्धर्मपरायण
::श्रेष्टपुत्राभवंलचसुभगा चपतिव्रता।।भर्तुश्चैवपितुर्मातुर्हृदयानंदिनीसुदा।इंद्रस्यतुयथा
::पुत्राणवंलचसुभगाचपतिव्रता।।भर्तुश्चैवपितुर्मातुर्हृदयानंदिनीसुदा।इंद्रस्यतुयथा
दृणा।मनोधूम्रस्ययथाश्रिया।।शंकरस्यपयथागोरीतद्भर्तुरपिभर्त्तरि।अत्रेर्यथानुसूयास्यादृसि
ष्टस्याप्यरुंधती।कौशिकस्यपस्याश्रय।।शंकरस्यपयथागोरीतद्भर्तुरपिभर्त्तरि।ध्रुवेधिपोष्मा
म्यिमधृलाद्य बृहस्पतिः।ममापत्साप्रजावतीसंज्ञावशरदः शतं।।१०।।विहिसोतोरसःश्वतेने
द्रदेवमंसेत।यत्रेमदृष्याकपिरयः पुष्टेषुमनस्तरवा।विश्वस्मादिंद्रउत्तरः।।११।।पुरं श्रीमंगलगी
तानिचकुर्युः।वधुवरौमनसेष्टदेवताध्यायंतौसमाहितौतिष्टेतां।।अथयुग्मोतिविकेनमंगलपद्य
पाठस्वकंसुमुरूनेश्लितस्वैवलग्नामितिपवितेप्रतिष्टितेसर्वतः पटमुद्गापसार्यकंसावराभांप
रस्परसंमिश्रतंजलिस्थतंडुलगुडजीरकादकिरणंपरस्परेनिरीक्षणंकारणीयंततावरः।।अभ्रातृघ्नी
वरुणापतिघ्नी बृहस्पते। इंद्रापुत्रघ्नी।।लक्ष्म्यतामस्यैसवितःसवेतिजपत्वाक्षेत।ततः अघो
रचक्षुरपति अधिकंमायाविक्ष्यमाणोजपेत्।।अघोरचक्षुरपतिघ्न्येधि०।वीरसूर्देवकामा०

नाम्म०
१३४

दृमांत्वमिंद्र०दशास्यांपुत्रा०सम्राज्ञीश्वशुरे०ननांदरिसम्राज्ञी०।समंजंतुविश्वेदेवाः०।संमातरिश्वा
संधाता०।ततःइमश्रिणातस्यामुखोमध्येउंभूर्भुवःस्वरितिमधुघृतेतिभिःपरिमृज्यदर्भेनिरस्यध्य
प्तुपस्पृशेत।ततस्त्रिवारपंचवापरस्पर्शिरशिरसिअक्षतेस्यादिखवउतैः वधूस्वकमंजर
लिस्थापिताक्षतारोपणंकारणीयमाचारात्।।अकुवाइम्यग्नेसामसवारतांसेवनामजागा
सीदृमोनामसावाक्त्वामोपावदन्मिथुनंसंभवावप्रजात्याइतिनेसाब्रवीत्वामआयात्वा
मृतोममहिमेतितेदशभूत्वोपावदंतांतैनप्रतिवचनसमावदतेनास्तिस्त्रोभूत्वोपावदंस्तत्रि
सृभिःसमभवद्यत्रिसृभिःसमभवत्तस्मात्त्रिसाभिस्तुवंतितिसृभिरुद्गायंतितिसृभिर्हिसामस
म्मितंतस्मादेकस्यबह्वोजायाभवंतिनेकस्यैवबह्वःसहपतयोयद्वैतत्सा चामश्चसमभ
वतांतत्सामाभवत्तत्साम्नःसामत्वंसामनभवतियएवंवेदयोवैभवतियःश्रेष्टतामश्नुते
समामनभवत्सामामेवतेनैस्मद्रातिहिरिनिंदंतितेवेपंचाम ...लाकल्पेतामाहावश्च हिं
कारश्चप्रस्तावश्चप्रथमा चनागुरुउद्गीथश्चमध्यमाचप्रतिहारश्चोत्तमा चनिधनंचवष
ट्कारश्चतेयतस्वामतद्भूत्वापंचाम्न्द्भूत्वाकल्पेतांतस्मादाहुःपांक्तोयज्ञःपांक्ताःपशवः

ॐ

इति य उ विराजं दृष्ट्रीनामनिसमपद्येतां तस्माद्राड् विराजि यज्ञो दृष्टिमां प्रतिष्ठितः तस्मात्मा वै स्तोत्रिय
ः प्रजानुरूपः पत्नी धाय्या पशवः प्रगाथो गृहाः सूक्तं स वा अस्मिंश्च लोकेऽमुष्मिंश्च प्रजया पशुभि
श्च गृहैश्च वसति प्रजा वा अनुरूपः स उच्चैस्तरामिवानुरूपः शंस्तव्यः प्रजामेव तच्छ्रेयसीमात्मनः
कुरुते धाय्यां शंसति पत्नी वै धाय्या सा नीचैस्तरामिव धाय्या शंस्तव्या प्रतिवादिनी हास्य गृहे
षु पत्नी भवति यत्रैवं विद्वान्नीचैस्तरां धाय्यां शंसति प्रगाथं शंसति स्वरवत्या वाचा शंस्तव्यः
पशवो वै स्वरः पशवः प्रगाथः पशूनामवरुध्यै इन्द्रस्य नु वीर्याणि प्रवोचमिति सूक्तं शंसति
एतद्वै प्रियमिन्द्रस्य सूक्तं निष्केवल्यं हैरण्यस्तूपमेतेन वै सूक्तेन हिरण्यस्तूप आङ्गिरस इन्द्र
स्य प्रियं धामोपागच्छत्स परमं लोकमजयदुपेन्द्रस्य प्रियं धाम गच्छति जयति परमं लोकं य
एवं वेद गृहा वै प्रतिष्ठा सूक्तं तत्प्रतिष्ठिततमया वाचा शंस्तव्यं तस्माद्यद्यपि दूर इव पशूँल्लभते गृ
हानेवैनानाजिगमिषति गृहा हि पशूनां प्रतिष्ठा प्रतिष्ठा ॥२॥ ततः अनृक्षरा ऋजवः०॥ समर्य
मा सं भगो नो निनीया० इत्यनेन मन्त्रेण वरः प्राङ्मुखः स्वं वधूं च प्रत्यङ्मुखीं कृत्वा पित्रादिर्दत्तां वरदत्त
वस्त्रादिरहितां स्वर्देयाभरणाद्यलंकृतां वधूं वस्त्रसंज्ञकाहतवस्त्रपरिधानामुक्तकेशसयनाय व

वा०प्र०
१३५

रायदद्यात्। तत्रायं क्रमः। दाता वरदक्षिणतः स्वदक्षिणदेशस्थपत्नीसहित उदङ्मुख उपविश्य
बद्धशिखः शुचिराचम्य कुशपाणिः प्राणानायम्य देशकालौ संकीर्त्य मम समस्तपितॄणां निरतिश
यानन्दब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तये अनेन वरेण अस्यां कन्यायामुत्पाद
यिष्यमाणसंतत्या द्वादशावरान्द्वादशपरान्पुरुषान्पवित्रीकर्तुमात्मनश्च लक्ष्मीनारायण
प्रीतये ब्राह्मविवाहविधिना कन्यादानमहं करिष्ये इति कुशाक्षतयुक्तजलेन संकल्प्य। सपत्नी
कः स्यायोदङ्मुखाय एवं कन्यां संप्रगृह्य॥ ॥कन्यां कनकसंपन्नां कनकाभरणैर्युताम्। दास्यामि विष्ण
वे तुभ्यं ब्रह्मलोकजिगीषया। विश्वम्भरः सर्वभूतास्ताः सर्वभूताः साक्षिण्यः सर्वदेवताः॥ इमां क
न्यां प्रदास्यामि पितॄणां तारणाय। पठेति मन्त्रोपविष्टा। स्वदक्षिणस्थभार्यादत्तस्वर्णकलितजलधारं
मविच्छिन्नां नवकांस्यपात्रोपरि धृतकन्याञ्जलिपरिस्थवराञ्जलिदक्षिणहस्ते क्षिपन्ददेत्॥ ॥कन्या
तारयतु॥ ॥पुण्यं वर्द्धतां। शिवा आपः सन्तु। सौमनस्यमस्तु। यस्यापेतस्मातिहतमस्तु। अस्ते तवारिष्ट
चास्तु। दीर्घमायुः शान्तिः पुष्टिस्तुष्टिश्चास्तु। यच्छ्रेयस्तदस्तु। यत्पापं तत्प्रतिहतमस्तु॥ पुण्या
हं भवन्तो ब्रुवन्तु। स्वस्ति भवन्तो ब्रुवन्तु। ऋद्धिं भवन्तो ब्रुवन्तु। श्रीरस्त्विति भवन्तो ब्रुवन्तु। क्षेमुकम

वरोमुकगोत्रोमुकशर्माहं मम समस्तपितृणां निरतिशयानंदब्रह्मलोकावाप्त्यादिकन्यादानक
ल्पोक्तफलावाप्तयेऽनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसंतत्या द्वादशावरान्द्वादशपरा
न्पुरुषानात्मपवित्रीकर्तुमात्मनश्च लक्ष्मीनारायणप्रीतये अमुकगोत्रोत्पन्नायामुकप्रपौत्राया॰
मुकपौत्रायामुकपुत्रायामुकशर्मणे श्रीधररूपिणे वरायामुकप्रवरोपेतायामुक॰
गोत्रोत्पन्नाममुकप्रपौत्रीममुकपौत्रीममुकस्य मम सुपुत्रीममुकनाम्नीं कन्यां श्रीस्वरूपिणीं प्रजा
पतिर्देवस्याप्रजोत्पादनार्थं तुभ्यमहं संप्रददे न मम। कन्यां प्रतिगृह्णातु भवान्॥ इति वरहस्ते स
कुशाक्षतजलं क्षिपन् प्रजापतिः प्रीयतामिति मनसा स्मरेत्। कन्यादानेन ममैतेन वाश्रमिति
केचित्॥ एवं कन्यां तारयित्वा सहि प्रजापतिः प्रीयतामिति मनसा स्मरेदित्संतं त्रिवारं कन्यादान
कार्यं। इति शौनकप्रकारः॥ ॥ वरः ॐस्वस्तीति स्वीकृत्य कन्यां सायादक्षिणां समर्पितमरूप। कइदं कस्मा अ
दात्कामः कामायादात्कामः। कामोऽपादात्कामो दाता कामः प्रतिग्रहीता कामं समुद्रमाविश कामे
नत्वा प्रतिगृह्णामि कामैतत्ते वृष्टिरसि द्यौस्त्वा ददातु पृथिवी प्रतिगृह्णात्विति जपित्वा॥ धर्म
प्रजासिध्यर्थं कन्यां प्रतिगृह्णामीति वदेत्। ततो दानं॥ गौरीं कन्यामिमां विप्र यथाशक्ति सं

ना०भा०
१३६

विभूषितां। गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय। कन्ये ममाग्रतो भूयाः स्वदानान्मोक्षमाप्नुयां॥२॥
ममवंशकुले जाता मया लालिता वत्सराष्टकं॥ तुभ्यं विप्र मया दत्ता पुत्रपौत्रप्रवर्द्धिनी॥३॥ इत्यनवयस्काय
पालिता वत्सराष्टकमित्याद्यूहः कार्यः॥४॥ धर्मे चार्थे च कामे च नातिचरितव्या त्वयेयं नातिचरामी
ति वरः॥ दाता इदं कांचनमूल्यं तत्कन्यादानस्य प्रतिष्ठासिध्यर्थमिमां दक्षिणां तुभ्यमहं संप्र
ददे इति सजलं यथाशक्ति सुवर्णं कन्यादानदक्षिणात्वेन वरहस्ते दत्वा न ममेति वदेत्॥ ॐस्वस्ती
ति वरः॥ ततो दाता जलभाजनभोजनभाजनगोमहिष्यश्वगजदासदासीभूम्यादिनालंकारशय्या
विभवसंकल्पपूर्वकं वराय दद्यात्॥ तत्र गोदानमंत्रः॥ यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी
॥ विश्वरूपधरो देवः प्रीयतामनया गवा॥१॥ इति गोदानमंत्रः॥ ॥ सर्वसस्याश्रया भूमिर्वराहेण
समुद्धृता॥ अनंतसस्यफलदा अतः शांतिं प्रयच्छ मे॥२॥ इति भूमिदानमंत्रः॥ ॥ अथ दासीदा
नमंत्रः॥ ॥ इयं दासी मया तुभ्यं श्रीवत्स प्रतिपादिता। दासकर्मकरी भोग्या यथेष्टं भद्रमस्तु ते॥३॥ इ
ति दासीदानं०॥३॥ अथ शय्यादानं०॥ अथांगुलीयदानमंत्रः॥ हिरण्यगर्भसंभूतं सुवर्णं चांगुलीय
कं। सर्वप्रदं प्रयच्छामि प्रीयतां कमलापतिः॥४॥ इत्यंगुलीयदानमंत्रः॥ ॥ अथ कुंडलदानमंत्र

॥ क्षीरोदमथने पूर्वमुत्पन्नं कुंडलद्वयं ॥ श्रियासहसमुद्भूतं देवश्रीः प्रीयतामिति ॥ ६ ॥ इति कुंडल
दानमंत्रः ॥ अथ गृहदानमंत्रः ॥ इदं गृहं गृहाणत्वं सर्वोपस्कारसंयुतं ॥ तव विप्र प्रसादे
न मसादेमास्त्वनिमतफलं ॥ ७ ॥ इति गृहदानमंत्रः ॥ अथ महिषीदानमंत्रः ॥ इंद्रादि
कपालानां या राज्यमहिषी शुभा ॥ महिषासुरस्य जननी सास्तु मे सर्वकामदा ॥ ८ ॥ इति महिषी
दान० ॥ अथ ताम्रपात्रदानमंत्रः ॥ पुरीमपवादपेक्षं मारं भर्तारस्य च भक्षणात् । तुलसन्न पा
प्रदानेन ताम्रपात्रं स्पृनस्पृतु ॥ ९ ॥ इति ताम्रपात्रदानमंत्रः ॥ अथ कांस्यपात्रदानमंत्रः ॥
यानि पापानि काम्यानि कामोत्थानि कृतानि च । कांस्यपात्रप्रदानेन तानि नश्यंतु सर्वदा ॥ १० ॥ इ
ति कांस्यपात्रदानमंत्रः ॥ इसादिसमस्तान पिमं वै ममंत्रे वदियानि ॥ अथ वर ॥ यत्कक्षीवांसंवन ना०भ०
नमिति मंत्रस्य विश्वेदेवाः संप्रियास्वावनन ॥ इत्यनेन मंत्रेण कुमारं दक्षिणकुक्षिमभिमृशेत १३३
॥ अथ पुरोधाः कांस्यपात्रे पूर्ववर्तितकलशजलमासिं ॥ अनाधृष्टमसिस्य वामदेव आपो बृह
ती ॥ जलनाभिमंत्रणे विनियोगः ॥ अनाधृष्टमस्यनाधृष्टं देवानामोजो अभिशस्तिपाः । अनभि
शस्त्यंजसा सत्यमुपगेषं स्विते मा धाः प्रतिजलमभिमंत्र्य सहिरण्यपवित्रया सकुशदूर्वया प

ल्लवया सपर्णया दुर्वयाद्र्याश्चरवयाव पूर्ववदभिषिंचेत् ॥ तत्र मंत्राः ॥ आतः सत्यामिति च तस्त्वणं
सूर्यासावित्री सूर्यासावित्री ॥ आद्या जगती ॥ द्वितीया त्रिष्टुप् अंत्ये द्वे अनुष्टुभौ । उभयाभिषेके विनियो
गः ॥ ॐ आ नः प्रजां० १ ॐ अघोरचक्षुरप० २ इमां त्वमिंद्र मीढ्वः ३ ॐ मंमंनो त्वामृधः ४ ॐ समंजंतु वि
श्वेदेवा० ५ । समुद्रज्येष्ठा इति चतसृणां वसिष्ठ आपस्त्रिष्टुप् ॥ अभिषेके० । ॐ समुद्रज्येष्ठा इति त्रि
कु० ६ । आपो हिष्ठेति तिसृणां अंबरीषः सिंधुद्वीप आपो गायत्री ॥ अभिषेके वि० । आपो हिष्ठेति
तिसृ० ३ वरुणयोरेकाभिमंत्रणे कन्याभिषेके कुर्यादिति केचित् । ततो दुग्धाक्तेन द्विगुणसूत्रकेण वस्त्रे
ण दंपती कंठदेशे कटिदेशे च शानैस्मार सप्तवारं चतुर्वारं वा प्रदक्षिणं वेष्टयेत् ॥ पुरोधा एते
मंत्रैः ॥ ॐ परित्वा गिर्वणो गिर ॥ इमा भवंतु विश्वतः । वृद्धायुमनु वृद्धयो जुष्टा भवंतु जुष्टयः ॥ १ ॥ ता
त्वोमहे मरुतः ॥ २ ॥ वृषाग्नो विपश्चितो रेभस्य प्रभृथे हवामहे ॥ हिरण्यवर्णान्ककुहान्यतस्रुचो ब्रह्म
एयंतः शंस्यं राधः ईमहे । हवाध्वनि मोरक्षकि स्मे मोरक्षापोक्ते मोरक्ष योजनेभ्यः । इंद्रामासु
मो ॥ अर्चता नरो मोरक्षा धुरो रक्षामुक्तो वृहस्मः ॥ ते ॥ अद्भ्यो इद्रामन्नाप्तः आशावस्तोमा माधानं
पर्यति हर्यतं । ते ॥ कुसुतस्य सोमस्यांधसो ज्ञोः पायूषस्य यमस्य भेजिरो ते सोमादो हरी ॥ इं

द्रस्मन्निसत्तैंमुंडहंतो। अथासनेशवि। तेनिर्ड्गंधपपिवांसोमंमा धूंड्रोवर्द्धनेष्टप्रतेहूयमाने।२
षावो। अस्तुनौकिलगरिपाथनेलावंत:सद्दसिक्वनाशिषा:। रेवत्सेवमहसास्वारवस्तनयस्य
ग्रावाणो। अनुपश्चमधुरं।१ तत: कंठदेशात्सूत्रं नैत्रमाधोनिष्का। रूपकं कुंकुमाक्तमूर्णा
युमुक्तंवकृत्वातेनहरिद्राखंडंबध्वातद्धृत्वामहस्तप्रकोष्ठेवरोबध्नीयात्। नीललोहितं०।१धं
ते० इत्यनेनमंत्रेण॥ तत: कटिदेशात्सूत्रमुपरिनिष्कास्य। कुंकुमाक्तमूर्णायुक्तंचकृत्वातेनह
रिद्राखंडंबध्वातद्दक्षिणप्रकोष्ठेवधूर्बध्नीयात्। नीललोहितमित्यनेनमंत्रेण॥ यक्षसूत्रवे
वाद्यकृत्वैवसर्वसंपादितकौतुकद्वयमध्येएकंसूत्रंपुरोधस॥ विम्बेतौनेसवनेषुबुभवाप्या
यावकथमघवन्निंद्रसुन्वते॥ पारावतंयत्पुरुषंभृतंवस्वपातृणो: इरभाय। त्रषिवंधवे। रूस
स्मिन्मंत्रेपठितेकन्यावरस्यदक्षिणहस्तेबध्नीयात्॥ परिसूत्रवेष्टनंक्रियते॥ तत्रातसूत्रबंध
नमेककौतुकसंपादनपूर्वोक्तंकौतुकसत्रद्वयंनकार्यं। तत: अग्नेविश्वेभिर्विनातिर वोग्निस्त्रि
धृष्या। कुर्णास्तुकबंधनेविनियोग:। ॐअग्नेविश्वेभि:स्वनीकदेवेरूर्णावंतंप्रथम: सा हयोनिं॥
कुशाग्निंघृतवंतंसवित्रेयज्ञंनययजमानायसाधु॥ इतिमंत्रेणवरोबध्नीयात् दक्षिणेनरकेश

१ भूयो: क्रमेणमंत्रावृत्या कुर्णाद्विगुणं बध्नीयात्। कुर्णास्तुकबंधनमन्वारत: कृताकृतं। शिखेवि
मुंचेतियद्विकृतेभवतइत्यग्रेसूत्रनिर्देशात्॥ अथध्रुववरायुर्वर्द्धनकारकमक्षतारोपणाकुमारि
तद्यथा। तैजसपात्रेगव्यक्षीरमुक्तघृतालितंडलानादायवर: क्षालितपाणि: प्रक्षालितवधूजलो
क्षीरघृतंसहस्तद्वयांजलोअविर्द्विवारंतथैवतंदुलानोपक्षीरयुक्तघृतेनतथैवाविदारभिधारयेत्। त
तोवरांजलावण्येवमेवदाद्वा। अनेनवामस्तकादिरूपस्तरणादिप्रकारेणधारितेसतिदातावरवधूजले
:सुवर्णानिधायकन्यांजलिंवरांजल्युपरिविधाय। कन्यातारयतु॥ दक्षिणा:पातुबहुदेयंचास्तु। पुण्
बर्द्धता। शांति: पुष्टिस्तुष्टिश्चास्तु। निर्विघ्नकरणमस्तु। अनेनक्रमेणसंपदस्तु। इत्युच्चार्यकन्यामुधसत
यांजलिस्थानक्षतान्। नगोमेकाम: समृध्यतामितिवरमूर्द्धन्यारोपयेत्॥ ततोवर: स्वांजलिस्थान्॥
यज्ञोमेकाम:समृध्यतामितिकन्याशिरसिसंक्षिपेत्॥१ एवमेववधूजलोक्षीरघृतमिसादिति।
निर्विघ्नकरणमस्तु। अनेनक्रमेणसंपदस्त्वित्युच्चार्यकन्यामूर्द्धसेसंततकृत्वातयांजलिस्थानक्षतान्। श्रि
योमेकाम:समृध्यतामितिवरमूर्द्धन्यारोपयेत्॥ ततोवर: स्वांजलिस्थानक्षतान्॥ धर्मोमेकाम:स
मृध्यतामितिकन्याशिरसिक्षिपेत्।२ एवंपूर्ववत्तद्विरूपस्तरणादिकन्यामूर्द्धसेसंततकृत्वातयांजलि

स्थानक्षतान्।प्रजामेकामः समृध्यतामिति वरमूर्द्धन्यारोपयेत्।स वरः सांजलिस्थानक्षतान्।पशूनिमे
कामः समृध्यतामिति कन्याशिरसि क्षिपेत्।३।ततः कन्या वरांजलिं स्वरूपस्ती यदि स्त्री दुर्लभापत्य यदि
कामः समृध्यतामिति कन्याशिरसि क्षिपेत्।ततः कन्या वरांजलिं पूर्ववदक्षतान् निधाय वरं
रक्षितां धारयेत्।ततो द्वितीयेनवारपूर्ववत्कन्यांजलावक्षतान् निधाय प्रजाकामं वदेत्।ततो वरः प्रजामेकामः समृध्यतामिति
जलिं निधाय पूर्ववत्कन्यायास्यक्षतान् दिवाकामः प्रजां वदेत्।ततो वरः यज्ञोमेकामः समृध्यतामिति
कन्यामूर्द्धन्यक्षतान् क्षिपेत्।कन्यातु भगोमेकामः समृध्यतामिति वरमूर्द्धनि क्षिपेत्।एवं पुनर्द्वि
वारं कार्यं॥ तत्र द्वितीये धर्मोमेकामः समृध्यतामिति वरः।कन्याशिरसि अक्षतानुत्क्षिपेत्।कन्या
श्रियोमेकामः समृध्यतामिति वरशिरसि॥ अयवारो वधूवरांजलिं पूर्ववदापूर्य सांजलिमन्ये नपूर्ववत्तदुपर
पिता उ ओ पूर्ववत्तद्वधूपूर्वकं तत्र मक्षतानारोपयेतां।एवं सप्तवारमक्षतारोपणं कार्यं॥ केचित्स्व ना०सं०
नारोपणयोर्भोगोमे इत्यादिमंत्रान्तेऽछंति॥ अपवरः स्वशिरः पुष्पमेकं क्षीरघृतेनाभ्यज्य तेन १२९
कन्याललाटे तिलकं कुर्यात्॥ सापि स्वशिरः पुष्पेण तथैव वरललाटे तिलकं कृत्वा पुष्पमालां व
रकंठे निदध्यात्॥ वरोपि कन्याकंठे॥ ततो वरपक्षसुवासिनीवधूं वरोपसार्य अनुरवास्वपदे उपावेशयेत्।वा
रजाप्राप्तपुत्रा सत्कं वस्त्रद्वयं सकंचुकं कृष्णमणि सूत्रयुतं वधूं समर्पयेत्तामेकं परिधाप्यापर

सुमुत्तरीयं कुर्यात्॥ ततो वरस्तत्स्तत्कृष्णमणिसूत्रं।मांगल्यं तंतुनानेन भर्तृर्जीवनहेतुना।कंठे
बध्नामि सुभगे सा जीव शरदः शतं।इति मंत्रेणेष्टदेवतां स्मरन् वधूकंठे बध्नीयात्।भूषणान्याप्यु
ष्मंवर्चस्यमिति सूक्तं पठन् भूषयेत्॥ ओं आयुष्यं वर्चस्यं रायस्पोषमौद्भिदं।इदं हिरण्यं वर्चस्व
जैत्रायाविशतादु मां।उ दैवाजिष्टतनाषाट्सभासाहं धनंजयं।सर्वाः समग्राः ऋद्धयो हिरण्ये
स्मिन्त्समाहिताः॥ शुनमहं हिरण्यस्य पितुर्नामेव जग्रभ।तेन मां सूर्यत्वचमकरं पुरुषु प्रियं।संम्रा
जं च विराजं चाभिष्टिर्याच मे ध्रुवा॥ लक्ष्मी राष्ट्रस्य या मुखे तया मामिंद्र संसृज॥ अग्ने प्रजातं परियद्धि
रण्यममृतं जज्ञे अधि मर्त्येषु।य एनद्वेद स इदेनमर्हति जरामृत्युर्भवति यो बिभर्ति।यद्वेद राजा व
रुणो यद् देवी सरस्वती।इंद्रो यद्वृत्रहा वेद तन्मे वर्चस आयुषे॥ नतद्रक्षांसि न पिशाचास्त
रंति देवानामोजः प्रथमजं ह्येतत्॥ यो बिभर्ति दाक्षायणं हिरण्यं स देवेषु कृणुते दीर्घमायु
स मनुष्येषु कृणुते दीर्घमायुः॥ यदाबध्नन्दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः।त
न्म आबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासत्॥ घृतादुल्लुप्तं मधुमत्सुवर्णं धनंजयं
धरुणं धारयिष्णु।ऋणक् सपत्नानधरांश्च कृण्वदारोह मां महते सौभगाय॥ प्रियं मा कुरु दे

वेषुप्रियंराजसुमाकुरु ॥ प्रियंविश्वेषुगोप्त्रेषुमयिधेहिहि रुचारुचं ॥७॥ अग्निर्येनविराजतिसूर्योये
नविराजति ॥ विराजेनविराजति तेनास्मान्ब्रह्मणस्पते विराजसमिधंकुरु ॥ अर्वाचमिंद्रमुमुतो
हवामहेयोगोजिद्धनजिदश्वजिद्यः इमंनोयज्ञंविहवेजुषस्वास्यकुर्मोहरिवोमेदिनंत्वा ततो हरि
द्राखंडयुतानि पंचपूगीफलानि मुद्राचाराद्यखंडुकयुतानि कृत्वा पात्रे निधाय तत्र पुरोधा उमामी
गणपतेरावाहनादि दक्षिणांतोपचारेर्गणानां त्वा आनंद इति मंत्राभ्यां पूजां कारयेत् ॥ ततो
वरे ॥७॥ अत्र ब्राह्मणेभ्यो यथाशक्ति गणपतिप्रीतये दक्षिणा देया ॥ ततः पुरोधास्तानि हरिद्रा
खंडलडुकयुतानि शृंगानि दंपत्योरुत्तरीययोः पृथक्पृथक् विवाहव्रतरक्षणं गणपति
मनुस्मृत्य गणानां त्वा आनंद इति मंत्राभ्यां बध्नीयात् वधूवरौ विवाहव्रतसमाप्तिं तत् इंद्र यं
विसर्जनीया ॥ ततः पुरोधाः नीललोहितं ॥० घृतेऽस्मा ० इत्येतेन मंत्रेण तयोरुत्तरीययोर्मिथो बं ९ ना०सं०
ध्नीयात् ॥ ततः दाता सभार्यो वृद्धाः पुरंध्रो ज्ञाति बांधवान्वक्ष्यमाणा इष्टिरादि अक्षतारोपणं कु १४०
र्युः ॥ ततो दंपती पात्रस्थसितंतडुलपुंजत्रये उदकसंस्थां महालक्ष्मी पार्वती शची चेषोडशोपचा
रैर्नाममंत्रेण सर्वसौभाग्यादि प्रार्थयेतां ॥ ॐ महालक्ष्म्यै नमः आवाहनाद्यासनादि सम

र्पयामि ॥ ॐ पार्वत्यै नमः आवाहनाद्यासनादि समर्पयामि ॥ ॐ शच्यै नमः आवाहनाद्यासनादि समर्पया
मि ॥ प्रभृति घ्यादि संकल्पं चतुर्दिवसपर्यंत विवाहव्रतं चरिष्ये इति संकल्प्य ॥ प्रथमदिने रोहि
णी सोमो भूत्वा राक्षायणी पूजयेत् ॥ ततो वधूवरौ हरिद्राजीरकादिमंगलद्रव्यपरिक्षिप्तवंशपात्रोप
पनानि वायनकसंज्ञानि सुवासिनीभ्यो लक्ष्म्यादिदेवताप्रीत्यर्थं यथाशक्ति दद्यात् ॥ अथ द्विजे
राशिषो देयाः ॥ तत्र मंत्राः ॥ ॐ भद्रं कर्णेभिः ॥० द्रविणोदा द्रवि० सविता पश्चातात् ॥० आ नो वो नवो
भवति ॥४॥ उत्ताद्दिवि दक्षिणा ॥०॥५॥ दक्षिणावतामिदानि आयुः षरान्ताः षट् ॥६॥ ततो वधूवरोप
रस्परहस्तधारणेन चुबहिर्गमनं पूर्वोक्तलक्षणां वेदीं मंत्रघोषेण गच्छेतां ॥ मंत्रास्तु
नियताः ॥ स्वस्ति ताऽसै नगरे तावा देवतातावा ॥ आयुः पदं तावा पठनीयाः ॥ मुख्यास्तु अ
युः पदान्तास्ते च लिखिताः ॥ त्रयो गणपरिजाते तु ग्रहयोः परिशिष्टानुसारेण कन्यादानं तत्वतिश्य
हंजवनिकापूर्वकं मंत्रवन्निरीक्षणाक्षतारोपणं स्यादिदं न पुरोधः कर्तका निषेक पर्यस
रक्षीरघृततिलककरणमाल्यारोपणपूर्वसंपादितकौतुकसूत्रबंधगणपतिपूजनं कं मु
कबंधनादि सर्वमनुष्ठानक्रमतः ॥ सचेदिदानीं चारवशेनानुसंधेयः ॥ अथ स्वस्त्या

वचाजनपतधर्माश्रमधर्माश्रतान्विवाहेद्वितीयादिसूत्रसंवृतः पदार्थस्वरूपएवतर्कमे॰
पिसमत्वादेतन्नाचारप्रामाण्यस्येति दिक्॥ ॥इति विद्वन्मुकुटमाणिक्यश्रीरामेश्वर
नहसूत्रमंरित्स्तु नारायणभट्टकृतेप्रयोगरत्नेकन्यादानप्रयोगः समाप्तः॥ ॥अ
थविवाहहोमप्रयोगः॥ ॥वरःप्रागुक्तवेदिकायांपीठाद्यासनेप्राङ्मुखउपविश्यपश्चि
मभागेणनियमितवाचंवधूमानीयस्वदक्षिणतउपवेश्यपादिराचम्यप्राणानायम्यदे
शकालौसंकीर्त्यप्रतिगृहीतायामस्यांवध्वांभार्यात्वसिद्धयेगृह्याग्निसिद्धयेचविवाह
होमंकरिष्ये॥तदंगस्थंडिलोपलेपनाद्यग्निप्रतिष्ठापनंकरिष्ये॥इतिसंकल्प्याग्नेःपश्चात्कृ
दृषदंसोपलांप्रतिष्ठाप्यप्रागुदीच्यांधान्यराशौउपर्युदकपूर्णकलशंनिधायपञ्चरत्नै
र्विधायगंधपुष्पैरलंकृत्यदग्नेःसप्ततण्डुलराशीनुपकल्प्य समिधमादायदेश
कालकथनपूर्वकमस्मिन्विवाहहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये अस्मिन्न॰
न्वाहितेग्नौजातवेदसमग्निमिध्मेनप्रजापतिंचाघारदेवतेआज्येनात्रप्रधानं॥अ
ग्निंपवमानंअग्निंपवमानंअग्निंपवमानंअग्निंप्रजापतिंचाज्येनअर्यमाग्निंवरु

ना॰प्र॰
१४२

णाग्निंपूषाग्निंप्रजापतिंचलाजद्रव्येणशेषेणस्विष्टकृतमित्याद्युक्त्वासमस्तव्याहृतिभिरग्नौवा
धायप्रजापतयइत्युक्त्वापरिसमुह्यनादिकृत्वापात्रासादनंकृत्वा॥तत्रप्रोक्षणीद्वयंवासःद्वयमाज
नेध्माबर्हिः॥आसादयपात्रमग्निमतोलाजाःशूर्पंचासादयाज्याधिश्रयणांतंकृत्वाःस्रुवाज्यंजलैःस
हपर्यग्निकरणंकृत्वा॥आज्योत्पवनंकृत्वातेलाजानवि॥प्रोक्ष्यस्रुवंसंमृज्यस्रुवंधान्वारभ्यइध्माधानाघा
रपर्यग्निकरणंकृत्वा॥आज्यभागौस्तः॥अथप्रधानहोमः॥अग्नआयूंषीतितिसृणांशतंवैखान
घारहोमोकृपाप्ति॥आज्यभागेनस्तः॥अथप्रधानहोमः॥अग्नआयूंषीतितिसृणांशतंवैखान
सऋषयः॥अग्निःपवमानोदेवता॥गायत्रीछंदः॥विवाहप्रधानाज्यहोमेविनियोगः॥ॐअग्नआ
यूंषि॰३॥त्वमर्यमावसुमन्तोग्निस्त्रिष्टुप्॥विवाहप्रधा॰त्वमर्यमाभवसियत्कनीनांनामस्वधावन्
गुह्यंबिभर्षि॥अंजंतिमित्रंसुधितंनगोभिर्यद्दंपतीसमनसाकृणोषिस्वाहा॥अग्नयइदं॰॥प्रजापते
हिरण्यगर्भःप्रजापतिस्त्रिष्टुप्विवाहप्रधानेविनियो॰॥प्रजापते॰॥यत्कामास्ते॰॥स्वाहाप्रजापतये
इदंनमम॥एवंपंचाज्याहुतीर्हुत्वाप्राङ्मुखोपविष्टायाःपुरःप्रत्यङ्मुखस्तिष्ठन्वरउत्तानंदक्षि
णंपाणिंसांगुष्ठंउत्तानेनवामेनवामकरेणगृह्णामितइतिगृह्णीयात्॥गृह्णामित
इतिसूर्यासावित्रीसूर्यासावित्रीत्रिष्टुप्॥पाणिग्रहणेविनियोगः॥गृह्णामितेसौभगत्वायहस्तं

मयापसमन्नरदृष्टिर्यथासः ॥ भगोऽर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥ इति ॥ ततो वधू
मुत्थाप्य तया करौ श्लेषयित्वांजलिं कारयित्वा भ्राता ... स्तस्या अंजलौ वरः स्रुवेणाज्यमुपस्
तीर्य वधूभ्राता तत्स्थानीयेन वा पितृव्यपुत्रादिना तिष्ठता शूर्पस्थान् लाजान् मुष्टिना द्विरोप्य स्वयं
चैकवारं वा वृत्ती न रात्रिरोप्य स्वयं शूर्पस्यानभिघार्यांजलिस्थान् प्रसकृदभिघार्य ॥ अर्यमणं नु
वीर्यमाग्निरनुष्टुप् ॥ विवाहांगप्रधानलाजाहोमे विनियोगः ॥ ॐ अर्यमणं देवं कन्या अग्निमयक्षत ॥ स
इमां देवो अर्यमा प्रेतो मुंचातु नामुतः स्वाहेति मंत्रं पठित्वा तिष्ठन् तिष्ठन्त्या वध्वः धृतांजलि
जलेनाविच्छेदेनांगुष्ठमूलेनांजलिपार्श्वेण वा हावयेत् ॥ वरोऽर्यमाग्नय इदं न ममेति त्यजेत् ॥ ततो हृ
दुपलं वध्वा अग्निं उदकुंभं पात्राणि च वधूं प्रदक्षिणं परिणयन्नस्य मंत्रेण गच्छन् जपेत् ॥ ॐ अ
मोहमस्मि सा त्वं सा त्वमस्यमोहं द्यौरहं पृथिवी त्वं सामाहमृक् त्वं तावेह विवाहावहै । प्रजां प्रज ना०म०
नयावहै संप्रियौ रोचिष्णू सुमनस्यमानौ जीवेम शरदः शतमिति ॥ ततो वधूमोऽ...ख्या १४२
श्मानमारोहयेत् ॥ इममश्मानं वामदेवो ऋषिरनुष्टुप् । अश्मारोहणे वि० ॥ ॐ इममश्मानमा
रोहाश्मेव त्वं स्थिरा भव । सहस्व पृतनायतोऽभितिष्ठ पृतन्यतः इति मंत्रेणारोहयेत् ॥ पुनः पूर्व

वदंजल्युपस्तरणादि कृत्वा ॥ वरुणं न्वामदेवो वरुणोऽग्निरनुष्टुप् ॥ विवाहप्रधानलाजहोमे वि० ॥ ॐ वरु
णं नु देवं कन्या अग्निमयक्षत ॥ स इमां देवो वरुणः प्रेतो मुंचातु नामुतः स्वाहेति पूर्ववद्धावयित्वा व
रुणायाग्नय इदं न ममेति त्यक्त्वा ॥ पुनरमोहमस्मीति पूर्ववत्परिणीयेममश्मानमारोहयेत्
॥ ततः पुनः पूर्ववदुपस्तरणादि कृत्वा ॥ पूषणं न्वामदेव पूषाग्निरनुष्टुप् विवाहप्रधान
लाजहोमे वि० पूषणं नु देवं कन्या अग्निमयक्षत । स इमां देवः पूषा प्रेतो मुंचातु नामुतः स्वाहे
ति पूर्ववद्धावयित्वा ॥ पूषाग्नय इदं न मम ॥ पूर्ववदमोहमस्मीति अग्निं परिणीयेममश्मानमि
त्यश्मानमारोहयेत् ॥ ततो वधूवरो वा अवशिष्टान् सर्वान् लाजानाग्न्यभिमुखं शूर्प
कोणेन जुहुयात् ॥ तद्यथा वरः प्रजापतये स्वाहा स्वाहा इति हुत्वा प्रजापतय इदं न ममेति
त्यजेत् ॥ अत्र शूर्पकोणेन जुहुयात् ॥ लाजाहोमे परिणयनाश्मारोहणे न स्तः ॥ ततो वरः
प्रत्वा मुंचामीति द्वयोः सूर्या सावित्री सूर्या सावित्री आद्या त्रिष्टुप् द्वितीयानुष्टुप् शिखा
विमोचने विनि० ॐ प्रत्वा मुंचामि व० ॥ ...तस्य यो नौ सुकृतस्य लोके ॥ इति दक्षिणशि
खां विमुंचति । प्रेतो मुंचामि० यथेयमिन्द्र मीढ्व० इत्युत्तरमन्त्रेण खां विमुंचति ॥ शिखाबंधनं

भावेत्विमो कामावः॥ अथाग्नेरुदीच्यां सप्त तंडुलराशीन्वध्वा दक्षिणपादेन वरः क्रमेणाक्रम
येदेभिर्मंत्रैः इष एकपदी भव सा मामनुव्रता भव॥ पुत्रान्विंदावहै बहूंस्ते संतु जरदष्टयः। इत्य
नेन मंत्रेण प्रथमराशिं॥१॥ ऊर्जे द्विपदी भव सा मामनुव्रता भव। पुत्रान्विंदावहै बहूंस्ते॥ सं
तु जरदष्टयः इत्यनेन मंत्रेण द्वितीयराशिं॥२॥ रायस्पोषाय त्रिपदी भव सा मामनुव्रता भव
॥पुत्रान्विंदावहै बहूंस्ते संतु जरदष्टयः इत्यनेन मंत्रेण तृतीयराशिं॥३॥ मायोभवाय च
तुष्पदी भव सा मामनु०। जरदष्टयः संतेतेन चतुर्थराशिं॥४॥ प्रजाभ्यः पंचपदी भव सा मा०। जर
दष्टयः संतेतेन पंचमराशिं॥५॥ ऋतुभ्यः षट्पदी भव सा मामनुव्रता भव॥ पुत्रान्विंदावहै बहूं
स्ते संतु जरदष्टयः संतेतेन षष्ठराशिं॥६॥ सखा सप्तपदी भव सा मामनुव्रता भव॥ पुत्रान्विं
दावहै बहूंस्ते संतु जरदष्टयः संतेतेन सप्तमराशिं॥७॥ सा मामनुव्रता भव पुत्रान्विंदावहै
बहूंस्ते संतु जरदष्टयः॥ एतस्य मंत्रस्य सर्वत्र सप्तपदेष्वनुषंगः॥ ततः सर्वं स्थापितमुद
कुंभं कुविदानाप्य तत्रस्थ एव वरः। उभयोः शिरसी सन्निधाप्य उदकुंभेनावसिंच्यादिति सूत्र
। तत्रस्थ एव वरः स्वशिरसा वधूशिरः संयोज्य कलशस्थमुदकमादायात्मशिरः पश्चाद्भू

र॥ शांतिरस्त्विसादिपं वरश्चमंत्रैरभिषिंचेत्॥ शांतिरस्त्विति मंत्रैरभिषिच्य स्वस्थान उपविश्य प्राच्ये
नस्विष्टकृत् होमं कृत्वा इध्मसंनहनहोमादि बर्हिःप्रहरणपात्रनिनयनांतं समारोप्य विग्रहणं श्री
पुपंजमस्येति सादिमंत्रैः जलाद्दिशिरस्यं न धारयित्वा ध्रुवमरुंधतीमुपस्थाय पूर्ववदुत्तरयां तो
तूष्णीं विसृजस्यादिन विवाहे सायंसंध्यामुपास्य ध्रुवमरुंधतीं सप्तर्षिभूतान्वध्वा सह दृष्ट्वा जी
वपत्नीमजां विंदेयेति वधूं वाचयेत्॥ ततो ध्रुवादिदर्शनं विसृजेत्॥ रात्रिविवाहे संध्यामनुपासे
व॥ ध्रुवादिदर्शनादिप्रयोगकालोपलक्षणमेतत्॥ तेन मेघादिना नक्षत्रादर्शनेपि तस्मिन्काले
वाग्विसर्गः॥ उत्पातादिना दिवा नक्षत्रदर्शनेपि न वाग्विसर्गः॥ एतदादि विवाहाग्निमभिरक्षेत्
।विवाहादारभ्य दंपती गृहप्रवेशनीयहोमांतं त्रिरात्रं द्वादशरात्रं संवत्सरं वा यावदक्षारलव
णान्निरातावलंकुर्वाणावधःशायिनौ ब्रह्मचारिणौ स्यातां॥ ब्राह्मण एषां महद्रूपयाजी वसति
का पाजी व प्रजापा गृहे एतां रात्रीं वसेत्॥ ग्रामांतरे गंतव्ये यद्यत्र वासः स्यात्तदायं विधिः स्वा
ग्रामविवाहे तु नायं विधिः॥ ॥ इति विवाहहोमः॥ ॥ अथ गृहप्रवेशनीयहोमः॥ ॥ अथ पंचगव्य
कृत्वा प्रयाणादिविधिरनंतरमुक्तो बोध्यः॥ समारब्धा दर्श्याच्च विवाहदिनांतरे वा स्वगृहं एवं गतो

कर्त्तुमशक्तिसुरमः कल्पः शिष्टास्तु श्वशुरगृहादेव कुर्वंति॥ अत्र यथादेशाचारं व्यवस्था॥ प्रयोग
पारिजातेप्येवं॥ ॥अथप्रयोगः॥ ॥वरः स्वगृहे शिष्टाचारात्तदानीमेव श्वशुरगृहे वा देश
कालौ संकीर्त्य मम विवाहाग्नेर्गृहप्रवेशसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं गृहप्रवेशनीयहोमं क
रिष्य इत्यादि संकल्प्य स्थंडिलकरणाद्यग्निप्रतिष्ठापनांतं कृत्वा श्वशुरगृहे विवाहहोमानं
तरमेवैतत्करणे तु अग्नेः स्थापितत्वात्संकल्पमात्रं कृत्वा प्रत्यगग्नेः स्वदक्षिणदेशे प्राग्ग्री
वमुपरिलोमकमानडुहं चर्मास्तीर्य तस्मिन्वधूमुपवेश्य तयान्वारब्धो गृहप्रवेशनीयहो
मे देवतापरिग्रहार्थमन्वाधानं करिष्य इति संकल्प्य अस्मिन्नन्वाहितेऽग्नावित्यादि चक्षुषी आ
ज्येनेत्यंतमुक्त्वा सूर्यासावित्रीं चतुर्वारमाज्येन शेषेण स्विष्टकृतमित्याद्युक्त्वाग्नौ समिधावा ना०प्र०
धाय परिसमूहनादि कृत्वा॥ तयान्वारब्ध आधाराद्याज्यभागांतं कृत्वा॥ आ नः प्रजामि १४४
त्यादिकचतुष्टयस्य सूर्यासावित्री ऋषिः सूर्यासावित्री देवता॥ प्रथमा जगती द्वितीया त्रि
ष्टुप्। तृतीयाचतुर्थ्यावनुष्टुभौ। गृहप्रवेशनीयप्रधानाज्यहोमे विनियोगः॥ ॐ आ नः प्रजां
जनयतु०॥ अदुर्मंगलीः पति० शं चतुष्पदे स्वाहा। सूर्यासावित्र्या इदं न मम॥ १॥ ॐ अघोर च

क्षु० वीरसूर्देवकामा स्योना० शं चतुष्पदे स्वाहा। सूर्यासावित्र्या इदं०॥ २॥ ॐ इमां त्वमिंद्र मीढ्व० दशा
स्यां पुत्राना धेहि० कृधि स्वाहा। सूर्यासावित्र्या इदं०॥ ३॥ ॐ सम्राज्ञी श्वशुरे० ननांदरि सम्राज्ञी०
अधि देवृषु स्वाहा। सूर्यासावित्र्या इदं न मम॥ ४॥ अत्र अग्नये स्वाहाकारं पठन्नाज्ये हुत्वा ॐ दु
पात। सर्वत्र सूर्यासावित्र्या इदं न ममेति त्यागः। समंजंत्विति सूक्तस्य सूर्यासावित्री सूर्यासावित्री अनु
ष्टुप्। दधिप्राशने आज्यशेषेण हृदयांजने वा विनियोगः॥ ॐ समंजंतु विश्वे देवाः०। सम्मात
रिश्वा० देष्ट्री दधातु नौ। अनेन सकृत्सकृदनेन मंत्रेण दधि प्राश्य पत्नीमपि प्राशयेत्। हुता
वशिष्टाज्येन वा स्वस्य पत्न्याश्च हृदयांजनं कार्यं। हस्तं प्रक्षाल्य आज्येन स्विष्टकृदादि होमशे
षं समाप्य पतिपुत्रवतीभिः कृतनीराजनौ दंपती द्विजाशीर्भिर्गृहीतौ मुदितौ तिष्ठेतां॥ तत्र
विप्राशीर्वादमंत्राः॥ सात पर्वणि र म्ये वीराज्ञे वयमा रमासवेथे॥ मेनेऽ इव तन्वा ३ शुंभमाने
दंपती वक्रते विदाजनेषु॥ त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन् गुह्यं बिभर्षि॥ अंजं
ति मित्रं सुधितं न गोभिर्यद्दंपती समनसा कृणोषि॥ अस्य प्रजावती गृहे सश्वती दिवे दिवे इ
ला धेनुमती दुहे। या दंपती समनसा सुनुत ऽ आ च धावतः। देवासो नित्ययाशिरा। संगमि

रां गिरसो नक्षमाणा भग इवेदर्यमणं निनाय॥ जनेमित्रो न दंपती॥ अनक्ति बृहस्पते वाजयाशूं रि
वाजो॥१॥ देवीं वाचमजनयंत देवास्तां विश्वरूपाः पशवो वदंति। सा नो मंद्रेषमूर्जं दुहाना धेनु
र्वागस्मानुपसुष्टुतैतु। संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः॥ भियं दधा
नाहृदयेषु शत्रवः पराजितासो अपनिलयंतां॥ सत्येनोत्तभिता भूमि०। सोमेना०। सोमे
ना०। अथो नक्ष०। सोमं मन्यते०। सोमं मन्यते०। सोमं पश्चात्तापतो०। आछद्विधानै०। ग्राव्णा
णा०। अथो न क्ष०। सोमं मन्यते०। सोमं मन्यते०। सोमं पश्चात्तापतो०। आछद्विधानै०। ग्राव्
ना०। यत्वा देव प्रपि०। वायुः सोमस्य रक्षि०। रै रैभ्यासीदनु० सूर्याया भद्र०। चित्तिरा उ
पबर्ह०। द्यौर्भूमिः०। स्तोमा आसन्०। सूर्याया अश्विना०। सोमो वधूयु०। सूर्यां पत्ये शंस०। मनो
अस्या०। ऋक्सामाभ्याम०। शुचीते चक्रे०। अनो मनस्मय०। सूर्या
यास्या०। शुक्रावनडुा०। अकस्मा०। श्रोत्रं ते चक्रे०। शुचीते चक्रे०। अनो मनस्मय०। सूर्या
यावहतु०। अघासु हन्यते०। यदश्विना पृ०। विश्वे देवा अनुतद्वा०। यदयातं शुभस्पती०। द्वे
ते चक्रे०। अथैकं चक्र०। सूर्यायै देवेभ्यो०। ये भूतस्य प्रचे०। पूर्वापरं च०। विश्वा
नव्यो नवो भव०। भागं देवेभ्यो०। सुकिंशुकं श०। आरोह स्तये अमृत०॥ उदीर्षातः प
मनो अस्तु०। नवो नवो भव०। भागं देवेभ्यो०। सुकिंशुकं श०। आरोहस्तये अमृत०॥ उदीर्षातः प
तिं०। अन्यामिछपि०। उदीर्ष्वातो वि०। अन्यामिछ०। अनृक्षरा ऋ०। समर्यमा०। प्रत्वामुंचा०

वा०सं० १४५

मि०। इतस्त्वपोनो०। प्रेतोमुंचा०। येयमि मिंदु०। इ। इमां त्वमितो०। महानु गछ०। इह प्रियंप्र०। एनाप
त्यात०। नीललोहितं०। एधंते अस्या०। परादेहि०। कृत्यैषा पद्वती०। अश्रीरा तनू०। पतिर्यद्वध्वो
११। येवध्वश्चंद्रं०। पुनस्तान्प०। मा विदन्परि०। सुगेभिर्दुर्गमति०। सुमंगलीरियं०। सो भाग्यमस्मै
०६। तृष्टमेतत्क०। सूर्यांयो ब्रह्मा०। आशसनं विश०। सूर्यायाः पश्य०। गृभ्णामि ते०। भगो अ
र्यमा०। तां पूषञ्छिव०। यानरूस्मृ०। तुभ्यमग्रे पर्य०। पुनः पत्नीम्०। पुनः पत्नीमग्नि०। दीर्घायुर
स्याय०। सोमः प्रथमो०। ततीयो अग्निष्टे०। ९। सोमोदद०। रयिं च पुत्रां०। इहैव स्तं मा०। क्रीलंतो
पुत्रै०। आनः प्रजां०। अदुर्मंगली०। अघोरचक्षु०। वीरसूर्देवकामा०। इमां त्वमिंद्र मि०। दशास्यां
स्यां पुत्रा०। सम्राज्ञी श्वशुरे०। ननांदरि०। समंजंतु०। सम्मानतरिम्बा०१०। अविधवा०। तेजस्वी च
जनयद्व ऋपु०। भर्तारं तस्या०। अष्ट पुत्रा भ०। भर्तुर्भव०। इंद्र पुत्र०। ज्ञांकरस्यपथा०। अत्रेर्यथा
०। कौशिकस्य०। धर्मेवेधिपो०। ममापस्या०। २४। विविसोतो०। यत्रामद०। सहस्रमार्ग
वरदातु०। लभंते ह पुत्रान्॥ इत्यादिश्रुतिवदिमं त्रैर्दंपत्योराशीर्वादादर्याः। तेन दंपती द्विजा
वरघात०। लभंते ह पुत्रान्॥ इत्यादि श्रुति वदिमंत्रैर्दंपत्योरा शीर्वादादर्याः। तेन दंपती द्विजा।
श्चिष्मो गृहीत्वा मुदितौ तिष्ठेतां॥ अत्र विराधमाहाचार्यः। अर्द्धरात्रे मतीते तत्र परेद्युः प्रातरेव हि

।गृहप्रवेशनीयाः स्यात्तिथियत्तविहोविदुरिति॥ ततो विवाहात् द्वितीयाहे॥ अप्सरोगंधर्वौ नत्वा म
हादेवीं पूजयेत्॥ ततो पारस्वाहाग्नी भूत्वा कालिकां पूजयेत्॥ चतुर्थाहे मानवो भूत्वा शांकरीं।
पूजयेत्॥३॥ सजातुः आवाहनादिभिः षोडशोपचारैः कर्त्तव्या॥ गृहप्रवेशनानंतरं वेकत्रि
रात्राहिकाले अक्षारालवणाशिता दिव्रतं चरित्वा॥ विवाहकाले वधूपरिहितं वासः प्रक्षाल्य॥ स
त्येनोत्तभिता भूमिरित्यादि सूक्तस्य सूर्यादि देवतापाठितो यथे तथ्युजानते ब्राह्मणाय वरो
दद्यात्॥ ततो व्रतस्य ह्रणार्थं यथाशक्ति ब्राह्मणान् भोजयित्वा॥ ॐ स्वस्ति भवतो ब्रुवंत्विति
तानुक्त्वा॥ ॐ स्वस्तीति वाचयेत्॥ विवाहादारभ्य चतुर्दिनपर्यंतं सभार्येण कन्यादात्रा वधूश्वशुर
णोः सायंपादप्रक्षालनं न कार्यं॥ तत्र मंत्रास्तु अस्मिन्नराष्ट्र इत्याद्यो लिखिताः॥ धृवमसिव ना०म० १४६
कलशे सोमममिंद्रश्चेन्द्रहापूरसमरं वसूनां॥ माध्यंदिने सवने अ॥ वृषस्तरयिस्ठानो रयिमूस्म
सुधेहि॥ कनिक्रदत्कलशे गोभिरज्यसे॥२॥ अयंसमेया वारमर्षसि। ममईमानो॥ अ सोन
मौनासिति द्रप्स सोम जठरे समक्षाः॥ असंप्रजंति कलशो दशाक्षिपः प्रविप्राणां मतयोवा
वहरैते॥ पवमाना॥ अभर्षति सुष्टुतिमेंद्र विंशांतिमदिरासदं रवः। आनेरुचः पवमानस्यसो

मयोभेवयं तिस्रु दुघाः सुधारश्चातः पुरुवारो अप्सु विकदत्कलशे देवयूनां॥ ॥इत्यादि चरणक्षा
लनमंत्राः॥ वरधौतिसा लनंतेयाः॥ ॥ अथ विवाहात् चतुर्थदिने रात्रौ मतत्र भद्रादि सिंभवेदिन एव:
वाशिष्ठाचारप्राप्तं वरमात्रे तत्समास्यै गौरिणपं भक्ष्य डुमोड्स कं शूर्पयुतं महावंशपात्रदान
कार्यं कुमारात्रा॥ सवस्त्रफलंतां नूतनं दध्ना वंशावमूनं॥ गौरिपारव्यवं नूतनवंशपात्रं पक्वान्नैः प
रितं। करके रुद्रसंख्याकैः सुवर्णपरिस्फुरितैः॥ एतावदौरिणीस्वरूपकर्तव्या कलिसहितैः॥ एवंसं
पाद्य कन्यादाता सभार्यो दिशाकालौ संकीर्त्य विवाहस्य संपूर्णफलप्राप्तये वरस्य तत्सितमात्रा
दीनां चतस्रत्रीणां यथाविभवं वस्त्रादिभिः पूजनमहं करिष्ये। इतिसंकल्प वरतात सितमात
आज्ञादिभ्यः क्रमेण यथाविभवं परपरीदुकूलवस्त्रादि दत्वा पुनस्तिथ्यादि संकीर्त्य ममउमाम
हेश्वरप्रीतिद्वारा कन्यादानसंपूर्णतायै वंशामित्रस्पे च गौरिणी पूजनं च वरमात्रे गौरिणीदानं
च करिष्ये॥ गौरिणीत्वमुमादेवी महेशो गिरिजापतिः। अतस्त्वां पूजयिष्यामि गौरिणी सर्वकाम
दां॥१॥ सवस्त्रांवसदीपां च शूर्पैः षोडशभिर्युतां। वरमात्रे प्रयच्छामि कन्यादानस्य सिद्धये॥२॥
तिसंकल्प्य महावंशपात्रे उमामहेश्वरौ षोडशोपचारैः॥ उमामहेश्वराभ्यांनमः इतिमंत्रेणपूज

पित्वा वंशपात्रं वरमात्रे दत्वा मंत्रानपठेत् ॥ तेचमंत्रा वंशोवंशकरः श्रेष्ठो वंशो वंशसमुद्भवः । अ
नेन वंशप्रदानेन तुष्टोस्तु हि करोतु मे ॥१॥ वंशपात्रमिदं पुण्यं वंशजं तत्समुद्भवं । वंशदानामुत्र
मं दानमतः शांतिं प्रयच्छ मे ॥२॥ वंशपात्राणि सर्वाणि मयासंपादितानि वै । आकांक्षितायदत्ता
नि मम गोत्राभिवृद्धये ॥३॥ वंशवृद्धिकरं दानं मोक्षपापादि समन्वितं ॥४॥ सर्वपापक्षयकरं ना
नाद्वैस्तु स्थितं ॥ दानानामुत्तमं दानमतः शांतिं प्रयच्छ मे ॥५॥ ततः कन्यावरावपि हमाहे
त्संगयोः पृथक् पृथगुपवेश्य पृथक् तोयमर्पयेत् ॥ अष्टवर्षा भवेत्कन्या पुत्रवत्पालिता मम
या इदानीं तव पुत्राय दत्ता स्नेहेन पाल्यतामिति । अत्र सप्तवर्षा विदुर्वापि च वर्षा नववर्षा दशवा
यदि स्यादि कन्यावयः समीक्ष्य कर्तव्यः कार्यः ॥ ततो वरमात्राव धूमान्नादि तत्स्पृश्यमुवासिनीभ्यः ना० भं०
अ... सर्वौ ब्राह्मणेभ्यश्च ॥ अथ पश्चात्पुरोधसोग्निं सकंचुकवस्त्रद्वयं ताम्रपूर्वायनदाना विध १४३
कारणाय मित्राद्याचारात् आम्रयथाचारं यथाशक्ति देयं ॥ इदं मैरिणी पूजादि व धूपितस्मां अनु
कवस्त्रां कृत्वा भोजनं कार्यं ॥ ॥ इति श्रीनारायणभट्टकृते प्रयोगरत्ने ऐरिणी पूजादिवतुथ
दिनकृत्यं समाप्तं ॥ ॥ अथ देवकोत्थापनमंडपोद्वासनविधिः ॥ ॥ तत्रकालः ॥ ॥ समेवदि व

सेकुर्यात् देवकोत्थापनं बुधः ॥ षष्ठं च विषमं त्वेष्टं मुक्त्वा पंचमसप्तमौ ॥ समेषु षष्ठं विषमेषु पंचमस
प्तमातिरिक्तं दिनं नाम्नेष्टमी सर्वः ॥ उक्तकाले मंडपात् ॥ सपत्नीकः स्वासन उपविश्य प्राण्यम्य देशका
लौ संकीर्त्य नांदीं कृत्वा विवाहांगत्वेन स्थापित देवतानामुत्थापनं मंडपोद्वासनं पुण्याहवाचनं
करिष्य इति संकल्प्य सर्वा देवताः गंधादिभिः संपूज्य यित्वा ॥ उत्तिष्ठ ब्रह्मणस्पते देवयंतस्त्वे महे ॥
उपप्रयंतु मरुतः सुदानव इंद्र प्राशूर्भवा सचा ॥ अस्मारमिमिदं दूयोनि विकं पुष्करेमधुः ॥ अ
वतस्य विसर्जनं ॥ इति मंत्राभ्यां विसृज्य भगवत्सादीनां मंडपांतस्तेलाभ्यंगोद्वर्तनोद्धार्दकंस्ना
नादिकारयित्वा वेष्टनसूत्राणि मुंच्य अस्वस्ति वाचनं कुर्यात् ॥ ततो भगवत्सादीनि घटपात्रांतरे
निधाय तेषां द्विजैः समुद्रज्येष्ठा इति चतसृभिः ॥ आपोहिष्ठेति तिसृभिर्मंत्रैरभिषेकः । कौकाय
मंत्रास्तु पूर्वमेव तत्र तत्र बहुषु प्रकरणेषु लिखिताः ॥ अभिषेकांते पुरोधास्तत्स्थाखादिवंश
पात्रे निधाय तदुपरिप्रास्तितस्याभिषेकजलं सकुटवस्य यजमानस्य शिरसि किंचित् स्रावयन्
प्रतिचेति चेलेन देतं सर्वं स्वस्त्ययनं यतो नेति चेति चेतित द्योस्य प्रियः स्यात् मतेनानुमंत्र
येत प्रेति चेति स्वस्तिसेवम इति स्वस्ति पुनरागच्छति ॥ ब्राह्मणपठेत् ॥ एवं सकुटुं बस्य

जमानस्मशिरसि किंचिदुत्सवणंत्रितारंकार्यं॥ ततः कन्याशिरसिवरकृतांजलिः अस्माज्जोत्रेप
दसुपदस्तुमासेष्विशोऽनंमस्त्विति द्विजान्प्रार्थयेत्। ते च तथास्त्विति ब्रूयुः। ततो द्विजाश्च
दत्तंनांबूलदक्षिणादिना पूजयित्वा तदाशिषो मंत्रोक्ताः कार्या यादि सामदिदृशाकुलाचारा
नुसारेण कार्यं॥ आशी वादमंत्रास्तु दृढप्रश्रेष्ट्वा निद्रविणानि०। अन्यैश्चि द्विजोक्ता ईदृशाः। निय
ताःस्वशाखानुसारेण पठित्वा आशीर्वादा देयाः॥ ॥इतिप्रयोगरत्ने देवकोत्थापनादिवि
धिः॥ ॥अथ मेव देवकोत्थापनादिविधिरूपनयनेज्ञेयः॥ ॥अथ वधूप्रथमगृहप्रवे
शः॥ ॥वधूप्रवेशः प्रथमे तृतीये तु प्रशस्तः पंचमके च वा द्वितीयके चाथ चतुर्थके वाथ
नेष्टविदः॥ ॥ब्रूयाद्वयुः स्वभवनपुरप्रवेशे दिक्शूलं नोविप्रवदंतथोद्वाहे। न च
दुष्टवियोगाभयदुःखदःस्यात्॥ लल्लः॥ स्वभवनपुरप्रवेशे दिक्शूलं नो विप्रवदंतथोद्वाहे। न च
वधूगृहगमनेमौश्मभृगुजीवयोर्नास्ति॥ ज्योतिः प्रकाशे॥ वामेशुक्रे नवोढायाः सुखहा
निर्मरक्षिणे धनधान्यं च पृष्ठस्थे सर्वनाशः पुरःस्थिते। नवोढायास्तु वैधव्यं दुःक्रेसंमु
खेभृगौ॥ तदेवं विबुधैर्ज्ञेयं केवलं नववधूगमे॥ पूर्वतो भृगुदिने शुक्रे प्रयायाद्दक्षिणाप
रे। पश्चात्पुरस्थिते चैव यायात्पूर्वोत्तरे दिशौ। तथा भाद्रपदमासमारभ्य सर्वदिग्मुखे मंदिशु

प्रतिदिशंमासत्रयं कपाटं स्यं॥ चैत्रमारभ्य सर्वादिग्मुख्यदिक्षु प्रतिदिशंमासत्रयं कपाटदे
य। चैत्रमारभ्य सर्वाद्यष्टदिक्षु मुख्यादिशां मासद्वयं विदिक्ष्वेकं मासं क्रमेण कपाटं जानी
यात्॥ दृष्ट्वा यंत्रमातरेनवधूगमनं वर्ज्यं। नियतकालोपि कदाचित्पवधमाह गर्गः॥ अता
पाते च संक्रांतौ ग्रहणे वै धृतावपि। आद्य दिनात्सुभन्नेव प्राप्तकालेपि मानवः॥ तथा॥ अमा
संक्रांति विष्ट्यादौ प्राप्तकालेपि मानवः॥ तथा॥ अमासंक्रांति विष्ट्यादौ प्राप्तकालेपि नाचरे
दिति॥ नु इहप्रियंप्रजयाते०स्तापत्सानं०इतिमंत्रेण वधूगृहे प्रवेशये स वधूको वरोगणाय
ति। तदुक्तं चूप्रयाचारसंग्रहे पुत्रपाहरेबा च पित्रावि प्रायश्चित्तं गृहे चोयात्॥ विवाहात्वथमे पौषे
आषाढे वाधिमासके॥ भर्तुर्गृहे वसेन्नस्त्री चैत्रेतातगृहे तथा॥ ॥इतिप्रयोगरत्ने वधूगृहप्र
वेशनविधिः॥ ॥अथ विवाहे आशौचादिनिर्णयः॥ विधिवृत्तेनैकं मावरणेत्रिरात्रादि व्रत
समाप्तिपर्यंतमथ आशौचं प्राप्नोति तयोर्न सद्यः शौचं चंद्रिकाकार आह॥ तत्र याज्ञवल्क्यो
॥ दाने विवाहे यज्ञे च संग्रामे देशविप्लवे॥ आपद्यपि च कष्टायां सद्यः शौचं विधीयत इति॥
दातुर्वरस्य कन्यायाश्च सद्यः शौचं विवाह इत्यर्थः॥ बृहस्पतिः॥ विवाहोत्सवयज्ञेषु त्वंतरा

मृतसूतके। सर्वसंकल्पितार्थेषु न दोषः परिकीर्तितः। षट्त्रिंशन्मते॥ विवाहोत्सवयज्ञेषु त्व
न्तरा मृतसूतके॥ परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः। विष्णुः॥ व्रतयज्ञविवाहेषु श्राद्धे
होमे जपेऽर्चने। आरब्धे सूतकं न स्यादनारब्धे तु सूतकं॥ आरंभस्तेनैवोक्तः। आरंभो वर
णं यज्ञे संकल्पो व्रतसत्रयोः। नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रियेति। नांदीमुख
वधिस्त्वावश्यकत्वेनाधिक उक्तः॥ एकविंशत्यहर्यज्ञे विवाहे दश वासराः। त्रिषट्चौलो
पनयने नांदीश्राद्धं विधीयत इति। तेन एकविंशत्याद्यहरतः प्रातिपथा यज्ञादि भवेत्तत
था आवश्यके यज्ञादौ दोषः स्वं श्राद्धं कुर्यादित्यर्थः। आरंभाभावेपि कन्याया अधार्यत्वे सन्नि
हितलग्नांतराभावे च होमादि सर्वकं विष्णुरनुज्ञामाह॥ अनारब्धविशुध्यर्थं कूष्मांडैर्जु
हुयाद्घृतं। गां दद्यात् संवत्सरगवांशांततः शुध्यति सूतकीति। उपकल्पितवटुसंभारस्या
प्तिसन्निहितलग्नांतराभावेन संभारधारणाशक्तौ अशक्तौ च विवाहमाह विष्णुः। न देवप्रति
ष्ठाविवाहयोः सर्वसंभृतयोरिति। अथ विवाहकाले कन्या ऋतुमती चेत्तत्रात्ययज्ञपार्श्व
ः विवाहविततेतंत्रे होमकाल उपस्थिते। कन्यामृतुमतीं चैव कथं कुर्वंति याज्ञिकाः। स्नाप

ना०प्र०
१४८

पित्वा यथाविधिः।१। युंजानमग्ना इति द्वाभ्यां ततः कर्मणि योजयेत्॥ आहुतिमंत्रस्तु तैत्तिरीयशाखा
यां। युंजानः प्रथमं मनस्तत्त्वाय सविता धियः॥ अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याभरदिति। य
द्वा। विवाहहोमे प्रक्रांते यदि कन्या रजस्वला। त्रिरात्रं दंपती स्यातां पृथक्शय्यासनाशनौ॥
चतुर्थेऽहनि संस्नातौ तस्मिन्नग्नौ यथाविधि। जुहुयातामिति शेषः॥ ॥ इति विवाहे आ
शौचादिनिर्णयः॥ ॥ अथ प्रसंगात्पुनर्विवाह उच्यते॥ ॥ कृते विवाहे पंचांगशुद्धिराहित्या
दिदोषश्चेत्॥ ज्ञातस्तदा ज्योतिःशास्त्रोक्तकाले विशेषे पुनर्विवाहः कार्यः। तदुक्तं नृसिंहश्री
धरीये। पुनर्विवाहं वक्ष्यामि दंपत्योः शुभवृद्धिदं। लग्नेंदुजन्मयोर्दोषे ग्रहतारादिसंभवे। अ
शुभकालेषु दुष्टयोगादिसंभवे।१। विवाहे चैव दंपत्योराशौचस्य च संभवे॥ तस्य दोषस्य
शांत्यर्थं पुनर्वैवाह्यमिष्यते।२। अयने चोत्तरे प्राप्ते हृद्यपे तु विशेषतः। आषाढमार्गशीर्ष
माघवैशाखाः शुभावहाः।३। विवाहोक्तर्क्षतिथ्यंशवारादिषु विवर्जिताः। क्रूरग्रहायोगस्
थानिग्रहगोचरयोगकाः।४। तस्मिन्विवाहसमये सुमुहूर्ते तथैव हि। सर्वाहू ष्टवरात्रे वावि
वाहः शुभदो भवेदिति विस्तरभयान्न लिखितं।५॥ ॥ अथ द्वितीयविवाहविधिः॥ ॥ द्वितीय

परिणयने हेतुनाह याज्ञवल्क्यः सुरापी व्याधिता धूर्ता वन्ध्यार्थघ्न्यप्रियंवदा। स्त्रीप्रसूश्चाधिवेत्त
व्या पुरुषद्वेषिणी तथेति। व्याधिता अचिकित्स्यरोगग्रस्ता॥ पुरुषद्वेषिणी भोगसमये प्रतिकू
लतया पुरुषस्य भर्तारि द्वेष्टीति पुरुषद्वेषिणी॥ अधिवेदनं भार्यान्तरपरिग्रहः। उक्ते हेत्वधिवे
त्तव्या सा भार्या या मदेनास्य याऽभवेत्॥ स्वमदेन अस्या भर्तुरननुकूलेत्यर्थः॥ उक्ते हेत्वभावे अधि
वेत्तारमाह॥ स एव॥ आज्ञासंपादिनी दक्षा वीरसूं प्रियवादिनीं॥ त्यजन् दाप्यस्तृतीयांश
मद्रव्यो भरणं स्त्रियः॥ त्यजन् अधिविंदन्निति विज्ञानेश्वरः॥ द्विविधं ह्यधिवेदनं॥ धर्मार्थं कामा
र्थं च। तत्र पुत्रोत्पत्त्याधर्मार्थं प्रागुक्तानि मद्यपत्वादीनि निमित्तानि निरूपेक्षितानि॥ कामार्थं तु
न तान्यपेक्षितानि। किंतु सवर्णा हस्तो षणीया॥ एकामुक्त्वा कामार्थमन्यां लब्धुं य इच्छति। स ना०प्र०
मर्थस्तोषयित्वार्थैः पूर्वोढामपरां वहेदिति स्मृतेः। यद्यसौ स्वयं न तोषयेत्तदा तत्तोषणा २५०
य पूर्वोढायै अधिवेत्तुर्धनस्य। तृतीयांशमंशं दातव्यमधिवेत्त्रा दाप्य इति फलितोऽर्थः॥ यदि द्वि
तीयपरिणयनं कृतं तदाग्निद्वयसंसर्गविधिः कार्यः॥ यदि पूर्वं गृह्याग्नावेव विवाहहो
मः कृतस्तदा तेनैवाग्निना द्वितीयपत्नी गृह्यकर्मसु सहाधिकारिणी॥ यदि दैवात्तदग्ना

ग्नौ द्वितीयादिविवाहहोमः कृतः। तदा द्वितीयविवाहनिमित्तकत्रिरात्रादिव्रतान्तेऽग्निद्वयसंसर्गः
कार्यः॥ तत्र विधिमाह शौनकः॥ अथाग्न्योर्गृह्ययोर्योगं सपत्नीभेदजातयोः। सहाधिकारसि
द्ध्यर्थमहं वक्ष्यामि शौनकः॥ अरोगामुद्वहेत्कन्यां धर्मलोपभयात्स्वयं॥ कृते तत्र विवाहे च व्रता
न्तेऽपरेऽहनि॥१॥ पृथक् स्थंडिलयोरग्नी समाधाय यथाविधि॥ तत्र कृत्वाऽऽज्यभागान्तमन्वाधाना
दिकं ततः॥२॥ जुहुयात्स्वयं पत्न्याग्नौ तयान्वारब्ध आहुतीः॥ अग्निमीळे पुरोहितमिति सूक्तेन नव
चैव तु॥३॥ सामिध्य धनं समारोप्य अयं ते योनिरित्यृचा। प्रत्यवरोहेत्यनया कनिष्ठाग्नौ नि
धाय तं॥४॥ आज्यभागान्तं तत्रादि कृत्वान्वारब्धदारितु॥ समन्वारब्ध एतां भार्यां पत्नीभ्यां जुहु
या हुतं॥५॥ चतुर्गृहीतमेतानि मंत्रैर्भिः पाटुयथाक्रमं॥ अग्नावग्निश्चरति सग्निनाग्निः समि
ध्यते॥६॥ अस्तोदामिति चतसृभिः पाहि नो अग्न एकया। ततः स्विष्टकृदारभ्य होमशेषं समाप
येत्॥७॥ गोयुग्मं दक्षिणां दद्याच्छ्रोत्रियायाहिताग्नये। पत्न्योरेकापरिणयता हर्ग्धातेनैव तां पुनः
॥८॥ आदध्यात्तामथासां समाधानं विधिनाग्रहीति॥९॥ ॥ अथ तत्र प्रयोगः॥ ॥ द्वितीयादि
विवाहव्रतान्ते शुभदिने प्राणानायम्य देशकालौ स्मृत्वा निष्कृत्यामम विवाहद्वयेन जातयोर्गृ

योर्गृह्याग्न्योः संसर्गमहं करिष्य इति संकल्प्य एकसंस्थयोर्द्वयोः स्थंडिलयोरुपलेपादि सर्वं कृत्वा क्रमे
णाग्न्योः प्रतिष्ठाप्य प्रथममग्न्यावन्वादध्यात्॥ तत्र क्रमः॥ अस्मिन्नग्निद्वयसंसर्गकर्मणि
अन्वाधानं करिष्ये। तत्र देवतापरिग्रहार्थमस्मिन्नन्वाहिते अग्नौ जातवेदसमिध्मोपभागान्ते त
मुक्त्वा अग्निप्रधानदेवतां नवभिराज्याहुतिभिर्यक्ष्ये शेषेण स्विष्टकृतमित्यादि संगोपांगेन
कर्मणा मद्योयक्ष्ये इत्यंतमुक्त्वा परिसमूहनाद्याज्यभागान्तं तंत्रं कृत्वा आघारापत्ते सम्यग्
कर्मणा मध्ये यक्ष्ये इत्यंतमुक्त्वा परिसमूहनाद्याज्यभागांतं तंत्रं कृत्वा आज्यभागांते समन्वा
रब्धोनवाज्याहुतीर्जुहुयात्॥ अग्निमीळे इति नवानां मधुच्छंदा अग्निर्गायत्री॥ अग्निद्वयसंस
र्ग्योनवाज्याहुतीर्जुहुयात्॥ अग्निमीळे इति नवानां मधुच्छंदा अग्निर्गायत्री॥ अग्निद्वयसंस
र्गप्रधानहोमे विनियोगः॥ ॐ अग्निमीळे० रत्नधातमं स्वाहा॥ अग्नय इदं न मम॥ अग्नय इदंन म
मेति सर्वत्र त्यागः॥ एवं स्वाहांताभिर्नवाहुतिभिर्हुत्वा प्रत्याहुति अग्नय इदं न ममेत्युक्त्वा
स्विष्टकृदादिहोमशेषमुपस्थानांतं समाप्य अग्ने त्वं न इति चतसृभिर्वोपस्थानं कुर्यात्॥ मंत्रास्तु
स्थालीपाकप्रकरणे लिखिताः॥ ततः स्तमग्निं अयं ते योनिरित्विमंत्रेण समिधि चारोपयेत्॥ अ
यं ते योनिरित्यस्य विश्वामित्रो गाथिपुत्रो विश्वामित्रो ग्निस्त्रिष्टुप्॥ अग्निसमारोपणे विनियोगः॥ ॐ
अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः॥ तं जानन्नग्न आसीदाथा नो वर्धया गिरः॥ इति

ना०भा०
१५१

मंत्रेण समारोपकनिष्ठाग्नौ प्रसवरो हेति मंत्रेण समारोपितमग्निं प्रसवरोहयेत्॥ तद्यथा॥ प्रस
वरोहेति मंत्रस्य हिरण्यगर्भ ऋषिः॥ अग्निर्देवता त्रिष्टुप् छंदः॥ अग्निप्रसवरोहणे वि०॥ ॐ प्रसवरोह
जातवेदः पुनस्त्वं देवेभ्यो हव्यवाहनः प्रजां नेन्नं प्रजां पुष्टिं रयिमस्मासु धेह्यथा भवयजमानाय
गावो॥ इति मंत्रेण समारोपिताग्निसमिधां कनिष्ठाग्नौ क्षिपेत्॥ ततः तस्मिन् कनिष्ठिकाग्नौ अ
न्वाधानं कुर्यात्॥ तत्र देवतापरिग्रहार्थमन्वाधानं करिष्ये॥ अस्मिन्नन्वाहिते अग्नौ इत्यादि आज्य
भागांतमुक्त्वा॥ अत्र प्रधानं॥ षड्द्वारा अग्निं चतुर्गृहीताज्येन शेषेण स्विष्टतमित्यादि घ्राय
क्ष्ये इत्यंतमुक्त्वा परिसमूहनमाज्यं गृहीत्वा पत्नी अन्वारब्धस्तेनाज्येन षडाहुतीर्जुहुया
त्॥ मंत्रैः॥ ते च मंत्राः॥ ॐ अयावग्निश्च इति प्रविष्ट ऋषीणां पुत्रो अधिराज एष तस्मै जुहोमि ह
विषा घृतेन मा देवानां मामुहद्भागधेयं। यो अस्माकं मामुहद्भागधेयं स्वाहा॥ अग्नय इदं न म
मेति स्वाहांतेभ्यो घृतस्पृशः कभागं जुहुयात्॥ अयाग्निना ग्निरांगिरसो विरूपोग्निर्गायत्री॥ अ
ग्निद्वयसंसर्गनिमित्तप्रधानाज्याहुतिहोमे विनियोगः॥ ॐ अग्निनाग्निः समिध्यते कविर्गृह
पतिर्युवा। हव्यवाड्जुह्वास्यः स्वाहा॥ अग्नय इदं न ममेति द्वितीयभागं॥ त्वमग्ने प्रमतिरिति

सूर्णां विश्वामित्रोऽग्निरनुष्टुप्॥ अंत्ये द्वे अनुष्टुभौ॥ अग्निद्वयसंसर्गप्रधानाज्याहुतिहोमे विनि०।
ॐ अस्तीदमधिमंथनमस्ति प्रजननं कृतं॥ एतां विश्पत्नीमा भराग्निं मंथाम पूर्वथा स्वाहा। अ
ग्नय इदं न मम इति तृतीयभागं।३। अरण्योर्निहितो जातवेदा गर्भ इव सुधितो गर्भिणीषु। दिवे
श्वाङ्गिर्मनुष्येभिरग्निः स्वाहा॥ अग्नय इदं न मम इति स्रुविच्छिन्न घृतस्य चतुर्थभागं॥ ॐ उत्ताना
यामवभरा चिकित्वान्सद्यः प्रवीता वृषणं जजान। अरुषस्तूपो रुशदस्य पाज इलयास्पुत्रो वयुने
ऽजनिष्ट स्वाहा। अग्नय इदं न मम इति पंचमभागं।५। पाहि नो अग्न एकयेति प्रगाथो भर्गोऽग्निर्बृह
ती॥ अग्निद्वयसंसर्गप्रधानाज्याहुतिहोमे विनि०। ॐ पाहि नो अग्न एकया पाह्यु३ त द्विती
यया। पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो स्वाहा॥ अग्नय इदं न मम इति षष्ठभागं
।६। एवं स्रुचैव घृतस्य षड्भागान् कृत्वा अवयवशः षड्भिर्मंत्रैः षडाहुतीर्जुहुयात्॥ इति श्लोको ना०म० १५२
मतं। गृह्यपरिशिष्टे तु स्रुवेणैव अष्टौ आहुतीर्जुहुयादिति॥ तत्र मंत्राः॥ अग्निनाग्निः समिध्यत
इत्येक॥१। त्वं ह्यग्ने अग्निनेत्यस्य आंगिरसो विरूप अग्निर्गायत्री॥ अग्निद्वयसंसर्गप्रधानाज्या
हुतिहोमे वि०। ॐ त्वं ह्यग्ने ऽग्निना विप्रो विप्रेण सन्सता। सखा सख्या समिध्यसे स्वाहा।

अग्नय इदं०।२। अस्तीदमधिमंथनमिति तृचः। ॐ अस्तीदमधिमंथन०। स्वाहा॥ अग्नय इदं०
।३। ॐ अरण्योर्निहितो०। स्वाहा। अग्नय इदं०।४। उत्तानायामवभर०। स्वाहा। अग्नय इदं०।५। पा
हि नो अग्न इति चतुर्ऋचस्य प्रगाथो भार्गोऽग्निर्बृहती॥ अंत्ये सतो बृहत्यौ। अग्निद्वयसंसर्गप्रधा
नाज्याहुतिहोमे वि०। पाहि नो अग्न एकया०। स्वाहा। अग्नय इदं०।६। एताः पूर्वमनुपदमेव लि
खिताः। ॐ पाहि विश्वस्माद्रक्षसो ऽराव्णः प्रस्म वाजेषु नोऽव। त्वामिद्धि नेदिष्ठं देवतातय
ऽआपिं नक्षामहे वृधे स्वाहा॥ अग्नय इदं०।७। ॐ आ नो अग्ने वयोवृधं रयिं पावक शंस्यं। रास्वा च
न उपमाते पुरुस्पृहं सुनीती स्वयशस्तरं स्वाहा॥ अग्नय इदं न मम इति। आयतनेऽग्निं निधाय य
थापूर्वं परिस्तरेत्। ॥ इति नारायणभट्टकृते प्रयोगरत्ने अग्निद्वयसंसर्गविधिः॥ ॥ अ
थ तृतीयविवाहः। स च मानुष्यां निषिद्धः। तदुक्तं कश्यपेन॥ तृतीयां मानुषीं नैव तुर्यायाः स
मुद्वहेत्। पुत्रपौत्रादिसंपन्नः कदाचित् साग्निकोऽप्यलं।१। उद्वहेदतिथिसिद्ध्यर्थं ततो यान्
करावन। माहात्म्यान्नतो वाप्यिय दिग्धं तु मानुषी।२। अर्कस्य लेवनं संदेहोऽग्नस्य वचनं यथा
अन्यत्रापि। तृतीयां यदि चोद्वाहेत हिंसा विधवा भवेत्।३। संग्रहे। चतुर्थादिविवाहार्थं तृती

येर्कं समुद्वहेत॥ आदित्य दिवसे वापि हस्तर्क्षे वा शनैश्चरे॥४॥ शुभे दिने वा सर्वार्कं कुर्यात् द्वि
र्कं विवाहकं। तस्माद् तृतीया मानुषी विवाहसिध्यर्थं अर्कं कन्यया ततो य विवाहं कुर्यात्। त
द्विधिश्च ब्रह्मपुराणादिषु दृष्टः॥ ग्रामात् प्राच्याम् उदीच्यां वा सपुष्पफलसंयुतं। परिष्क
यन्ततो धस्तात्तस्थंडिलादि यथाविधि॥ आस॥ स्नात्वा कृतवासास्तु रक्तैर्गंधादिभिर्वि
तं। सपुष्पफलशाखे स्तुयुक्तमर्कं समाश्रयेत्। ६। तल्लक्षणेन संयुक्तं मर्कं संस्थाप्य यत्न
तः॥ अर्कं कन्याप्रदानार्थं माचार्यं कल्पयेत् पुरा॥७॥ अर्क संनिधिमागत्य तत्र स्वस्त्यादि वाच
येत्। नांदीश्राद्धं हिरण्येन अष्टवर्गान् प्रकल्पयेत्। ८। पूजयेन्मधुपर्केण वारं विप्रस्य हस्तत
ः॥ यज्ञोपवीतं वस्त्रं च हस्तकर्णादि भूषणं॥ उष्णीषं गंधमाल्यादि वराय प्रदापयेत्। स्व ना०म०
ग्यसोक्त प्रकारेण मधुपर्कं समाचरेत् ब्रह्मपुराणे॥ ग्रामात्प्राच्याम् उदीच्यां वा सपुष्पफल १५२
संयुतं॥ परिष्क्रमपन्नतो धस्तात्तस्थंडिलादि यथाविधि। यथाविधि कर्मकृत्वा तदनंतरं।
कृत्वार्कं पुरतस्तिष्ठेत् आर्चयेत् निर्धानमः। यज्ञोपवीतं वस्त्रं च समर्पयेत्। त्रिलोकवासि
स्तन् सप्ताश्व छायया सहितो रवे। ततीयोद्वाहजं दोषं निवारय सुखं कुरु। तत्राधारो

गेण देवेशं छायया सवितं रविं। वस्त्रेणाभेस्तथा गंधैस्तन्मंत्रेणैव षड्जपेत्॥ तन्मंत्रेण अर्क
द्वैनेस्तावि दिना। अन्यत्रापि सूत्रवस्त्रेण संवेष्टयेत् काम्यसंततम्भिः। गंधपुष्पैः समभ्यर्च्य अ
गौरक्षिपिं च येत्। गुडौदनं तु नैवेद्यं ताम्बूलं च समर्पयेत्। आस॥ अर्कं प्रदक्षिणी कुर्वन् ज
पेन्मंत्रमिमं बुधः। मम प्रीतिकरो येयं मया सृष्टा पुरातनी॥ अर्कजा ब्रह्मणा सृष्टा। अ
स्माकं प्रतिरक्षतु। पुनः प्रदक्षिणी कुर्यात् मंत्रेणानेन मंत्रवित्। नमस्ते मंगले देवि पवित्रात्
हृणतां॥ अर्गल ब्रह्मणा सृष्टः सर्वप्राणिहिताय वै॥ वृक्षाणामादिभूतस्त्वं देवानां प्रीति
वर्द्धनः। तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय। ततश्च कन्यावरणं पुरुषत्रयमुच्चरेत्॥
आदित्य सविता चार्कः पुत्री पौत्री वनस्थिका॥ गोत्रकाश्यप इत्युक्तं लोके लोकिकमाचारे
त्। मुहूर्तं कंनराद्येत स्वस्तिसूक्तमुदीरयेत्॥ स्वस्तिसूक्तं॥ स्वस्तिनो मिमीतामश्विना भग इत्या
दिकं॥ आशीर्भिः सहितैः कुर्यादाचार्यप्रमुखैर्द्विजैः। अथाचार्यं समाहूय विधिना तत्र वान्त
प्रतिगृह्य ततो होमं गृह्योक्तविधिना चरेत्। आचार्यस्य प्रदानमंत्रमाह। आसः॥ अर्ककस
मिमां विप्रय याज्ञाक्तिविभूषितां॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रयेति॥ अंजलस्थ

तकर्माणि कृत्वा कंकणं सूत्रकं । यावत्संख्यावृतं सूत्रं तावदर्कं प्रवेष्टयेत् । स्वगृह्योक्तेन मंत्रे
ण गायत्र्या वाथ वा जपेत् । पंचीकृत्य पुनः सूत्रं कुर्वंत्यातिमंत्रतः ॥ बृहत्सामेति मंत्रेण सू
त्ररक्षां प्रकल्पयेत् । अर्कस्य पुरतः पश्चाद्दक्षिणोत्तरयोस्तथा । कुंभांश्च विक्षिपेत्स्थादौ
गुयादिचतुष्टये ॥ सवस्त्रं प्रतिकुंभं च त्रिसूत्रेणैव वेष्टयेत् । हरिद्रागंधसंयुक्तं स्नापयेच्छीत
जलैः । प्रतिकुंभं महाविष्णुं ब्रह्मापरमेश्वरं । पाद्याद्यैरभिवेद्यांतं कुर्यात्तस्मिन्नेव मंत्र
वित् । अत्र होमप्रकारः शौनकेन दर्शितः ॥ तृतीयेकं विवाहे तु संप्राप्ते पुरुषस्य तु । अर्कवीवा
हं वक्ष्यामि शौनकोहं विधानतः ॥ अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत् । नांदीश्राद्धं
प्रकुर्वीत स्थंडिलं च प्रकल्पयेत् ॥ अर्कं प्रसन्नं सौम्यं गंधपुष्पाक्षतादिभिः । सोपस्थय्य
देवाचयेत् । नांदीश्राद्धं प्रकुर्वीत स्थंडिलं च प्रकल्प्य देवस्य । आकृष्णेनादि ऋचा । स्वयं चालंकृत
स्तद्वस्त्रमाल्यादिभिः शुभैः ॥ अर्कस्योत्तरदेशे तु समन्वारब्ध आगतैः यथास्तहितं देव
हाम कर्मावाघ आहुः समेनेति मंत्रेण प्रोक्तापद्मारैः संपूज्य ततः प्रीतवस्त्रेण कार्पासतंतुना त्रिवेष्ट्य
संवेष्ट्य पुनः गंधपुष्पधूपदीपगुडोदननैवेद्याद्यैः पंचोपचारैः संपूज्य तां मूलं च समर्प्य अर्कं प्रि ना०भ० १५४

प्रदक्षिणात्रयं कुर्यादिमं मंत्रैः । मंत्रास्तु । मम प्रीतिकरायेयं मयासृष्टा पुरातनी । अर्कजा ब्रह्मणा सृष्टा
अस्माकं परिरक्षतु ॥ १ ॥ इति प्रथमप्रदक्षिणामंत्रः ॥ नमस्ते मंगले देवि विपवित्रा त्वदृहागता अ
कं त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय वै । इति द्वितीयप्रदक्षिणामंत्रः । वृक्षराज्ञा तया अर्ककुल्य
या । कुलैरवनादिकं कुर्याद्दीर्घायुस्तमरंतः परं । यस्ताभिरप्रसमस्ताभिस्तत्र स्वस्तिसिष्ट भवेत् ॥
परिधेनुनपर्यंतमपायाश्चेसादिकं क्रमात् ॥ प्रार्थनामंत्रादि विशेषमाह व्यासः । पुनः प्रदक्षि
णं कृत्वा मंत्रमेतमुदीरयेत् ॥ मया कृतमिदं कर्म स्थावरेषु जरायुण ॥ अर्कायिस्वा निनो द
हि तत्सर्वं क्षंतुमर्हसि । इत्युक्त्वा शांतिसूक्तानि जप्त्वा तं विसृजेत्पुनः ॥ गोयुग्मं दक्षिणां दद्या
दाचार्याय च भक्तितः ॥ इतरेभ्योपि विप्रेभ्यो दक्षिणां चापि शक्तितः । तत्र वैगुण्य वेदाद्दत्ते पु
ण्याहमाचरेत् ॥ अत्र पंचमदिने कर्तव्यमुक्तं ॥ ब्रह्मपुराणे ॥ चतुर्थे दिवसे तावत् पूर्ववत्प्रा
प्रपूज्य विसृजेत् होमममृग्निं च विधिना मानुषीपरं ॥ कुर्यादेवं यथा तेन पुत्रपौत्रादि वृद्धिमान् । न
पश्यन्मनमित्राणि मंगलं नैव गच्छति । एवमेतद्धि विप्रेष्ट विधिना सम्यगुद्वहेत् ॥ धनधामस

मद्विघ्नहृच्छा शक्तिः परत्र चेति ॥ ॥ अथैवं संक्षेपतः प्रयोगः ॥ ॥ उक्ते आदित्यवारादौ उक्तदेशो
पयोक्ताऽर्कसमीपे गत्वा आचम्य देशकालौ संकीर्त्य मम तृतीयमानुषीदोषाभावार्थमर्कविवा
हमहं करिष्ये इति संकल्प्य ॥ आचार्यवरणं स्वस्तिवाचनाद्युक्तक्रमेण कुर्यात् ॥ अत्र विवाह
होमे विशेषः । देशकालौ संकीर्त्य अर्कविवाहांगभूतं होमं करिष्ये ॥ तदंगमन्वाधानं करिष्ये । अ
स्मिन्नन्वाहितेऽग्नौ जातवेदसमग्निमध्ये न प्रजापतिं । प्रजापतिं चाघारदेवते आज्येन अत्र प्रधा
नं । बृहस्पतिं । अग्निं वायुं सूर्यं प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्याद्यन्वाधाय आघा
रांतं कृत्वा । संगोभिरिति तुस्यांगिरा बृहस्पतिस्त्रिष्टुप् ॥ अर्कविवाहांगभूताज्याहुति होमे वि नि
योगः ॥ ओं संगोभिरांगिरसो नक्षमाणो भग इ वेदर्यमणं निनाय । जने मित्रो न दंपती अनक्ति ना०मं०
बृहस्पते वाजयाशूरिवाजौ । स्वाहा बृहस्पतय इदं न ममेति त्यागः ॥ यस्मै त्वमिति सस्य वामदेवोऽग्नि १५५
स्त्रिष्टुप् । विनियोगः सर्वत्र पूर्ववत् ॥ ओं यस्मै त्वं कामकामाय वयं सम्राड्यजामहे । तमस्म

भ्यं कामं दत्त्वाथेदं त्वं घृतं पिब स्वाहा । अग्नय इदं न मम ॥ ततो व्यस्तसमस्तव्याहृतिभिर्हुत्वा
होमशेषं समापयेत् ॥ ततः प्रदक्षिणा प्रार्थनादि कर्मशेषं समापयेत् ॥ ॥ इति नारायणभ
ट्टविरचिते प्रयोगरत्ने अर्कविवाहः ॥ ॥ अथ ब्रह्मपुराणे ॥ ॥ मासस्मृति कश्यपस्मृतिसं
ग्रहशौनककारिकाद्युक्तो अर्कविवाहप्रयोगो विरच्यते ॥ आदित्यवारे शनैश्चरवारे ह
स्ते श्रवणे वा गताघातादिदोषरहिते ज्योतिर्विदुक्ते शुभे दिने पूर्वाह्णे ग्रामात्प्रागुदीच्यां वा
गत्वा तत्र पुष्पफलसंयुक्तं स्वासहितं तं सम्यगर्कं परीक्ष्य अर्कविवाहं कुर्यात् । स्नात्वा परिहिताह
तधौतवासाः कृतनित्यक्रियः रक्तगंधादिभूषितः । स्वलंकृतः पूर्वपरीक्षितार्कसमीपे प्रा
गासने उपविश्य आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम तृतीयमानुषीविवाहजदोषाभा
वार्थं अर्कविवाहमहं करिष्ये इति संकल्प्य । तदंगभूतगणेशपूजनस्वस्तिवाचनमातृका
पूजननांदीश्राद्धादीनि करिष्ये इति संकल्प्य तानि कृत्वा आचार्यं वृणुयात् ॥ वरणमंत्र
स्तु ॥ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः । तथार्कस्य विवाहे त्वमाचार्यो भव सुव्रत

साचार्यं कृत्वा आचार्यो पि कृतो हं अर्कविवाहकर्म करिष्यामीत्युक्त्वा ॥ ततः स आचार्यः वरम्
खोक्तेन मधुपर्केण तं वरमर्चयेत् ॥ आश्वलायन शाखाया मधुपर्क एवमेव लिखितः ॥ मधु
पर्क समये आचार्यः यज्ञोपवीतद्वयं वस्त्रद्वयं उष्णीष हस्तकर्णभूषणानि गंधमाल्यादीनि
तत्तन्मंत्रोच्चारपूर्वकं दद्यात् ॥ अत्र यज्ञोपवीतादीनि वरस्यैव वरस्य दद्यात् ॥ नाचार्येणास्व
गृहादानीयदातव्यानि ॥ ततो वरान्वारब्ध आचार्यः अर्कपूजनं कुर्यात् ॥ तद्यथा ॥ अर्कस्य
पुरतस्तिष्ठन्नाचार्यो वरश्च त्रिलोकवासिन्निसनेन मंत्रेण तमर्कं आवाहयेत् । मंत्रस्तु ॥ त्रि
लोकवासिन्सप्ताश्व छायया सहितो रवे । तृतीयोद्वाहजं दोषं निवारय सुखं कुरु । इति प्रार्थ्य
अर्कं पूजयेत् ॥ तद्यथा ॥ तस्मिन्नर्कवृक्षे छायासहितं देवं वेशमर्कमावाह्य आकृष्णे ना०म० २५६
नेति मंत्रेण षोडशोपचारैः संपूज्य ततः श्वेतवस्त्रेण कार्पासतंतुभिश्च संवेष्ट्य पुनः गंधपु
ष्पधूपदीपगुडौदननैवेद्यांतैः पंचोपचारैः संपूज्य ताम्बूलं च समर्प्य अर्कस्य प्रदक्षिणात्र
यं कुर्यादिभिर्मंत्रैः ॥ मंत्रास्तु ॥ मम प्रीतिकरायेयं मया सृष्टा पुरातनी ॥ अर्कजा ब्रह्मणा सृष्टा

अस्माकं परिरक्षतु ॥ १ ॥ इति प्रथमप्रदक्षिणामंत्रः ॥ ॥ नमस्ते मंगले देवि पवित्रा त्वं हर
गना ॥ अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय वै । इति द्वितीयप्रदक्षिणामंत्रः ॥ वृक्षाणामा
दिभूतस्त्वं देवानां प्रीतिवर्द्धनः ॥ तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय । इति तृतीयप्रद
क्षिणामंत्रः ॥ ततो अर्कस्य वरस्य मध्ये पटं धृत्वा ज्योतिर्विदुक्ते सुमुहूर्ते उत्तरपटं उत्त
रतः निष्कास्य वरो अर्कं निरीक्षेत । ततो वर आचार्यः ॥ अग्ने ब्राह्मण ॥ स्वस्ति स्तं कंप देयु
॥ स्वस्तिनो मिमीतामिति पंचर्चस्यात्रेयो विश्वेदेवास्त्रिष्टुभो स्ये अनुष्टुभो जपे विनि० । स्व
स्तिनो मिमातामश्विना भग० ५ ॥ ततो ब्राह्मणाः । वरस्य चतुर्थीमानुषी विवाहे ते स्वस्ति
क्षं दिवृद्धि आभवलिसादि आशीर्वादान् दद्युः ॥ ततः आचार्यः वराय अर्ककन्यादानं
कुर्यात् । तद्यथा ॥ अमुकशर्मणः वरस्य तृतीया मानुषी विवाहजदोषाभावद्वारा ल
क्ष्मीनारायणप्रीतये अर्ककन्यादानमहं करिष्य इति संकल्प्य । लक्ष्मीनारायणप्रीतये
अमुकप्रवरोपेताय अमुकगोत्रोत्पन्नाय अमुकप्रपौत्राय अमुकपुत्राय अमुकशर्म

गोश्रीधररूपिणेवराय। काश्यपावत्सारनैध्रुवत्र्यवरोपेतांकाश्यपगोत्रोत्पन्नांअर्कप्रपौत्रींसवि
तृपौत्रींआदित्यपुत्रींअर्कनाम्नींकन्यांश्रीरूपिणींप्रजापतिदैवत्यांतृतीयमानुषीविवाहजन्यदो
षाभावार्थंतुभ्यमहंसंप्रददेनमम॥ अर्ककन्यांप्रतिगृह्णातुभवान् अर्कशाखोपरिवरस्य
जानौसकुशाक्षतजलंक्षिपेत्। वरःस्वस्तीत्युक्त्वा॥ अर्ककन्याया उपरिदक्षिणहस्तंधा
शाखामभिमृश्य। कइदंकस्मा अदादितिमंत्रंपठित्वा तृतीयमानुषीविवाहजन्यदोषाभावार्थं
अर्ककन्यांप्रतिगृह्णामीतिवदेत्। एवमेकवारंत्रिवारंवा अर्ककन्यादानंकार्यं॥ ततः आचार्य
ः अर्ककन्यामिमांविप्रयथाशक्तिविभूषितां॥ गोत्रायशर्मणेतुभ्यंदत्तांविप्रसमाश्रयेतिपठे
त्। वरस्यवत्सकाश्यपगोत्रंतदा अर्ककन्यायाः। विष्णुवर्द्धनगोत्रंज्ञेयं। ततः आचार्यः समुद्रज्ये ना०म०
ष्ठाइत्यादिभिर्मंत्रैः अर्कवरौअभिषिंचेत्॥ ततोदुग्धार्कनवगुणाभ्युक्तसूत्रेण अर्कवरौकं १५३
ठदेशेकटिदेशेचद्वयोःपूर्वदिशामारभ्यपंचवारंप्रदक्षिणंवेष्टयेदेभिर्मंत्रैः। मंत्रास्तूपरि
खागिर्वणोगिरइत्यादयः। गायत्र्यावावेष्टयेत्॥ ततःकंठदेशस्थकटिदेशस्थंवस्त्रंद्वयंउप

प्रकरणेलिखिताः॥ ॥अथ अर्ककन्याविवाहहोमः॥ ॥तत्रादौदेशकालौसंकीर्त्य अर्कविवा
हांगभूतंहोमंकरिष्ये॥ तदंगभूतंस्थंडिलादिकरिष्ये। स्थंडिलोपलेपनउल्लेखनअग्निप्रतिष्ठादि
कृत्वा। तत्रदेवतापरिग्रहार्थमन्वाधानंकरिष्ये॥ इतिसंकल्प्य॥ अस्मिन्नन्वाहितेऽग्नौजात
वेदसमग्निमिध्मेनप्रजापतिंप्रजापतिंचाघारदेवते आज्येन अत्रप्रधानं॥ बृहस्पतिं अ
ग्निंवायुंसूर्यंप्रजापतिंचाज्येनशेषेणस्विष्टकृतमित्यन्वाधायाद्याघारांतंकृत्वा। सं
गोभिरितिमस्यांगिरा बृहस्पतिस्त्रिष्टुप्॥ अर्कविवाहांगभूताज्याहुतिहोमेवि०। ॐसंगोभिरां
गिरसोनक्षमाणो०। वाजोस्वाहा। बृहस्पतयइदंनमम॥ यस्मैत्वामिसस्यवामदेवोग्नि
स्त्रिष्टुप्॥ अर्ककन्याविवाहांगभूताज्याहुतिहोमे० ॐयस्मैत्वंकामकामाय० स्वाहा। अग्नय
इदं०। अस्तस्तमस्तक आहुतीनांप्रजापति० अर्ककविवाहांगभूताज्या० एवं अर्कविवाह
प्रधानाज्याहुतीर्हुत्वास्विष्टकृदादिहोमशेषंसमापयेत्॥ ततः अर्ककन्यासहितस्याग्ने

॥मंत्रैर्मदक्षिणात्रयंकुर्यात्॥तेचमंत्राःममप्रीतिकरायेयं०॥प्रथमप्रदक्षिणामंत्रः॥नमस्ते
मंगले देवि०॥द्वितीयप्रदक्षिणामंत्रः॥वृक्षाणामादिभूतस्त्वं०॥तृतीयप्रदक्षिणामंत्रः॥त
तोमंत्रैः अर्ककन्याप्रार्थनंकुर्यात्॥मयाकृतमिदंकर्म०॥इतिसंप्रार्थ्यशांतिसूक्तानि अ
नोभद्राइत्यादीनिपठेत्॥ततस्तमग्निं अस्मारमिद्भ्यो०॥अनेनमंत्रेण अग्निंविसर्जये
त्॥नानेनाग्निनामानुषीभार्याग्निभिःसंयोजनंकार्यं॥ततोगोयुग्मम् आचार्याय दत्वा
अंतेपुण्याहमाचरेत्॥ततोग्रामंप्रवेशयेत्॥ ॥इत्यर्कविवाहः॥ ॥एवंतृतीयार्कवि
वाहंकृत्वामानुषींचतुर्थींपरिणयेत्॥द्वितीयादिपरिणयनंतुनिमित्तंविनानकार्यं॥
॥निमित्तान्याहयाज्ञवल्क्यः॥सुरापीव्याधिताधूर्तावंध्यार्थघ्न्यप्रियंवदा॥स्त्रीप्रसूश्चा
धिवेत्तव्यापुरुषद्वेषिणीतथा॥अधिवेत्तव्यासाभर्त्रायामदेनास्यापभवेत्॥अधिवे
त्तव्यातदुपरिस्त्र्यन्तरंकर्तव्यमित्यर्थः॥आपस्तंबः॥धर्मप्रजासंपन्नोनान्यांकुर्वीत॥अधि

ना०सं०
१५८

र्यनिष्क्रान्त्यउभयमपिपंचाहृ सवरो बृहत्सामेतिमंत्रेण अर्ककन्यायाउपरिशिरस्वायांस्वस्यापि
कंठेबध्नीयात्॥ततोवरः आचार्यदत्तानक्षतान्अंजलौगृहीत्वा॥प्रजोमेकामःसमृध्यता
मित्युक्त्वा॥अर्ककन्योपरिताक्षतान्क्षिपेत्॥एवंषड्वारंवरएवकुर्यात्रिभिर्मंत्रैः॥यशोमे
कामःसमृध्यतामितिद्वितीयोमंत्रः॥श्रियोमेकामःसमृध्यतामितितृतीयः॥३॥धर्मोमे
कामःसमृध्यतां॥४॥प्रजामेकामःसमृध्यतां॥५॥यशोमेकामःसमृध्यतां॥६॥इतिषण्म
न्त्रैःषड्वारंआचार्यदत्तानक्षतान्वरोअंजलौगृहीत्वाअर्ककन्योपरिक्षिपेत्॥नत्वार्ककन्या
चरमस्तकोपरि॥वरस्यैवकामापेक्षानत्वर्ककन्यायाः॥ततोवरःअर्ककन्यायैअष्टपु
त्रास्तत्कवस्त्रंकंचुककृष्णमणिसूत्रयुतंसमर्प्यवस्त्रंपरिधाप्यकृष्णमणिसूत्र
कंठेबध्नीयात्॥मांगल्यतंतुनानेनभर्तृजीवनहेतुना॥कंठेबध्नामिसुभगेसाजीवशरदः
शतमिति अनेनमंत्रेणबध्नीयात्॥ततःअक्षतपुंजोपरिगणानांत्वेतिमंत्रेणषोडशोप
चारैःगणेशपूजनंकृत्वाविघ्नंवर्जयेत्॥तद्यथा॥अर्ककन्याःसमंततःसर्वाघृष्टसुदि

स्व आष्टौ कलशान् स्थापयित्वा तान् त्रिगुणितसूत्रेण वेष्टयित्वा हरिद्रागंधादिभिर्भूषयित्वा
तांस्तैलेन जलेन पूरयित्वा प्रत्येकं पूगीफलानि प्रक्षिप्य वस्त्रैः कलशमुखानि आच्छादयेत्
कोणेषु अष्टौ तंडुलपुंजान् कृत्वा तेषु पुंजेषु पदार्थान् संस्थापयेन्न वा ॥ विष्णुं वेदमूर्तिनाम
मंत्रेण आवाहनादिषोडशोपचारैः विष्णुं संपूज्य विवाहहोमं कुर्यात् ॥ अर्कविवाहे मंत्राः न
लिखिता स्तेलिखंते । ॐ आकृष्णेन रजसा० हिरण्मयेन० ॥ स्वस्ति नो मीमीता० स्वस्ति पथ्या
प्रसुरो० स्वस्तयेवायुमुप० बृहस्पतिं सर्वगणं० विश्वेदेवानो अद्या० देवा अवंत्व भव० ॥
स्वस्ति मित्रावरुणा० । स्वस्तिन इंद्राग्निश्च० स्वस्ति पंथामनुचरेम० पुनर्ददता घ्नता०
क इदं कस्मा अदात्कामः कामायादात्कामो दाता कामः प्रतिग्रहीता कामैतत्ते । समुद्र ना०प्र०
माविश । कामेन त्वा प्रतिगृह्णामि कामैतत्ते वृष्टिरसि द्यौस्त्वा ददातु पृथिवी प्रतिगृह्णातु । ओं १५८
कं कन्यां प्रतिगृह्णामि । बृहत्साम क्षत्रभृद्वृद्धवृष्णियं त्रिष्टुभौजः शुभितमुग्रवीरं । इंद्रस्तोमेन
पंचदशेन मध्यमिदं वातेन सगरेण रक्ष । समुद्रज्येष्ठा इत्यादि अभिषेकमंत्राः । विवाह

यदि ज्येष्ठया पि तु न धर्मयेति । सवर्णानि कृत्वेतु ज्येष्ठया विना इतरः द्वितीयादयः । न धर्मकार्ये किं तु तया
सहैव कनीयस्यो पि नियोक्तव्या अहस्पर्थः । ज्येष्ठाया असान्निध्ये कनीयसा धर्मकार्ये न नियोज्या इति स्पर्थः
तथा च बौधायनः । एकैकां गार्हपत्यमभीक्ष्णयेत् ॥ इति कात्यायनो पि ॥ नैकयापि विना कार्यमाधा
नं भार्ययाऽधानं भार्ययाद्विजैः ॥ अकृतं तद्विजानीयात् सर्वानान्वारभंतिवेदिति । सर्वाः सवर्णा स्त्रि
यश्चेत् न अन्वारभंति तदा तदाधानं अकृतमेवेति विजानीयात् । यत्तु विष्णुवचनं ॥ अग्निहोत्रादि
यज्ञेषु द्वितीयान सहाचरेत् । अन्यथा पतनं तस्या सिष्टैः क्रतुशतैरपि न तत् सवर्णाविषयं । द्वितीया
पादिपरिणयनात्पूर्वमेव आधाने कृते सत्यग्निष्वनंतरं द्वितीयादिपरिणीता तद्विषयं वेति
माधवः । ज्येष्ठपानविनेतरैनियदुक्तं तत्राधाने सहाधिकृता नैका भार्याविषयं ॥ अनधिकृतायाः
प्रसक्ताभावात् ॥ अग्निशिष्टादिषु भार्यां बह्वीभार्याः सवर्णाया । कारयेत् बहुत्वे चेज्ज्येष्ठा च गर्हिता
न चेत् । सहिता धर्मयोग्यत्वापादकपातित्यादि दोषवती न चेत् तु इत्यर्थः । तादृशी न चेत् तत राक्षानेवं
विधपाकनिष्पत्तिं कारयेत् बहुभार्यस्ति यिके वल कलत्र धर्मादयो वेदयात्र यजमानो द्वारीसमान
रिक्तयेवसवर्णायाज्येष्ठयाकारयेत् । पत्नीसंनहनादिसुकर्मसंस्कारसंके सहाधिकृताभिः

सर्वाभिरिस्याद्भिर्मासं लग्नमनसोसुत्तानं। स्मार्त्ताग्निसाध्येतु कर्मणि सर्वासांसहाधिकारः॥ अथ
मविवाहाग्नावेवापेहविधानात्तदसंभवेऽग्निद्वयसंसर्गविधानात्॥ अतस्तत्राप्युक्तएवकर्मसु
कर्तृविवेकः॥ द्वितीयादिविवाहहोमाग्निनियममाहकात्यायनः॥ सदारोन्यान्पुनर्दारानुद्वोढुंको
रणांतरात्। यदीच्छेदग्निमान्कर्तुं क्वहोमोस्यविधीयते॥ स्वाग्नावेवभवेद्धोमोलौकिकेनकदा
चनेति। अयंचनियमः॥ सतिसंभवे॥ आधानांतराद्यसंभवेतुलौकिकाग्नौकृत्वास्वाग्निसमागत
अग्निद्वयसंसर्गविधिंकुर्यात्॥ अत्रद्वितीयादिविवाहेजीवत्पितृकःस्वयमेवनांदीश्राद्धंकुर्यात्
।नांदीश्राद्धंपिताकुर्यादाद्येपाणिग्रहेपुनः॥ अतऊर्ध्वंप्रकुर्वीतस्वयमेवतुनांदीकमित्यादिनांदी
श्राद्धप्रकरणेलिखितं॥ अग्निद्वयसंसर्गविधिस्तुअनुपदमेवपूर्वंलिखितः॥ मृतभार्यस्यद्वितीया ना०भ०
दिविवाहेकालविशेषउक्तःसंग्रहे॥ प्रमदामृतिवासरादितःपुनरुद्वाहविधिर्वरस्यच। विषमेपरि
वत्सरेशुभोयुगलेचाशुभमृतिप्रदोभवेदिति। जीवत्सांतुसर्वपत्नींद्वितीयादिविवाहेनायंकालनिय १६०
मः॥॥ अथौपासनारंभसमयनिर्णयः॥॥ तत्रगृह्यं॥ पाणिग्रहणादिगृह्यंपरिचरेदिति। शौन
कः॥ यदिरात्रौविवाहाग्निरुत्पन्नःस्यात्तथासति। उपक्रमोत्तरस्त्वाक्तःसायंपरिचरेदमुमिति॥

२

यदिरात्रौनकृता अनंतरमग्न्युत्पत्तिस्तदोत्तरदिनेसायंहोमारंभः॥ तत्रपूर्वमग्न्युत्पत्तौतुतस्यांरात्राव
वारंभइतिसुदर्शनभाष्यकारः॥ सर्वविवाहहोमोत्तरकालीनेसायंकालेकर्तव्यइतिस्थितं। कृष्णंतस्मि
न्समयेभद्राव्यतीपातादिसंभवेसतिगृहप्रवेशनीयहोमेकृतेअकृतेचासतिप्रारंभणीयएव। न
तुतन्मुहूर्तप्रतीक्षा। गृहप्रवेशनीयहोमस्यकृताकृतप्रतीक्षावा। विवाहहोमानंतरंसायंका
लेयःप्रथमोहोमःसःपत्नीसन्निधौस्वयमेवकार्यः॥ तदुत्तरंतुस्वस्यासंनिधानेपत्न्याद्यः॥ तत्र
क्षः॥ संध्याकर्मावसानेतुस्वयंहोमोविधीयते। स्वस्यासन्निधानेअशक्तौवाभगवानाह। पत्नी
कुमारीपुत्रोवाशिष्योवापिययाक्रमं॥ पूर्वपूर्वस्यचाभावेविदध्यादुत्तरोत्तरः॥ दक्षः॥ ऋत्विक्पु
त्रोगुरुर्भ्राताभागिनेयोथविट्पतिः॥ एतैरेवहुतंयत्तुतद्धुतंस्वयमेवतु॥ विद्यतिर्जामाताकासाय
नः॥ असमक्षंतुदंपत्योर्होतव्यंनर्त्विगादिना॥ द्वयोरप्यसमक्षंतुभवेद्धुतमनर्थकं॥ उभयोःसं
न्निधानंमुख्यं॥ एकतरसंनिधानंतुकल्पः॥ उभयोरसमक्षंतुहुतमहुतमेव। पर्वणितुसायं
होमःस्वयमेवकार्योग्निमता। प्रथमौपासनारंभस्यकालद्वयंपाणिग्रहणादिःएकःकालः॥
दायविभागसमयस्तुद्वितीयःकालः॥ पाणिग्रहणादौप्रथमारंभःकृतस्तत्तदनंतरंप्रमादा

न्विच्छेदः स्यात्तदविच्छेदे दिवसमारभ्य प्रायश्चित्तं कृत्वा पुनः संधानं कार्यं। यदा दायविभागका
लेउपासनारंभस्तदा पाणिग्रहणादिविच्छेदप्रायश्चित्तं नास्ति आरंभाभावात् दायविभागकालेउ
पासनारंभः कर्त्तव्यः॥ इति वृत्तिकारेणोक्तं गृह्याग्नौ सत्त्वगृहस्थो भार्यायां अलाभायां च वृत्तिं यथास
ग्नहो गृहमाण तदृति अत्र हि सर्वगृहस्थो भार्याविचुनः॥ उत्तरत्र तु शालावचनः॥ येषां भार्यासंयोगादु
स्न्नेऽग्नौ दृष्टानि कर्माणि प्रवर्तन्ते तेषामपि गृहस्थत्वे भार्याविचुनः॥ येषां दायविभागकालेऽग्निरुत्पन्ने
॥ तेषां शालावचनः॥ भार्यादिरग्निर्दायादिर्वा तस्मिन् गृह्याणि निगोतमः॥ इति वृत्तिकारलिखनात्
॥ उपासनहोमस्तु विवाहोत्तरं दायविभागोत्तरं वाऽऽरभणीयस्तस्योपासनकालः॥॥ अथाग्निप्रादु
ष्करणकालः॥॥॥ प्रादुष्करणमग्नेः प्रज्वलनं। कात्यायनः॥ सूर्ये तु शैलमप्राप्ते षट्त्रिंशद्भिरिहांगुलैः
॥ प्रादुष्करणमग्नीनां प्रातर्भानामदर्शने॥ एतत्प्रादुष्करणकालात्सपेय षट्त्रिंशद्भिरिहांगुलैः॥
समस्तमाहुतिभिरेकाऽऽसाहुतिः कार्या॥ अथ होमकालः॥ आश्वलायनः॥ सम्यङ्निम्लोचति
रवौ सायं च जुहुयात्तदा॥ अथ प्रातर्हुतेऽग्नौ समुदिते कार्यं यथाविधि। कात्यायनोऽपि। यावत्सम्यङ्
नभागं ते नभसः शाणिस वर्तः॥ लोहिततं च नापेति तावत्सायं च हूयते। मनुः रवेरस्मात्रस्तुदु

नाम० १६१

२

रूपेतरश्मिभिस्तु समन्वितः॥ उदितं तद्विजानीयात्तत्र होमं प्रकल्पयेत्। अनुकल्पमाह। सूत्रकारः॥
प्रदोषान्तो होमकालः सायं संगवान्तः प्रातरिति तमतिनीयवत्तुर्गहात्तमसं जुहुयात्। अस्तोत्तर
त्रिमुहूर्त्तमुदयोत्तरत्रिमुहूर्त्तं च क्रमेण सायंप्रातर्होमकालः॥ इति फलितोऽर्थः। अथ मुख्यकालातिक्र
मे समस्तमाहुतिभिरेकाऽऽहुतिः कार्या॥ प्रायश्चित्ते विशेषेण यत्र नोक्तो भवेद्विधिः। होतव्याऽऽहु
तिस्तत्र भूर्भुवः स्वरिति त्रिचेति कारिकोक्तेः॥ गौणकालातिक्रमे तु मनोज्योतिरिति मंत्रेण चतुर्गृही
ताज्येनाऽऽहुतिरेकेति प्रायश्चित्तविवेकः। मनोज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञं समिमं दधातु। यादृ
ष्टा उषसो निम्रुचः स्रुताः संदधामि हविषा घृतेन। स्वाहा ज्योतिषे इदं न मम॥॥ अथ होमद्रव्याणि
॥ गृह्यपरिशिष्टे॥ पयो दधि सर्पिर्यवागूरोदनं तण्डुलाः सोमललमापो व्रीहयो यवास्तिला इति होम्यानि॥
तत्र तंडुलाः॥ नीवारश्यामाकयावनालानां कंडणं कृत्वा तंडुलाः कार्याः। नेतंडुला होमयोग्याः॥ नी
वारः श्यामाकयावनालाः कंडनं विना स्वरूपेणैव होमयोग्याः॥ तिलाः स्वरूपेणैव व्रीहिशालियवगो
धूमप्रियंगवः स्वरूपेणापि होम्याः॥ व्रीहिशालियवगोधूमप्रियंगूणां स्वरूपेणापि तंडुलत्वेनापि
एवं तु उभयथापि होम्यत्वं भवति। तस्मात्तु होमो निषिद्धः॥ इति तंडुलाः॥ षष्टिवर्जा आहुतिव्रीहितुलानां

पवगोधूमादीनानंतरं दूर्वा तदूर्ध्वं तिलानां तदूर्ध्वं सर्पिस्तैलयोः॥ तैलं च तिलजं तिलाः तसीकुसुंभानां इति
होमस्थानि। येन हविषा प्रथमां देवतां जुहुयात्तेनैव द्वितीयां जुहुयाद्येन तु सायं जुहुयात्तेनैव प्रात
रिति प्रतिनिधिवर्जं हविरिति स्वाहुतिपरिमाणमाह॥ प्रस्थधान्यं चतुः॥ षष्ट्याहुतेः परिकीर्तितं॥ ति
लानां च तदर्धं तु तंडुलाश्च हविःसमाः॥ प्रस्थपरिमाणं॥ प्रसृतिद्वितयं मानं प्रस्थमानं चतुष्टयमिति
।बोधायनस्तु॥ व्रीहीणां वा यवानां वा ग्रासमाहुतिरिष्यते। अगस्त्यः॥ द्रवद्रव्यस्य मानं स्याद्धारागो
कर्णदीपिका॥ सिद्धांतशेखरे॥ द्रव्यभेदेनाहुतिप्रमाणभेद उक्तः॥ कर्षप्रमाणमाज्यं स्यान्मधुक्षी
रं च तत्समं। तंडुलानां शुक्तिमात्रं पायसं प्रसृतेः समं। कर्षमात्राणि भक्ष्याणि लाजा मुष्टिमिताम
नः॥ मूलानां तु त्रिभागः स्यात्कंदानामष्टमो काष्ठाः॥ स्रुवः पर्वप्रमाणं स्यादंगुलीद्वितयं लता। अ ना०सं०
देहमात्राः समिधो व्रीहीणां मंजरीसमाः॥ तिलसर्षपकणादीनां मृगीमुद्राप्रमाणतः॥ पत्रपु १६२
ष्पफलानां तु समाहुतिरिष्यते। चंदनश्रीखंडकस्तूरीकुंकुमागरुकर्दमाः॥ हरिमंथसमाः
प्रोक्ता गुग्गुलुर्बदरीसमाः॥ आहुतीनामिदं मानं कथितं वेदविद्भिः॥ हरिमंथः स्वल्पकणः॥ मृग
मुद्रालक्षणमुक्तं तत्रैव। स्यात्रिमुद्रा मृगीमुद्रा होमे सर्वफलप्रदेति। होमप्रकार उक्तः॥ संग्रहे॥

द्रवं हविः स्रुवेणैव पाणिना कठिनं हविः॥ अंगुष्ठमध्यमाग्रेण होतव्यं न कुर्यादंगुलीभेदनं। अंगुष्ठस्तूत्तरपार्श्वे
न होतव्यमिति स्मृतिः॥ नित्यहोमे स्रुवमुपरि समिधमारधीतव्यं॥ लक्षणं च स्मृत्यर्थसारे। पलाशख
दिराश्वत्थोदुम्बरजास्समिधः॥ अपामार्गार्कदूर्वाश्च कुशाश्चेत्यपरे विदुः॥ सत्वचः समिधः का
र्याः ऋजुश्लक्ष्णाः समास्तथा॥ हस्ताद्दशांगुलमात्रास्तु द्वादशांगुलिकास्तथा। आर्द्राः पक्वाः समच्छेदा
स्तर्जन्यंगुलवर्तुलाः॥ अपाटिताश्चाद्विशाखाः कृमिदोषविवर्जिताः॥ ईदृशीं होमयेत्प्राज्ञः प्राप्नोति वि
पुलां श्रियं॥ अयं च होमायतने स्थंडिले वाग्निं प्रतिष्ठाप्य तत्र कार्यः कुंडे वापि स्थंडिले वापि लौकिके॥ ॥ आ
यतनं चोक्तं संग्रहे॥ ॥ अरत्निमात्रमग्न्यर्थं कार्यमायतनं बुधैः। मेखलात्रययुक्तं च मेखलाद्वयमेव
वा॥ अथवा मेखला चैका अथवा पंचमेखलाः॥ मेखलात्रयपक्षे तु उत्तरोत्तराद्व्यंगुलः॥ आद्या षड
गुलोक्ता द्वितीया च तथोन्नता॥ आद्या द्व्यंगुलविस्तारा द्वितीया चतुरंगुला। मेखलाद्वयपक्षे तु एत
न्मानमुदाहृतं॥ इत्यायतननिर्माणप्रकारः॥ स्थंडिललक्षणं तत्रोक्तमेव स्थालीपाकप्रकरणे। अथौ
पासनप्रयोगः॥ एवमुक्तप्रकारेण मुहूर्ते देशे आयतनमुपयुक्तं स्थंडिलं वा निर्माय गोमयेनोपलिप्यो
ल्लिखेत्तत्र यथा। तां मनसि कृत्वा पात्रादिसंभारान्निक्षिप्य तत्र गृह्याग्निं पूर्ववत्प्रतिष्ठाप्य विवाहो

नरेंद्राय विभागोत्तरं वा संध्याकालादारभ्योपासनं कुर्यात्। तत्रैवं। यजमानः। कृतसंध्यावंदनः सपत्नीक
कृ तस्याग्नेः पश्चिमत उपविश्य आचम्य प्राणानायम्य देशकालौ निर्दिश्य अग्निरूपपरमेश्वरप्रीत्यर्थं
ग्न्युपासनं करिष्ये इति संकल्प्य। चत्वारिशृंगेति मंत्रेण यज्ञपुरुषस्य मूर्तिं ध्यात्वा। चत्वारिशृं
गेति मंत्रस्य गोतमपुत्रो वामदेव ऋषिः। अग्निर्देवता त्रिष्टुप् छंदः। अग्निमूर्तिध्याने विनि०। चत्वा
रि०। अनेन ध्यात्वा ततः सोदकेन पाणिना समंतादग्नेर्दक्षिणां पुनः पुनरुदकमादाय त्रिः परि
मृज्य सर्ववत्परिस्तीर्य त्रिः पर्युक्ष्य। प्रागुक्तकाले दक्षिणाद्येषु धेमप्रक्षालितमद्भिः सिक्तं तदुत्तरभ
तिपात्रमग्नेरुत्तरतो निधाय ज्वलता दर्भोल्मुकेनावज्वाल्याभ्युक्ष्य तेनैव त्रिः पर्यग्नि कृत्वोल्मु
कं निरस्य अप उपस्पृश्य अग्नेः पश्चिमतः आस्तीर्णेषु कुशेषु समिधा सह हविर्निधाय। निध्याना
नहतिति स्पृशा आत्रेयो वसुश्रुत ऋषिः। अग्निर्देवता त्रिष्टुप् छंदः। ताभ्यामर्चने अस्य यानमस्कार
णा विनियोगः। नहि स्पशमविदन्० सिंधुं न नावा०। अग्ने अत्रिवत०। ३। अस्माकं बोधि० ४ यस्त्वा हृदा० ५।
ण्यमसीति मर्त्यः० ६। जातवेदो यशो०। प्रजाभिरग्ने० ८। एवं ऋग्भ्यामर्च्य प्रतिपादं सर्वा घृष्टे दिक्षु ग
याहिनाः ग्रिमभ्यर्चेत ततः पश्चिमेतं मुक्तो ते०। अनया ततो यया ऋचा बद्धांजलिर्नमस्कृत्य सदक्षि

ना०म० १६३

णं जानुभ्यामवनिमिष्टं तु हुत्वा अग्नेः पश्चिमतः अप उपस्पृश्य समिधं प्रदीप्तायां विधूमज्वालांगारेऽग्नौ
अन्नसंस्कारं कामप्रशस्तस्य चतुः षष्टितमभागमितमन्नं वा तंडुलान् दक्षिणहस्तेनादाय सव्यपाणि
दि निधाय अंगुष्ठस्यांतरपार्श्वेन समिन्मूलतो यथोत्तर प्रदेशेन अग्नये स्वाहेति हुत्वा अग्नय इदं नम
मेति त्यक्त्वा तस्मादेवान्नादीशान्यदिशि स्विष्टकृते भूयिष्ठां मा हुतिं प्रजापतिपदं चतुर्थ्यंतं मनसा ध्यायन्नुत्सा हे
त्युच्चार्य स्विष्टकृते मंत्रेण संसृष्टां हुत्वा प्रजापतय इदं न ममेति संत्यज्य एवं हुत्वा पविनष्टपरिस्तर
णानि विसृज्य परिसमूहनपर्युक्षणे कृत्वा उपस्थानं कुर्यात्। तत्र मंत्राः। अग्न आयूंषीति मंत्र
त्रयस्य शतं वैखानसा ऋषयः। अग्निः पवमानो देवता। गायत्री छंदः। अग्न्युपस्थाने विनि०। अ
ग्न आयूंषि०। अग्ने वाधस्व० दु० अग्निर्ऋषि०। तमीमहे महे म० २ अग्ने पवस्व स्वपा०। इयद्ग्नियं मा य
३। अग्ने त्वं न इति चतसृणां गौपायना लोपायना वा बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुश्चैकऋ
षयः। अग्निर्देवता। द्विपदा विराट् छंदः। अग्न्युपस्थाने वि०। अग्ने त्वं नो अंतम०। वसुरग्निर्वसु
श्रवा० २ स नो बोधि श्रुधी हवं० ३ तं त्वा शोचिष्ठ० ४ प्रजापतेर्हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्।
प्रजापत्युपस्थाने०। प्रजापते न त्वदे०। यत्कामास्ते जुहुमः०। तंतुं तन्वं निरतस्य देवाग्निर्जेतो

।ःप्रस्मुप०। तंतुंतंचं तन्नसो० अनुत्वपां वृष तजेस्मु०२। हिरण्यगर्भ इत्यस्य हिरण्यगर्भः प्रजापतिस्त्रि
ष्टुप्। प्रजापत्युप० हिरण्यगर्भः सम वर्त्त०। सदाधार पृथिवी०३। एते मंत्रैर्वायमदेशोपकः कृतांज
लिरग्निमीक्षमाण उपस्थायपुनरुपविश्य अनातिरिक्ताच्छिद्रत्वार्थं विष्णुस्मरणं कृत्वाग्ने
र्होमेन श्रीभगवान् श्रीपरमेश्वरः प्रीयतां न ममेत्युक्त्वाग्निं संभारयेत्। एवं प्रातरुपस्थान
ं प्रादुष्करणं कृत्वा होमकाले आचमनादिकालनिर्देशांतं कृत्वा। अग्निरूपपरमेश्वरप्रीत्य
र्थं प्रातरुपासनहोमं करिष्ये। इति संकल्प सर्वबद्ध्यानादि समित्प्रक्षेपांतं कृत्वा विधूम
ज्वालाग्नौ पूर्ववत् ज्ञातसंस्कारान् तंडुलान् गृहीत्वा। सूर्याय स्वाहेति सायं द्वितीयवत्प्रथ
मा हुतिं हुत्वा सायंकालवत् प्रजापतिपदं मनसा स्मरन्निःसारेद्वितीयाहुतिं हुत्वा परिसमूहना
दि कृत्वा उपस्थानं कुर्यात्। तत्र मंत्राः। सूर्यो नो दिवस्पात्विति सस्य सौर्यः श्वापसूर्यो गायत्री। सूर्योप
स्थाने वि०। सूर्यो नो दिवस्पा०। अग्निर्न०३। उदुत्यमस्य प्रस्कण्वः सूर्यो गायत्री। सूर्योपस्थाने०। उदुत्यं जा
तवेदसं देवं वहंति केतवः। दृशे विश्वाय सूर्यं॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्या
ग्नेः। आप्राद्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ३। नमो मित्रस्येत्यस्य अभितपाः सू

ना०प्र०
१६४

र्योपस्थाने०। नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत। दूरे दृशे देवजाताय केतवे दि
वस्पुत्राय सूर्याय शंसत।४। एतेभ्यश्चतुर्भिः सूर्यं प्रजापते न त्वदेतान्यन्यो विश्वा०। इत्यनेकं। हिर
ण्यगर्भ इति त्र्यकं चाप्यां प्रजापतिं चोपस्थाय पुनरुपवेशनादि अग्निसंभारांतं कृत्वा चरेदिति
प्रातर्होमविशेषः॥ इति प्रयोगरत्ने सायंप्रातर्होमविधिः॥ आग्नेयो होमविधिः॥ अनन
प्रातर्होमविशेषः॥ ॥ इति प्रयोगरत्ने सायंप्रातर्होमविधिः॥ ॥ आग्नाशौचे होमविधिः॥ अनन
न्नावाप्तौ चर्यो: आलिंगादिना सायंप्रातर्होमौ कारयेत्। स्वयं चेदप्यसांगं कुर्यात्। आलिगाद्य
लाभे वेत्प्रत्ये चेपातात्पूर्वं होमांते वक्ष्यमाणप्रकारेणाग्निसमारोपणं कृत्वा सूतकनिवृत्तौ
कृतनित्यक्रियो अग्निप्रतिष्ठापयप्राणानायम्य देशकालौ संकीर्त्य मम नित्यहोमातिक्रमजन्यदोषप
रिहारार्थं प्रायश्चित्तपूर्वकमतिक्रांतहोमान् करिष्य इति संकल्प्य। अग्निं प्रतिष्ठाप्य प्रत्यवरोह
निमंत्रेण अग्निसमारोपणसमिधं तस्मिन्नग्नौ प्रक्षिप्य ध्यानपरिसमूहनादि कृत्वा अग्नेः पश्चि
मतः सपवित्रे पात्रे आज्यमासिच्य अंगारानायतनात्तेनाद्युत्तरतो वर्हिर्निष्कास्य तेषु आज्यपात्रं नि
धाय तृणेनावज्वाल्य दर्भाग्रद्वयं प्रक्षिप्य तेनैव त्रिः पर्यग्निकरणं कृत्वोल्मुकं निरस्य आज्यपात्रं

कर्षंनिवोदगुच्छास्य भूंगानग्नावतिसउससवितुष्टेतिमंत्रेणसंकृतद्भिस्तू दंगो।१।यंत्रिर स्रुयपवित्रेणो
श्वाग्नौप्रहृत्यसम्राडस्यग्ने: पश्चिमतोदर्भेष्वासा।द्येस्त्रुक्स्रुवौसंमृज्यस्रुवेणस्रुचिचतुर्वारंगृही।
त्वानुमनोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञंसमिमंदधातु।याइष्टाउषसोनिम्रुचश्चताः संदधामि
हविषाघृतेनस्वाहा।ज्योतिषेदंनममेति हुत्वानिसहोमार्थंपूर्ववत्तंडुलान्संस्कृत्यनित्यहोमव
त्।परिसमूहनादिसमित्प्रक्षेपणांतंकृत्वा अतीतकालगदारभ्यक्रमेण द्वे द्वे आहुती हुत्वातत्का
लहोमंच कृत्वाअग्निंसूर्यंप्रजापतिंचपूर्ववत्तिमंत्रैरुपस्थायपरिसमूहनाद्यंगजातंसंकृत्यकुर्यात्
॥इत्याग्नौचेहोमविधिः॥ ॥अथापत्कालेकर्तव्योहोमद्वयेसमासप्रयोगः॥ ॥पूर्ववत्सायंकालीनाहु
तिद्वयंहुत्वापरिसमूहनादिउपस्थानांतंकृत्वाकिंचित्कालंनिमील्य अग्निमिल्यवापुनःपरिसमूहना ना०भ०
दिसमित्प्रक्षेपणांतंकृत्वाश्वःकर्तव्यप्रातराहुतिद्वयमपकृष्य हुत्वोपस्थापनंकुर्यात्।एकेवदंति १६६
मित्सायंहोमादौवेव॥ अपकृष्यप्रातर्होमे उपस्थानेमंत्रविशेषः॥हविष्पान्तमितिपंचर्चस्यसूक्तस्य
मूर्धन्वामदेव्यःसूर्यवैश्वानरोत्रिष्टुप्।सूर्योपस्थानेविनियोगः॥हविष्पांतमजरंस्वर्विदिदिस्पृश्या

हुतंजुष्टमग्नौ॥तस्यभर्मणेभुवनायदेवाधर्मणेकंस्वधयापप्रथंत॥१॥गीर्णंभुवनंतमसापगू
ळ्हमाविःस्वरभवज्जातेअग्नौ।देवाःपृथिवीद्यौरुतापोरणयन्नोषधीः॥सख्ये अस्य२।देवेभिर्न्विषितो
यज्ञियेभिरग्निंस्तोषाण्यजरंबृहंतं।योभानुनापृथिवींद्यामुतेमामाततानरोदसीअंतरिक्षं॥
३।योहोतासीत्प्रथमोदेवजुष्टोयंसमांजन्नाज्येनावृणानाः॥सपतत्रीत्वरंस्थाजगद्यच्छ्वात्रमग्नि
रकृणोज्जातवेदाः॥४॥यज्जातवेदोभुवनस्यमूर्धन्नतिष्ठोअग्नेसहरोचनेन॥तंत्वाहेममतिभि
र्गीर्भिरुक्थैःसयज्ञियोअभवोरोदसिप्राः॥५॥एतैर्मंत्रैःसूर्योपस्थायप्राजापत्यैःप्रजापतिंचोप
स्थायपरिसमूहनपर्युक्षणाणाद्यंगजातंसंकृत्कुर्यात्॥ ॥अथप्रगुवादिपक्षहोमःकर्तव्यः॥
तत्रप्रतिपदिसायंकालेसमित्प्रक्षेपणांतंपूर्वांगजातंकृत्वाहोमद्रव्यप्रमाणेनतंडुलान्पात्र
द्वयेप्रतिपात्रंचतुर्दशवारंगृहीत्वाहोमकालेप्रथमपात्रस्थानग्नयेस्वाहेतिसर्वान्जुहुयात्॥
ततःप्राजापत्यर्थंगृहीतान्प्रजापतिःशाः चतुर्थ्यंतंमनसाध्यायन्स्वाहेतिहुत्वोपस्थानाद्यंग
जातंसंकृत्कुर्यात्॥एवंद्वितीयायांप्रातःसमित्प्रक्षेपणादिपूर्ववत्।कृत्वासूर्यायस्वाहेतिपूर्व
वत्हुत्वासायंकालीनोत्तराहुतिप्रजापतिःशाः चतुर्थ्यंतंमनसाध्यायन्स्वाहेतिहुत्वोपस्था

नाद्यंगजातंसद्यःकुर्यात्॥पक्षमध्येवापन्नावागम्मीचतुर्दश्यांसायंकालीहोमात्तानन्तरोषहोमान्
सायंसमस्येत्॥पर्वप्रातर्होमांतोप्प्रातःशेषहोमान्समस्येत्।सर्वथापर्वसायंहोमःप्रतिप
त्प्रातर्होमश्चप्रष्टथगेवहोतव्यौ॥अत्रपूर्ववदग्निमभिरक्षेत्॥अंतरापत्निवृत्तोतुवदारभ्यपूर्व
वत्सायंप्रातर्होमान्यथाकालंकुर्यात्॥अथसभार्यस्यप्रवासप्रसक्तेऽग्निसमारोपण
विधिः॥॥प्रातःकालहोमानंतरंसायंकालहोमानं॥तद्वा॥अयंतेयोनिर्ऋत्वियइत्यस्यगा
धिपुत्रोविश्वामित्रोऽग्निरनुष्टुप्॥अग्निसमारोपणेविनि०॥अ।यंतेयोनिर्ऋत्वियोयतोजातोअरो
चथाः।तंजानन्नग्नआरोहाथानोवर्धयारयिं॥इत्यनेनारणीद्वयेऽग्निंसमारोपयेत्॥अथवाय
द्यारणीपक्षोनगृहीतस्तदाऽऽत्मसमिधिसमारोपयेत्॥यद्वा॥यातेअग्नेयज्ञि०हात्म
त्मानं॥अच्छावसूनिकृण्वन्न०पुरूणि।यज्ञोभूत्वायज्ञःसस्सीदयोनिं॥इतिमंत्रेणपाणीप्र॥ता
प्यआत्मनिसमारोपयेत्॥प्रादुष्करणहोमकालेऽरणीसमारोप्येरणीनिर्मथ्यप्रत्यवरोहे
त्यस्यहिरण्यगर्भोग्निस्त्रिष्टुप्॥अग्निप्रत्यवरोहणे०प्रत्यवरोहजातवेदः।पुनस्त्वंदेवेभ्योहव्यंव
हनःप्रजानन्।प्रजांपुष्टिंरयिमस्मासुधेह्यथाभवयजमानायशंयोः॥इत्यनेनस्थंडिले०॥

ना०प्र०
१६६

अग्निंप्रतिष्ठापयेत्॥आत्मसमित्समारोपणपक्षेश्रोत्रियागारादग्निमाहृत्यउपनोष्णेखनादिभि
ःसंस्कृतेस्थंडिलेविधिवदग्निंप्रतिष्ठाप्य॥प्रत्यवरोहेतिमंत्रेणतांसमिधंतत्रदध्यात्॥समित्पक्षेऽर
णिपक्षेवास्त्रिमिकृत्स्नाश्रणावादर्पत्नोरुभयोरसत्त्वस्थापनीया॥आत्मसमारोपणपक्षेतुसर्वदा
स्वस्वरूपस्यपुर्भिंजलेनिमज्जनस्नानंस्त्रीसंगमंचाकुर्वन्नत्रपुरीषोत्सर्गेशौचमकृत्वानिरक्त
नम्नतिष्ठन्प्रहोमकालेऽग्निआत्मसमारूढमग्निंरक्षन्सर्वस्थेणप्रत्यवरोहेतिमंत्रेणास्थंडिलेपरिलौ
किकाग्नौनिदध्यात्॥एवंयथाधिकारमग्निप्रतिष्ठाप्यकालद्वयोरकृकालेवा।पूर्ववज्जुहुयात्॥
इदंसमारोपणंद्वादशरात्रपर्यंतमेवकुर्यात्।नतत्परि।उपरिकृतेचेल्लौकिकजलंडुलदारः॥नसा
यंप्रातर्होमिः।अथपुरुषस्यैवप्रवासकालेकर्तव्यंप्रवासेप्रसाग्निकेनद्भार्जनादिदृष्टकार्यार्थम
वकालेनपुरुषेणाकार्यः॥नसुभतीर्थयात्राद्यदृष्टार्थकार्यार्थेनत्रहोमांतःप्रवेश्यमंत्रेरुपस्थायप्र
भूतमध्यवर्तिकालेषुपतमकार्यंतप्रोष्यपुनःस्वगृहंगेसमीपमेत्॥गृहामाबिभीतपतःस्व
स्तिवेस्मासुवप्रजायध्वं॥मावगोपतीरिरिषदितिमंत्रेणगृहंनिरीक्ष्य॥गृहानहंसुमनसः
अपद्येवीरघ्नोवीरघ्नोवीरवंतःसुवीरान॥इरांवहंतोघृतमुक्षमाणास्तेष्वहंसुमनाःसंविशामि

॥इतिमंत्रेणगृहंप्रविशेत्॥ नंद्विवत्सगमनंयोयोः शंयोरितिमंत्रेणपुनरग्निंवारंगृहमनुवेश्यहोमकाले
संकल्पाद्युपस्थानांतंकृत्वा॥ अग्नेमयंवोमयंमेस्त्वितिमंत्रेणपुनरग्निमुपतिष्ठेत्॥ ततोज्येष्ठ
पुत्रस्यशिरउभाभ्यांपाणिभ्यांपरिगृह्य॥ अंगादंगात्संभवसिहृदयादधिजायसे॥ आत्मावै
पुत्रनामासिसजीवशरदःशतं॥ इतिमंत्रंजपित्वामूर्ध्नित्रिराजिघ्रेत्॥ एवमितरेषांचपुत्रा
णांकृत्वा॥ अमृतदुहितॄणां॥ तूष्णीमेवशिरोजिघ्रेत्॥ एवंतुत्रेपिप्रोष्यागतेभवति॥ आगत
मप्यप्रियंप्रवासादागमंप्रतीसत्याहवनीयेषुवदेयुः॥ ॥ इतिपुरुषस्यैवप्रवासकालेकर्त्त
व्यताविधिः॥ ॥ अथनष्टाग्नेःपुनःसंधानं॥ चतुर्विधं॥ होमकालेकेनचित्कारणेनस्वयमेवा
ग्निनाशः॥ तस्मिन्नेवकालेसंधानंतत्प्रथमं॥ यस्मिंदिवेहोमकालेस्वयमेवाग्निनाशःतस्मिं
दिनेप्रमादादिनाबुद्धिपूर्वकमग्निंस्त्यक्त्वाकालांतरेसंधानंतत्द्वितीयं॥ द्वितीयंहिद्विविधं
सायंदिनमारभ्यद्वादशदिनमध्येसंधानमेकंद्वादशदिनानंतरेपुनःसंधानंद्वितीयं॥ य
स्मिन्दिनेहोमकालेस्वयमेवाग्निनाशः॥ तस्मिन्नेवदिनेऽकालेतस्मात्दिनाबुद्धिपूर्वकमग्निंत्यागः
तस्यकालांतरेसंधानंतृतीयं॥ यस्मिन्दिनेहोमकालेस्वयमेवाग्निनाशः॥ तस्मिन्दिनेनास्तिके

का०भ०
१६७

नाग्नित्यागः॥ तस्यकालांतरेसंधानंतच्चतुर्थं॥ तत्रतावच्चतुर्विधमध्येप्रथमस्यविधिरुच्यते॥ प्रथ
मंप्रायश्चित्तंकृत्वैवपुनःसंधानंकार्यं॥ तद्विधिरुच्यते॥ आचम्यप्राणानायम्यममहोमकाले॥
नुगतस्याग्नेःपुनःसंधानंकरिष्यइतिसंकल्प्य॥ आयतनाद्बहिर्भस्मनिष्कास्यआयतनं
गोमयेनोपलिप्यतत्रषट्लेखाविलिख्याभ्युक्ष्यत्रियागारात्स्वगृहाद्वाअग्निमाहृत्य॥ एष्यैराद्रुः
जुहोदमूनाः॥ इतिमंत्रेणविधिवत्संस्थाप्याग्निंसहोमंकुर्यात्॥ इतिहोमकालानुगताग्निलक्ष
णंप्रथमंपुनःसंधानं॥ द्वितीयंद्विविधं॥ तत्रादौप्रथमंप्रायश्चित्तपुरःसरमुच्यते॥ एकदिनत्या
गेनवप्राणायामाः॥ अयमर्थः॥ यस्मिन्होमकालेग्निरनुगतस्तस्मिन्होमकालेग्निरनुग
तःस्तस्मिन्नेवहोमकालेबुद्धिपूर्वकंप्रमादादिनापुनःसंधानाभावेनहोमाकरणंतस्मिन्ने
वदिनेहोमकालोदयत्रपुनःसंधानंक्रियतेसएकदिनत्यागतः॥ तस्मिन्नेकदिनत्यागेसतिनवप्रा
णायामान्कृत्वापुनःसंधानंकार्यं॥ द्विदिनत्यागेअष्टादशप्राणायामाः॥ त्रिदिनत्यागेसप्तविंश
तिप्राणायामाः॥ चतुर्दिनत्यागेषट्त्रिंशत्प्राणायामाः॥ पंचदिनत्यागेपंचचत्वारिंशत्प्राणाया
माः॥ षट्दिनत्यागेचतुःपंचाशत्प्राणायामाः॥ सप्तदिनत्यागेत्रिषष्टिःप्राणायामाः॥ अष्टदिनत्या

गेद्विसप्ततिप्राणायामाः। नवदिनसागे एकसप्ततिप्राणायामाः दशदिनसागेन षष्टिप्राणा०। एकाद
शदिनसागे एकोनषष्टिप्राणा०। द्वादशादिदिनसागे अष्टोत्तरशतप्राणा०। एवं सागगणनानुसारे
णप्रायश्चित्तं कुर्यात्॥ ॥ अथ प्रयोगः यजमानः॥ ॥ पत्न्या सह कृतस्नानादिः शुचिर्भूत्वा देश
कालौ संकीर्त्य मम द्वादशदिनमध्ये बुद्धिपूर्वकं प्रमादिकाग्निसागदोषपरिहारार्थममुकदि
नाग्निसागनिमित्तममुकान् प्राणायामान् करिष्ये इति संकल्प्य सागकालानुसारेण प्राणायामा
न् कृत्वा। ततः आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम दशादिनमध्ये बुद्धिपूर्वकं प्रमा
दादिना विच्छिन्नस्य गृह्याग्नेः पुनः संधानं करिष्ये इति संकल्प्य। ततः भस्म साहितं सर्वायतनं
वेत्। अथ तनन्तरं॥ भस्म निष्कास्य आयतनं गोमयेनोपलिप्य दर्भैर्वा उद्धिरन्य याल्लां भं
सिकतादिसंभारान् निदध्यात्। तेच। सिकताः पञ्चपत्रं वटवराट्ता चेम तत्सद्द्मागरवृक्षार सोध ना०स० १६६
वृक्षाः कच्यपत्राकं शः। उदुंबरशानि हतपर्णाम्यु स्वर्वि कंकताः। इम्पे कु राम्नु वितेयाः आधानेद्र
व्यसंहिताः। ततः श्रोत्रियागाराद्वा गृहाद्वा अग्निमाहृत्य तमग्निं जुहोत्य मनेसादिमंत्रैर्विधिवत्
प्रतिष्ठाप्य आज्यं विधिवत्संस्कृत्य दर्भैः परिस्तुत्य ततः संस्थाप्यानुवत्सर्वं तत्समस्तं स्रुवेणाज्यं गृहीत्वा

ऽयमग्ने इति मंत्रस्य विमद ऋषिः अग्निर्देवता पंक्तिश्छंदः आयसमग्नेः होमे वि०। ऽयो अग्ने० घृ
हिः मेध उत्स्वाहा। ऽयसे इदं न० स्रुवेणाज्यं हु०। तासायकालपर्यन्तमेवायमग्नेः पत्नीविधिः॥
इति द्वितीयपक्षे प्रथमपक्षवत्पुनः संधानविधिः॥ ॥ द्वितीयपक्षे द्वितीयपुनः संधानविधिरु
च्यते॥ तत्रादौ प्रायश्चित्तं कृत्वा कालगणनया चरुहोमीयस्थालीपाकीयं वा अद्याज्यं जल्पेन्या
दध्यात्॥ ॥ अथ प्रयोगः॥ ॥ पत्न्या सह कृतस्नाननित्यक्रियः॥ आचम्य प्राणानायम्य देशकालौ
संकीर्त्य मम बुद्धिपूर्वकं प्रमादाद्विना एतावत्कालगृह्याग्निविच्छेदजनितप्रत्यवायपरिहारार्थं
तावत्प्रायश्चित्तममुकप्रत्याम्नायेन करिष्ये इति संकल्प्य॥ अग्निविच्छेदकालगणनया प्रागुक्तस्म
त्युक्तं प्रायश्चित्तं दंपती सह कुर्वीताम्। नाप्यथ कर्ः। समाप्ते तस्मिन्नग्निविच्छेदेन लुप्तानां सायंप्रात
र्होमानां तथादर्शपूर्णमासस्थालीपाकानां च संपत्तिपर्याप्तमिदं आज्यादि द्रव्यं च ब्राह्मणाय
दद्यात्। संप्रदद्यादिति लुप्तसायंप्रातर्होमस्थालीपाकगणना पर्याप्तं ब्रीह्याद्याज्यं च ब्राह्मणाय द
द्यात्॥ ततः शुभकाले समुचिरावांतः प्राणानायम्य देशकालौ स्मृत्वा मम बुद्धिपूर्वकप्रमादा
दिना विच्छिन्नस्य गृह्याग्नेः पुनः संधानं करिष्ये इति संकल्प्य। स्थंडिलोपरि ... तानि कृत्वा तत्र

यपामीलितानुस्रुवौकसंभाराग्निधायनत्रजुहोदमूनेसादिभिर्मंत्रैरग्निंप्रतिष्ठाप्यान्वाधानंकुर्या
त्।तद्यथा।इदंसमिद्योगृहीत्वादेवताःपरिगृह्णार्थमस्मिन्नन्वाहितेग्नौजातवेदसमग्निमिध्मेनप्रजा
पतिंचाघारदेवतौआज्येन॥अत्रप्रधानं॥त्रिरग्निंपवमानंसकृदग्निंप्रजापतिंचाज्येनअर्यमाग्निं
वरुणाग्निंपूषाग्निंप्रजापतिंचलाजद्रव्येणाचतुर्वारंत्वयस्मिंसावित्र्याआज्येनशेषेणस्विष्टकृ
तमित्यादिपरिस्तरणादिप्राक्कृतंकुर्यात्।पात्रासादनेविशेषः॥प्रोक्षणीस्रुवप्रणीतापात्रमाज्य
पात्रंलाजाःशूर्पद्वयंबर्हिश्चदर्भानासेदधिचासादयेत्॥आज्यसंस्कारादिप्राक्कृतंतत्राज्ये
नसहलाजानामपिपर्यग्निकरणंआज्यस्थालवनासादनयोः कृतयोर्लाजानांत्रिःप्रोक्षणं
स्रुवसंमार्जनादिप्राक्कृतंपत्न्यान्वारब्धःधाधानाद्याघारांतंप्राक्कृतंकुर्यात्तन्वस्रुषा॥अत्रप्रधा
न॥अग्नआयूंषीतितिसृणांशतवैखानसाऋषयः॥अग्निःपवमानोदेवता।गायत्रीछंदः।अग्नि ना०प्र० १६८
पुनःसंधानप्रधानाज्यहोमेविनियोगः॥अग्नआयूंषि०दुच्छुनांस्वाहा॥अग्नयेपवमानायेदं०अ
ग्निऋषिःपव०महागयंस्वाहा॥अग्नयेपवमानायेदं०अग्नेपवस्व०मयिपोषंस्वाहा॥अग्नयेपव
मानायेदं०त्वमर्यमावसुस्तुतोग्निस्त्रिष्टुप्।पुनःसंधानप्रधानाज्यहो०त्वमर्यमाभवसि०।

कृणोषिस्वाहा॥अग्नयइदं०प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥अग्निपुनःसंधानाज्य०प्रजाप
तेमत्वं०रयीणांस्वाहा।प्रजापतयइदं॥अथपत्न्याःशान्तिलेजलौपतिराज्येनोपस्तीर्यद्विर्लाजाना
वपंचावत्तीतुत्रिरेवमपर्यस्त्वानभिघार्यप्रांजलिस्थानमभिघार्यतिष्ठेत्॥तिष्ठंत्साःप्रांजलिस्थ
करस्थांगृहीत्वा॥अर्यमणंवरुणंपूषणमितितिसृणांवामदेवोऽर्यमाग्निर्वरुणाग्निःपूषाग्नि
रनुष्टुप्॥गृह्याग्निपुनःसंधानप्रधानलाजाहोमेविनियोगः॥अर्यमणंनुदेवंकन्याअग्निमयक्षत
।सइमांदेवोअर्यमाप्रेतोमुंचातुनामुतःस्वाहा॥इतिपठित्वामंत्रांतेजलिमविच्छिद्यपतिःस्रुवेण
ग्नेरंजलिनामपाणिनिवापत्नीजुहुयात्॥एवमग्रेपि॥अर्यमणेअग्नयइदं०इतिपतिस्त्यागंकुर्यात्।
वरुणंनुदेवं०।तुनामुतस्वाहा॥वरुणायाग्नयइदं०पूषणंनुदेवं॥तुनामुतःस्वाहा।पूषाग्नयइदं
०।ततःशूर्पकोणेनावशिष्टानसर्वान्लाजान्पतिःपत्न्यावाआरब्धःप्रजापतिंध्यायन्जुहुयात्
।प्रजापतयइदं०लाजानांस्विष्टकृतंनास्ति।ततःउपविश्यआज्यंपतिर्जुहुयात्॥अग्नेःप्रज्ञाभि
तिचतसृणांसप्तसावित्रीऋषिःसप्तसावित्रीदेवताःआद्याजगतीद्वितीयात्रिष्टुप्॥अलदेनु

ह्मो ॥ अग्निपुनःसंधानात्प्रहो० । आनः प्रजां जनयतु० अग्ने चतुष्पदे स्वाहा । सूर्यो सावित्रे इदं०
अघोरचक्षु० वामस्य देव० शं नो भवद्विपदे शं चतुष्पदे स्वाहा ॥ सूर्या सावित्र्या इदं० इमां त्वमिंद्र मी
ढ्वः सुपुत्रां सुभगां कृणु । दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि स्वाहा । सूर्या सावित्र्या इदं०
सम्राज्ञी श्व० ननांदरि० अधिदेवृषु स्वाहा ॥ सूर्या सावित्र्या इदं० ततः समंजंतु विश्वे० सूर्या सावित्री
सूर्या सावित्र्यनुष्टुप् । दधिप्राशने वि० । आज्यशेषेण हृदयांजने वा विनि० । ॐ समंजंतु विश्वे० सं
मातरि० दधातु नौ । एतेन स्वयं दधिप्राशने वि० आज्यशेषेण हृदयांजनं वा कुर्यात् ॥ पत्नी च दधिप्रा
शनेन । सा च तच्छेषं प्राश्नीयात् । स्वहृदयांजनपक्षे पत्न्या अपि हृदयांजनं । अथाज्येन यदस्य कर्म
णो ऽत्यरीरिच इति स्विष्टकृतं हुत्वा इध्मसंनहनादि होमादिशेषं समापयेत् ॥ अत्र कारिका । उपलेपनादिकं कु ना०सं० १५०
र्यादाघारांतं विवाहवत् ॥ विवाहाज्याहुती हुत्वा लाजहोमो भवेदिह ॥ गृहप्रवेशनीयाख्यं हुत्वा स्व
हृदयांजनं ॥ परिणीता सा दिना स्तत्र लाजानावपतिस्त्वयं ॥ आधाने पुनराधाने सायंहोमसुपक्रमा
त् । स्थालीपाकं पौर्णमास्यमारभेत विचक्षणः ॥ ॥ इति नारायणभट्टकृते प्रयोगरत्ने अग्न्युद्धिष्ट

र्वकप्रमादादिना विच्छिन्नाग्नेः पुनःसंधानप्रयोगः ॥ ॥ इति विच्छिन्नपक्षस्य द्वितीयपुनःसंधानविधिः
॥ ॥ अथ बुद्धिपूर्वकमालस्यादिना विच्छिन्नस्य तृतीयपक्षस्य पुनःसंधानविधिरुच्यते । तत्रादौ प्रा
यश्चित्तविधिरुच्यते । द्वादशाहपर्यंतमहरहमुपवासः । मासपर्यंतं द्वादशरात्रमुपवासः । अब्दपर्यंतं मासं
पयोव्रतं । द्विवर्षपर्यंतं चांद्रायणं ॥ अब्दपर्यंतं चांद्रायणं सोमायनं तदूर्ध्वं मेषकृच्छ्रं । धूर्तिनोगारान्वे
ति प्रयोगपारिजाते स्मृत्यर्थसारे तु ॥ द्वादशाहातिक्रमे त्र्यहमुपवासः । संवत्सरातिक्रमे त्र्यहमुपवासः
। पयोभक्षणं वा । इति विशेषः । इति संक्षेपतो दिङ्मात्रमुक्तं ॥ माधवविज्ञानेश्वरादिनिबंधनवलोक
कालविलंबेन प्रायश्चित्तविशेषा ज्ञेयाः ॥ ग्रंथविस्तरभयान्न लिख्यते ॥ ॥ अथ प्रयोगः ॥ ॥ पत्न्या सह
कृतस्नानादिनित्यक्रियः ॥ आचांतः आयासीनायस्य मम बुद्धिपूर्वकमालस्यादिना एतावत्कालं गृ
ह्याग्निविच्छेदजनितप्रत्यवायपरिहारार्थं एतावत्प्रायश्चित्तं मम मुक्प्रत्याम्नायेन करिष्ये इति संकल्प्य
। अग्निविच्छेदकालगणनया प्राप्तं स्मृत्युक्तं प्रायश्चित्तं द्वंद्वप्रतां सहकृत्वी तां भट्टथकं समाप्ते तस्मि
न् अग्निविच्छेदेन लुप्तानां सायंप्रातर्होमानां तथा दर्शपूर्णमासस्थालीपाकानां च संपत्तिपर्याप्तमि
दं आज्यादिद्रव्यमाज्यं च ब्राह्मणाय संप्रददे । इति लुप्तसायंप्रातर्होमस्थालीपाकगणनापर्याप्तं

व्रीह्याद्याज्यं च ब्राह्मणाय दद्यात्॥ ततः शुभकालेषु विप्रान्वाचयित्वा ततः प्राणानायम्य देशकालौ संकीर्त्य मम
बुद्धिपूर्वकमालस्यादिना विच्छिन्नस्याग्नेः पुनः संधानं करिष्य इति संकल्प्य स्थण्डिलोपलेपनोल्ले
खनादि विधाय होमगृहप्रवेशनाय होमादि हृदयांगमादि स्विष्टकृदादि होमशेषं समापनांतं पूर्व
वदेव कुर्यात्॥ नात्र विशेषः प्रायश्चित्तसंकल्पेन पुनः संधानसंकल्पे चैव विशेषः॥ शेषं पूर्ववत्स
मानं॥ इति बुद्धिपूर्वकमालस्यादिना सकाग्नेः पुनः संधानविधिः॥ ॥ इति तृतीयपक्षः पुनः सं
धानविधिः॥ ॥ अथ नास्तिक्येन सकाग्नेः पुनः संधानं चतुर्थमुच्यते। तत्रादौ प्रायश्चित्तमुच्यते॥
द्वादशाहपर्यंतं यथाशक्ति सुवर्णदानं॥ सुवर्णस्य परिमाणं कनकस्य षोडश माषाः ते सुवर्णाः
यथाशक्ति देयाः मासद्वयपर्यंतं यथाशक्ति कृच्छ्रं॥ मासचतुष्टयपर्यंतं पराकः ततोऽष्टपर्यं ना॰ भ॰ २११
तं मासं पयोव्रतं॥ अष्टपूर्णेन्दु पूर्णमासिकं व्रतं॥ ततः प्रतिवर्षं त्रैमासिकावृत्तिरिति॥ अथ प्र
योगः॥ कृतपत्नीसहितः स्नात्वा पर्षदं गच्छेत्॥ तत्र धर्मशास्त्रज्ञान्ब्राह्मणान्प्रति नास्तिक्ये
नाग्निसागरलक्षणं स्वीयं पातकं कथयेत्॥ ते च एनं कालगणनानुसारेण प्रायश्चित्तमुपदिशे
युः॥ ततः कर्ता पत्नीसहितः तस्मिन्दिने संकल्पपूर्वकमुपोष्य परेद्युः कृतनित्यक्रियः संक

ल्पपूर्वकं पर्षदुपदिष्टं प्रायश्चित्तमुपदिशेयुः। ततः कर्ता पत्नीसहितः तस्मिन्दिने संकल्पपूर्वक
मुपोष्य परेद्युः कृतनित्यक्रियः संकल्पपूर्वकं पर्षदुपदिष्टं प्रायश्चित्तं कुर्यात्। तद्यथा। पत्न्या सह कृ
तस्नानादि नित्यक्रियः आचम्य प्राणानायम्य मम नास्तिक्येनैतावत्कालं गृह्याग्निविच्छेदजनित
प्रत्यवायपरिहारार्थं एतावत्प्रायश्चित्तं पर्षदुपदिष्टं अमुकप्रत्याम्नायेन पर्षदुपदिष्टेन करिष्य इति
संकल्प्य। अग्निविच्छेदकालगणनया पर्षदुपदिष्टममुकं प्रायश्चित्तं दंपती सह कुर्वीतां। न एवं
कृ समाप्ते तस्मिन्नग्निविच्छेदेन लुप्तानां सायंप्रातर्होमानां तथा दर्शपूर्णमासस्थालीपाकानां च सं
पत्तिपर्याप्तमिदं व्रीह्यादिद्रव्यमाज्यं च ब्राह्मणाय संप्रददे इति लुप्तसायंप्रातर्होमस्थालीपाकगण
नापर्याप्तं व्रीह्याज्यं च ब्राह्मणाय दद्यात्। ततः शुभेऽह्नि अपराह्णे सभार्यः। आचम्य प्राणानायम्य
देशकालौ संकीर्त्य नास्तिक्येन विसृष्टस्याग्नेः पुनः संधानं करिष्य इति संकल्प्य। स्थण्डिलोपलेपनो
ल्लेखनादि कृत्वा पृथङ्मीलितसंभारान्निदध्यात्। संभाराश्च। पलाशोदुंबराश्वत्थशमीवैक
ङ्कतांबुजं। वंशीकोरवदारु हंसमूषकोत्खातमृत्तिकाः शर्कराः सिकताः स्तदारूपा धूलितह
स्तवः शापा विद्युत। यथालाभं संभाराः कार्याः पावनाग्निं संभरेदिति। ततः ओ त्रियामाशान। स्वगृहा द

ग्निमहस्य॥ ॐ इदं त एकं पर ऊत एकं तृतीयेन ज्योतिषा संविशस्व। संवेशने तन्वश्चारुरेधि प्रियो दे
वानां परमे जनित्रे इत्यनेन मंत्रेण ॐ भूर्भुवस्वः स्वाहेति मिश्राग्निं प्रतिष्ठाप्य समिद्द्वयमादाय पुन
रेवं कालोसंकालसंतातिर्केन विसृष्टस्याग्नेः पुनः संधानांगभूतमन्वाधानं करिष्ये॥ अस्मिन्नन्व
न्वाहिते अग्नौ जातवेदसमग्निमिध्मेन प्रजापतिं चाघारदेवते आज्येन अग्निसोमौ चक्षुषी आज्येन
अत्र प्रधानं॥ अग्निमष्टवारं अग्निं पवमानमग्निं पावकमग्निं शुचिमग्निं पथिकृतमग्निं तंतुमति
आज्येन यक्ष्ये शेषेण स्विष्टकृतमित्यादि संकल्प्य इध्मं तमुक्त्वा समिद्द्वयमग्नावाधाय परिसमु
ह्यनाद्याज्यभागांतं कृत्वा स्रुवेण स्रुचि मम आज्यं चतुर्गृहीत्वा॥ त्वमग्ने सप्रथा असि सत्यस्यात्रेयः सुतंभरो
ग्निर्गायत्री। नास्तिकाग्निसृष्टाग्नेः पुनः संधानप्रधानाज्यहोमे०। त्वमग्ने सप्रथा० वितन्वते स्वाहा
। अग्नय इदं न मम इति सागरः सर्वत्र। यो अग्नेरिसस्य काण्वो मेधातिथिरग्निर्गायत्री नास्तिकानलवि
सृष्टाग्नेः पुनः योअग्निं देववीतये० मन्यसे स्वाहा॥ अग्नय इदं० तंतुं तन्वन्निसस्य वामदेवोग्निर्जगती
विनियोगः। [illegible] तंतुं तन्वन्० रजसो० अंजन स्वाहा॥ अग्नय इदं० ३ त्वन्नो अग्ने तव देवस्यांगि
रसो हिरण्यस्तूपोग्निर्जगती। नास्तिका० ग्नि० त्वन्नो अग्ने तव देवपायुभिः० स्तव व्रते स्वाहा॥ अ

ग्नय इदं० ४ त्वं नो अग्ने वरुणस्य गोतमो वामदेवोग्निर्वरुणौ त्रिष्टुप्। नास्ति० ॐ त्वं नो अग्ने वरुणस्य विद्वान्
० प्रमुमुग्ध्यस्मत् स्वाहा। अग्नय इदं० ५ स त्वन्नो अग्ने गोतमो वामदेवोग्निर्वरुणौ त्रिष्टुप्। नास्ति०
स त्वन्नो अग्नेवमो० राधिस्वाहा॥ अग्नय इदं० ६ मनुमनो ज्योतिर्जुषतां० [illegible] ष्टमां० इतेन स्वाहा॥ अ
ग्नय इदं० ७ पुनस्त्वादित्या रुद्रा वसवः समिंधतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः। घृतेन त्वं तन्वं वर्धय
स्व सत्याः संतु यजमानस्य कामाः स्वाहा॥ अग्नय इदं० ८ एतैर्मंत्रैः स्रुवेण स्रुचि चतुर्गृहीते
नाज्येनाष्टाज्याहुतीर्हुत्वा स्रुवेण आज्यस्थाल्या आज्यमादायादाय ॐ अग्नये पवमानाय स्वाहा॥
अग्नये पवमानायेदं० १ ॐ अग्नये पावकाय स्वाहा॥ अग्नये पावकायेदं० २ अग्नये शुचये स्वाहा॥ अ
ग्नये शुचय इदं० ३ ॐ अग्नये पथिकृते स्वाहा। अग्नये पथिकृत इदं० ४ ॐ अग्नये तंतुमते स्वाहा॥ अ
ग्नये तंतुमत इदं० ५ इति पंचाज्याहुतीर्हुत्वा एवं तास्मस्तक स्विष्टकृदादि होमशेषं समाप्याहिता
ग्नये अन्नदाहं दक्षिणां दद्यात्॥ इति नास्तिकाग्निसृष्टाग्नेः पुनः संधानं॥ इति चतुर्विधपुनःसं
धानप्रश्ने चतुर्थः प्रश्नः समाप्तः॥ ॥ ततः सायंकाले पूर्ववन्नित्यहोमं कुर्यात्॥ सायंकालपर्यंतं
पत्न्युपवसेत् दैनंदिनो यजमानो वा उपवसेत्। इदं सायंकाले नित्यहोमपत्न्याद्युपवासादिकं

अबुद्धिपूर्वकं प्रमादादिनाग्निसमारोपेऽल्पे तस्मादिनाच बुद्धिपूर्वकमग्निसमारोपेण नष्टे कोनाग्नि
समारोपे त्र्यहमितियं यस्मिन् होमकाले अग्निरनुगतः तस्मिन्नेव काले अग्निं प्रतिष्ठाप्य होमः कृत
व्योत॥ तत्र सायंकाले निःसहोमे पत्न्याद्युपवासादिकं नास्ति॥ ॥ इति पुनः संधानविधिः॥ ॥
अथाग्निसंसर्गदोषप्रायश्चित्तं॥ स्वगृह्याग्निरन्यगृह्याग्निना संसृष्टश्चेत्॥ अग्नी विभज्य उभौ
समित्समारोपणं कुर्यात्॥ ततः एकस्मिन्नग्नावारोप्य देशकालौ संकीर्त्य समिधमा
दाय अस्मिन्नन्वाहितेऽग्नौ विलासादिन स्रुवाऽऽज्येन संतत्य समिधं पश्चात् वाधाय परिसमूह
नादि पूर्णपात्रनिधानांतं कृत्वा अग्नये विविचये त्वा जुष्टं निर्वपामीति चतुरो मुष्टीन्निरुप्य त
थैव अग्नये विविचये प्रोक्षामीति चतुर्वारं प्रोक्ष्य अवहननाद्याज्यभागांतं कृत्वा अग्नये विविचे
स्वाहेति हुत्वा स्विष्टकृदादि होमशेषं समापयेत्॥ अनुपक्रांतदर्शपूर्णमासश्चेत् एवं चरु
प्रसंकं सक्तु वा आज्यं वा गृहीत्वा अग्नये विविचये स्वाहेति स्रुवा पूर्णाहुतिं हुत्वा
कालहोमं चरेत्। पक्वान्नाभावे तु अग्नये पथिकृते तु हुयात्॥ अग्निसंसृष्टश्चेत् अग्नये शुचये स्वा
हेति जुहुयात्॥ एवं नाग्निनासंसृष्टश्चेत् अग्नये संवर्गाय जुहुयात्। वै घृतेन संसृष्टश्चेत् अग्न

येऽस्मिन् ते जुहुयात्॥ ॥ अथ पत्नीकोपासनप्रयोगः॥ ॥ स्वतः पूर्वं मृतायै पत्न्यै दाहाधानाग्निं दत्वा
ऽवशिष्टोऽग्निः सर्ववत् स्वायंप्रातर्होमौ कुर्यात्। इति स्वतंत्रकार्यानिवा॥ इति पत्नीकोपासनविधिः
॥ अथ विवाहानंतरं पत्न्या गृहप्रवेशः गृहप्रवेशहोमादिनादारभ्य दशसंक्रांतिमतां पात्नीविष्णा
दिरहितेन चतुर्थदिवसादौ मौहूर्तिकोक्तशुभदिने गृहप्रवेशं करिष्यमाणः श्वशुरगृहेऽभ्यसत्वा
त्वा रात्रौ स्वदेशाचारानुसारेण नागवल्यादि कृत्वा श्वशुरदत्तदासीदासपर्यंकादि पुनः सुवासि
नीकृतनीराजनः श्वशुरादिभ्यो गृहीताशीर्वचनः स्वस्तिनः स्वस्तिकृतयावधासह विवाहा
ग्निं शकटे वस्त्राण्यास्त्रयन पूषा त्वेतहस्य सूर्यासावित्रीसूर्यासावित्री त्रिष्टुप्। वध्वा यानारो
रोहणे विनियोगः॥ पूषा त्वेतो नयतु॰ अनेन मंत्रेण पूर्वार्धविभवं गजाश्वादि यानमारोहयेत्
यानेन प्रयाणं एव वा सोनि पूतः यानादिस्तेन ग्रामिकादिना प्रयाणे मंत्रोनपठनीयः स्वयमेवेव
हपक्षेस्वग्रहागमने पिनायं मंत्रः पठनीयः। गमने पद्यां तरानाम्नान दीस्यात्॥ तदा अश्मन्वतीरीय
ते इति वाचोऽनवधूं नावमारोहयेत्॥ अश्मन्वती रीयते संरभध्वमुत्तिष्ठत प्रतरता सखायः
अत्रा जहाम ये असन्नशेवाः शिवान्वयमुत्तरेमाभि वाजान्। नायमानावधूर्यदिपित्रादिभिवि

योगश्च दिनारो दितितराजीवकृदंतातिक्रम्य पदेत्। जीवं करुदंतिविमयंतेभ्यः धरेदा घर्मनुप्रस्थितिं दी
धि पुनरः। वामपितुर्भ्यायदृदं समेरिरेमयः। पतिमोजनयः परिषजे॥ अयं विधिः स्वग्रामेपिभव
त्यविदेशात्॥ शोभनेषु देशेषु वृक्षत्र तुष्पथेषु। मा विदन्परिपंथिनोय आसीदंति विदं पता सुगेभिर्दु
र्गमती तामप द्रावस्तय। इतिक्रमं पदेत्। वसेतो वसंतावीक्ष्णकाः संतिचैवेतान्। सुमंगलीरियं
वधूरिमांसमेतपश्यत॥ सौभाग्यमस्यै दत्वायथास्तं विपरेमन॥ इत्यन्वीक्षेते॥ इह प्रियं प्रजया ते
समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि। एनाप सातनं १ संसृजस्वाथ जिव्री विदथमा वदाथः
इत्यनेन मंत्रेण वधूं गृहं प्रवेशयेत्॥ अयं विधिः॥ स्वग्रामविवाहेपि भवति॥ अत्रायमनुष्ठानक्र
मः वरो वधूयुक्तः मंत्रेण पयाग्निं यानमारोप्य विवाहाग्निं कुटारोपितमजस्रमृग्रतो नयन् सु
मंगलीस्त्रक्रैः परद्भिर्विप्रैः बंधुभिः सुवासिनीभिः इष्टमंगलसंसक्तकर्मणि सूर्यकिजन्याकन्यापु
ष्पाक्षतदीपमाला ध्वजतोरणमंगलतूर्यनादैश्च सहसितछत्रयुतः स्वगृहद्वारे सुवासिनीभि
नीराजितविग्रहो वधूपाणिगृहीत्वा शुभेमुहूर्ते इह प्रियं प्रजया ते समृध्यतामिति मंत्रेण स्वगा
र्हं प्रवेशयेत्। सुप्रवेशपक्षस्यं च प्रविश्य पतंडुलचतुष्केऽनकुलदेवतां लक्ष्मीं च संपूज्य विप्रैः पुण्याहं वाचयेत्। सुभ

ना०भ०
२४

गलीसूक्तं पूर्वलिखितमेव। कनिक्रदज्जनुषमिति॥ ततः गृहप्रवेशानीयहोमः कार्यः। अस्म
विस्तु आश्वलायनानुसारेण सर्वं कर्म तत्प्रोक्तं। ततः शुभदिने स्वस्वा दिवाच पित्वा स्वलंकृतः स्व
लंकृतां वधूं एतावुपगच्छेदिति। नमावलिस्तं च नलि प्रयोगस्तु सर्वं दिङ्मात्रं च नुष्ठानमभ्यधानोक्तः
॥ ॥ इति श्रीभट्टरामेश्वरभट्टसूरिसूनुनारायणभट्टकृते प्रयोगरत्ने वधूसहितं स्वगृहप्रवेश वि
धिः॥ ॥ अथ ससंस्कारानिरूप्यंते॥ ॥ आश्वलायनमाचार्यं प्रणम्यापि तरं गुरुं॥ भट्टरामेश्वरसु
तो भट्टनारायणः सुधीः॥ १ पंचविंशतिसंस्कारेष्वत्का ष्टादशसंस्कृताः पाकयज्ञान्सप्तत्रिष्ट
न्वक्ति शिष्टेष्टसिद्धये। २ तत्रश्रुतः परं द्विजातीनां संस्कृतिर्निपितोः अते॥ संस्काररहिता ये तु
॥ ॥ इति नारायणभट्टी प्रयोगः समाप्तः॥ ॥ शुभं भवतु॥ ॥ तेषां जन्मनिरर्थकं। ३ पंचविंशतिसं
स्कारैः संस्कृता ये द्विजातयः। ते पवित्राश्च योग्याः स्युः श्राद्धादिषु सुयंत्रिताः॥ ४ गर्भाधानं पुंसवनं
सीमंतो बलिरेव च। जातकृत्यं नामकर्म निष्क्रमोन्नप्राशनं परं। ५ चौलकर्मोपनयनं व्रतानां च
चतुष्टयं। स्नातको द्वाहो चाग्रयणं मष्टकाश्च यथाक्रमं। ६ श्रावण्यामाश्वयुज्यां च मार्गशी
र्षं दिपार्वणं। उत्सर्गश्चापि पाकर्म महायज्ञाश्च नित्यशः। ७ श्रावण्यादिषु तिस्रषु पीयमि।

त्रीणुक्रमेणश्रवणाकर्माश्वयुजीकर्मप्रत्यवरोहणमितित्रीणिकर्माणि।पर्वाण्यमावास्यापौर्णि
पमाणंपार्वणमित्यर्थः।संस्कारानियताह्येतत्प्रकरणस्यविशेषतः।इत्याश्वलायनमाचार्य
रोपकर्मोपसंहारयोर्नियतत्वोक्तो।जन्मनैरर्थक्यारूपाकयज्ञानियराचपंचविंशतिसंस्कार
णांनित्यतोक्ता।पुनश्चैषांनैमित्तिकवार्षिकमासिकनित्यभेदेनचतुर्विधत्वमेवाह॥नैमि
त्तिकाःषोडशोक्ताःसमुद्वाहावसानकाः॥सप्तैवाग्रयणाद्याश्चसंस्कारावार्षिकामताः॥मा
सिकंपार्वणंप्रोक्तमष्टकानांतुवार्षिकं।महायज्ञास्तुनित्याःस्युःसंध्यावच्चाग्निहोत्रवदिति
नित्याःप्रत्याहिकाइत्यर्थः।एवंपंचविंशतिसंस्कारेषुगर्भाधानाद्याअष्टादशसंस्काराउक्ताः॥इदानीं
श्रवणाकर्माद्याःसप्तावशिष्टाउच्यन्ते॥तत्रतावत्श्रवणाकर्मोच्यते।श्रवणाकर्मसर्पबलिंच
मुक्त्वापिकेचित्कुर्वन्ति।युक्तंतत्पक्षाग्निष्वेवकार्यमिति।श्रावण्यांपौर्णमास्यांरवेर्वाह्निहुताग्निमाधं
कृत्वादिवेवयवानांव्रीहीणांवालौकिकाग्नौभर्जनेनप्रसृतिमितान्धानाःकृत्वाऽऽरवादुनयवध्र
घ्नमतरस्यलौकिकाग्निभर्जनंकृत्वातत्सिद्धरूपैःसक्तुभिर्नवंकलशंप्रपूर्यसर्पबलिनि
क्षेपसाधनभूतंदर्वीकृतदर्व्यमपिसंपाद्यतदुभयंगृहकाष्ठादिलिखितेनवंशिकोनिधा

ना०मं०
२७५

पबलंयेगृहेप्राअंगुविदेशेपरिगृहस्थायादिहकरिष्यामीतिव्रीहयवरूपान्नंपुरोडाशकपालंच
संपाद्यधानाःसमाधीकृत्यधालौकिकाग्निनाकृताःकृत्वैकपात्रेनिधायपरासक्तकाअर्धधानाः
पात्रान्तरेनिदध्यात्॥ततोऽस्तमितेसूर्येशुचिःसपवित्रपाणिःआचम्यप्राणानायम्यदेशकालौसंकीर्त्यममपुत्र
पौत्रादीनांसर्वरोगनिवारणसमस्तपापक्षयादिद्वाराश्रीपरमेश्वरप्रीत्यर्थंनित्यविधिरूपश्रवणाक
र्मकरिष्यइतिसंकल्प्यसमिद्द्वयंत्रयंवादायपुनर्देशकालौसंकीर्त्यअस्मिन्श्रवणाकर्मणिदेव
तापरिग्रहार्थमन्वाधानंकरिष्यइतिसंकल्प्यास्मिन्नन्वाहितेऽग्नावित्यादिचक्षुषीआज्येनेत्यं
तमुक्त्वाप्रधानदेवतामग्निंचतुर्वारंचरुद्रव्येणाच्युतंमैत्रमग्निंपुरोडाशेनाग्निमाप्याज्येन
संवाजिनदेवताधानाद्रव्येणशेषेणस्विष्टकृतमित्यादिसद्योयक्ष्यइत्यंतमुक्त्वाऽऽर्द्रभूर्भुवःस्वरि
समस्तव्याहृतीःपरिसमूहनादिपूर्णपात्रनिधानांतंकृत्वाचरुपुरोडाशार्थंदेवतानांपंचानांतू
ष्णींचतुरश्चतुरोमुष्टीन्निरूप्यतत्संख्ययातूष्णींप्रोक्षणावघातादिकृत्वाप्रक्षाल्यचरुपुरोडाशार्थंतंडुला
न्धानाश्चपृथक्कृत्यपुरोडाशार्थांस्तुयंकिंचित्सिक्तान्कृत्वाकृष्णाजिनेप्रस्कंदयन्दृषदुपला
वापेषणेनचूर्णयित्वातत्रस्वर्थमपरोदक्षिणभागेस्थालींनिधायाग्नेःपश्चात्परिस्तरणम

ऽग्नेरुपवेषाख्यसाद्देतुस्संमितयज्ञियकाष्ठेन प्रावंगारोऽष्टपकृत्स्नतयोरेकं वायव्येऽग्निरस्याघ
उपस्तृणीयाविष्टमंगारमवस्थाप्य तस्मिन्कपालमुपधायतदुपर्यपरमंगारंनिक्षिप्य कृष्णवि
स्वात्रेपिष्टसेकार्थमपःप्रताप्यप्रागर्वप्रक्षाऽऽग्नौप्रतप्यद्रोणीयित्वा साग्नेनिधायशीतेनवि
स्वविवृवर्तितस्य पुरोडाशार्थं पिपिष्टंनिक्षिप्य सपर्णपात्रोदकंस्रुवेणपिष्टे प्रक्षिप्य सर्वमेतत्सोद
केनपिष्टंसंमिश्र्य पिंडीकृत्वपूर्वमुपहितंकपालादंगारंतृणेनापोह्य चरुस्थाल्यांतडुलानोप्याऽ
ग्न्वराकमात्रंकूर्मोकृतिंपुरोडाशंकृत्वाकपालेनिधायाऽद्भिः श्लक्ष्णीकृत्याज्यंस्नेहकृत्वाज्या
ह्णीति चत्वारिहवींषि त्रिःपर्यग्निकृत्वापुरोडाशमुल्मुकैः पतापदर्भैः प्रज्वाल्यतत्रैवसुश्र
तं श्रपयित्वा तदुपरिसांगारं तृणंनिक्षिप्य हस्तेनप्रक्षालयेत् ततआज्यमुद्वास्यबर्हिष्यासा ना०न०
द्य स्रुवंस्रुचंचसंमृज्य पुरोडाशं तृणोपरिस्थितं स्थापितं तृणेनापोह्य चरुपुरोडाशौन्यग्वनिधायेदि १७६
पुरुषस्य चरुबर्हिष्यासाद्य तदुत्तरतःपात्रान्तरस्थितजौकिकान्येन पुरोडाशमभ्यज्येत्॥ प्र
कृतेप्रहवाकुर्यात् तदुत्तरतेअक्ता अनक्ताश्च धानाआसाद्यधानानां धा ६ना घान्यमा
माते कृतेऽस्सुहूतास्वेरादेर्व्यापयपागोत्रंचतुर्वारंपंचवारंवा पदानेधर्मेण वदायाऽग्नेनये

१८

स्वादिमंत्रे ऋगितिस्वाहाकारंपठन्नाहुतिचतुष्टयंजुहुयात्। अग्नेनयेत्यादिकस्यऋचतुष्टयस्याग
स्त्यऋषिः अग्निर्देवता त्रिष्टुप्छंदः। श्रवणाकर्मप्रधानचरुहोमेवि०। ॐअग्नेनयसुपथारायेऽअ
स्मान्० नमउक्तिंविधेम।स्वाहा॥ अग्नयइदं०ॐअग्नेत्वंपारयानव्यः० ततपापञ्चायोः।स्वाहा।अग्न
यइदं०।ॐअग्नेत्वमस्मायुयोध्यमीवाः० शौविश्वेभिरमृतेभिर्यजत्र।स्वाहा॥ अग्नयइदं०ॐपाहिनो
अग्नेपायुभिरजस्रैः० नूनंविदन्मापरंसहस्व।स्वाहा।अग्नयइदं०।ततःसव्यपाणिनादक्षिणपाणि
प्रोक्ष्योपस्तीर्याहूतेनपुरोडाशमादायाभिघार्य पर्यावर्त्यतुत्रिरभिघार्य। ॐअमृतायत्वेतिमं
पसांहस्त्यपर्यावर्त्ययन्हुत्वा॥ अमृतायसोमायम्न्ययइदंनममेतिसजेत्॥ ततोयस्मिन्नोजुहु
रोडाशः स्थापितस्तराजेककेदुः॥ मानोअग्नयइत्यस्यागस्त्यस्त्रिष्टुप्॥ आग्नेयोऽज्यहोमेवि०।ॐमानो
अग्नेऽवसृजोऽघायाय०मारीषतेसहसायसरादाः।स्वाहा।इतिस्रुवेण हुत्वा अग्नयइदंनममेतिस
जेत्।ततःस्वांज वन्मेनोपस्तीर्याग्नक्ताधानाक्षिप्त्वर्वापयित्वाभिघार्य॥ धान्त्रोभवंत्वितिस्यस्वयासि
ष्ठोवाजिनस्त्रिष्टुप्॥ श्रवणाकर्मप्रधानधानाहोमेवि०।ॐधानाभिर्भवंतुवाजिनोहवंपु० सनेम्यस्त
घुयवन्नमीवाः॥ स्वाहा॥ अंजलिनाहुत्वावाजिभ्यइदंनममेतिसजेत्।ततोनभ्यक्ताधानास्रुवा

द्वधमासेभ्योदत्वा चरुधानेकदेशान्तःस्विष्टकृतं हुत्वा होमशेषं समाप्य धृतविग्रंथिंपिविस्रस्य
मुद्धदेशे क्षिपेत्॥ ॥इति श्रवणाकर्मप्रयोगः॥ ॥अथ सर्पबलिप्रयोगः॥ ॥श्रावण्यां विग्रंथि
त्वा प्राणानायम्य देशकालौ स्मृत्वा मम भार्यापुत्रामात्यदुहितृसमेतस्य भौमांतरिक्षदिव्यसर्प
भयःसंभावितबाधापरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं मिलितविधिरूपं सर्पबल्याख्यं कर्म करि
ष्ये इति संकल्प्य पूर्वं द्विकास्थापितदर्वीमादाय शिक्यस्थापितकलशगृहीतसक्तुभिस्तामापूर्य गृ
हीत्वा गृहान्निर्गत्य प्राच्यां दिशि स्थंडिलपरिगृहीतं देशमासाद्य प्रोक्ष्य। ॐ सर्पदेवजनेभ्यः स्वाहेति मं
त्रेण दर्वीस्थसक्तूंस्तत्र प्रागग्रकुशेषु निक्षिप्य सर्पदेवजनेभ्य इदं न ममेति त्यजेत्। बलेर्बलिदातुश्चा
न्तरा केनापि व्यवधानं न कार्यं सर्पपरिहारात्। ततः कृतांजलिः ॐ ये सर्पाः पार्थिवा ये अंतरिक्ष्या
ये दिव्या ये दिश्यास्तेभ्य इमं बलिमाहार्षं तेभ्य इमं बलिमुपाकरोमीति मंत्रेण सर्पानुपस्थाय हस्ता
भ्यां पाणिभ्यां नमस्कृत्य सर्वांजलिं प्रदक्षिणं कृत्वा पश्चात् गृहं प्रविश्य॥ ॐ सर्पोसि सर्पतां सर्पाणाम
धिपतिरस्यन्नेन मनुष्यांस्त्रायसे पूपेन सर्पान् यज्ञेन देवांस्त्वयि मा संतं त्वयि संतः सर्पा मा हिंसिषु
र्ध्रुवं ते परिददामीति मंत्रमुपांशु सकृज्जप्त्वा ज्येष्ठक्रमेण नामग्राहं पुत्रादीन् परिदद्यादेव॥ ध्रुवा

ना०प०
१११

१८

मुकं ते परिददामीति पुत्रं॥ ध्रुवाममुकां ते परिददामीत्यप्रत्तां दुहितरं। ध्रुवाममुकां ते परिददामीति भा
र्यां। ध्रुवं मां ते परिददामीत्यात्मानमंते। अयं कर्ता चेन्मापदस्थाने यजमाननामोपिढृतीयां
नमुकं परिददामीति वदेत्। ततः प्रतिपदमारभ्य प्रत्यवरोहणपर्यंतं सायंप्रातःकालेषु तथैव
दर्वीमतिरिक्तसक्तुभिः शुचिर्देशे बलिं हरेत्। तत्र नमस्कारादिपरिदानांतं न कार्यं॥ अथवाऽश्व
युजप्रतिपदमारभ्य यस्मिन्नहनि प्रत्यवरोहणं मार्गशीर्षशुक्लचतुर्दश्यां पौर्णमास्यां वा क्रिय
ते तस्मादर्वाचीनदिनानि ह्रासवृद्धिभ्यां परिगणय्य तेषु यावंतः सायंप्रातःकालास्तावतो बलीं
स्तदैव दद्यात्। तत्राद्यप्रथमबलिदानांते नमस्कारादिपरिदानांतं सकृदेव न प्रत्येकं॥ ततः प
वित्रग्रंथिं विस्रस्य शुचिर्देशे प्रतिक्षिपेत्॥ अत्र तद्दर्वेरेव गवाखिलबलिदानं मुख्यः पक्षः॥ श्र
वणाकर्म सर्पबलिः प्रतिवर्षं कार्यः॥ अदर्शोऽप्यवृणात्॥ वृद्धिश्राद्धमुभयार्थं तंत्रेणैव कार्यं॥ इ
ति सर्पबलिप्रयोगः॥ ॥ ॥अथाश्वयुजीकर्मप्रयोगः॥ ॥ ॥आश्वयुजमासस्य पौर्णमास्यामाश्वयुजीक
र्म कार्यं। पूर्वेद्युः कृतोपलेपादिना प्रत्यवरोहणे वक्ष्यमाणमार्गेण निवेशनमलंकृत्य भूमिं च सम
कृत्य परेद्युः स्त्रीपुत्रादिसमेतो मंगलादि विप्रोपस्थानं विधाय पशुकं शुचिवासाः प्रांतरोपासनं कु

त्वाऽभ्युदयिकश्राद्धं विधाय धृतपवित्रः प्राणानायम्य देशकालौ स्मृत्वा मम स्त्रीपुत्रादिसहित
स्यान्यत्रापेक्षितविषयसंपूर्णतापूर्णनवसादनसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं समन्वाधानं
करिष्य इति संकल्प्याऽस्मिन्नन्वाहितेऽग्नावित्यादि चक्षुषी आज्येनेत्यन्तमुक्त्वाऽत्र प्रधानं पशुपतिं
चरुद्रव्येण पृषातकं पृषातकद्रव्येण शेषेण स्विष्टकृतमित्यादि सद्यो यक्ष्य इत्यन्तमुक्त्वा समि
द्वयं त्रयं वाग्नावाधाय परिसमूहनादिपूर्णपात्रनिधानान्तं कृत्वाऽग्नेः प्राक् शूर्पे पवित्रवती
पतये त्वा जुष्टं निर्वपामीति चतुरश्चतुरो मुष्टीन् शूर्पे निरुप्य तत्संख्यया तथैव प्रोक्ष्यावघा
तादि चरुश्रपणान्तं कृत्वाज्यमिश्रं पयः पृषातकाख्यं हविः कृत्वाज्यसंस्कारं सपृषातकं चरुं
मांसह पर्यग्निं कृत्वाज्योद्वासनादि आज्यभागान्तं कृत्वा सुतादिभिरन्वारब्धः स्वयं निधौ वा ता
नुपवेश्य पाऽवदानधर्मेण चरुमवदाय ॥ ॐ पशुपतये शिवाय शंकराय पृषातकाय स्वाहेति हु
त्वा ॥ पशुपतये शिवाय शंकराय पृषातकायेदं न ममेति त्यजेत् ॥ ततो यजमानाञ्जलावुपस्ती
र्य स्रुवेणैव पृषातकं द्विरवदायाभिघारयेत् । ततो यजमानः ॐ ऊनं मे पूर्यतां पूर्णं मे मोपसद
त्पृषातकाय स्वाहेत्यञ्जलिनैव हुत्वा ॥ पृषातकायेदं न ममेति विसृजेत् ॥ चरुपृषातकाच्छेषात्

ना०भ०
१७६

स्विष्टकृतं हुत्वा इध्मसंनहनहोमादि कर्मशेषं समाप्य विपेत्रे ग्रंथिं विस्रस्य भ्रुवि दिशो क्षिपेत् ॥ ॥ इ
त्याश्वयुजीकर्मप्रयोगः ॥ ॥ अथाग्रयणप्रयोगः ॥ ॥ शरदि पौर्णमास्याममावास्यायां वा पर्वणि तदू ना
ने कृत्तिकादिविशाखान्तेषु देवनक्षत्रेषु अन्यमते चन्द्राऽनुकूले वाग्रयणं कार्यं । प्रातरौपासनं कृ
त्वा संकल्पपूर्वकमभ्युदयिकश्राद्धं विधाय पवित्रे धृत्वा प्राणानायम्य देशकालौ स्मृत्वा मम रोगजा
रातिवृत्तिश्रीयज्ञोन्नप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं नित्यविधिरूपमाग्रयणं करिष्य इति संक
ल्प्याऽस्मिन्नन्वाग्न्युपस्थापनकर्मणि देवतापरिग्रहार्थमन्वाधानं करिष्य इति संकल्प्याऽस्मिन्नन्वा
हितेऽग्नावित्यादि चक्षुषी आज्येनेत्यन्तमुक्त्वाऽत्र प्रधानं इन्द्राग्नी विश्वान्देवान् द्यावापृथिवी च
रुद्रव्येण शेषेण स्विष्टकृतमित्यादि सद्यो यक्ष्य इत्यन्तमुक्त्वा समिद्द्वयमग्नावाधाय परिसमू
हनादिपूर्णपात्रनिधानान्तं प्राक्तंत्रं कृत्वा प्रागग्नेः शूर्पे पवित्रवति तण्डुलान् चतुरश्चतुरो मुष्टी
न् निरुप्य तत्संख्यया तथैव प्रोक्ष्यावघातादि चरुश्रपणान्तं कृत्वाज्यसंस्कारादि आज्यभागान्तं कृ
त्वाऽवदानधर्मेण चरुमवदाय । ॐ सजूर्ऋतुभिः सजूर्विधाभिः सजूरिन्द्राग्निभ्यां स्वाहेति हु
त्वा । इन्द्राग्निभ्यामिदं न ममेति त्यजेत् ॥ पुनरवदाय । ॐ सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वि

अग्नये देवेभ्यः स्वाहेति हुत्वा। विश्वेभ्यो देवेभ्य इदं० पुनरवदाय॥ ॐ सजूर्ऋतुभिः सजूर्विधाभिः स
जूर्द्यावापृथिवीभ्यां स्वाहा। द्यावापृथिवीभ्यामिदं न ममेति तिस्र आहुती हुत्वा स्विष्टकृद्धुत्वा हु
तावशिष्टपात्रान्तरे कृत्वा तस्मात् त्र्यंसशेषं पाणौ धृत्वा॥ ॐ प्रजापतये त्वा ग्रहं गृह्णामि मह्यं श्रियै मह्यं
यशसे मह्यमन्नाद्यायेति मन्त्रेण दक्षिणेन पाणिनाभिमृश्य॥ ॐ भद्रान्नः श्रेयः समनैष्ट देवास्त्व
यावसेन समशीमहि त्वा। स नो मयोभूः पितवाविशेह शन्नो भवद्विपदे शं चतुष्पदे इति मन्त्रेण प्रा
श्य द्विराचम्य तत्रैवोपविष्टः॥ ॐ अमोसि प्राणतदृतं ब्रवीम्यमासि सर्वानसि प्रविष्टः। स मे जरां
रोगमपनुद्य शरीरमनामय एधि मा मृधाम इन्द्र इति मन्त्रेण नाभिमालभेत॥ ततः पत्नी मध्य
मध्यमहविःशेषमन्नं प्राश्नीयात्॥ ततो यजमान इध्मसंनहनहोमादि परिषेचनान्तं क ना०भ०
र्मशेषं समाप्य धृतपवित्रं शेषं विस्रस्य विद्विक्षिपेत्॥ इदमाग्रयणं यदा श्यामाकयुक्तं पौर्ण १७८
मास्यां क्रियते तदैककालत्वात्॥ श्यामाकयुक्तं कर्मणा समानतन्त्रता भवति॥ तत्र श्यामाकयुक्तं क
र्मप्रधानहोमं कृत्वाऽऽग्रयणप्रधानहोमद्वयोश्च वैरिकः स्विष्टकृदित्याहुतित्रयं। यवाग्रयणं न
कार्यं। श्यामाके तु प्रस्तरं कुर्यात्॥ आग्रयणं शास्त्रान्तरे दृष्टत्वात्। इदं चाग्रयणमकृत्वा न

वान्नभक्षणस्य निषिद्धत्वाद्दुर्भिक्षे पुरातनधान्यालाभे नवधान्यभक्षणाधिकारार्थमजमासे प्रिके
र्यं॥ अन्नापरिदितुत्सृष्टुएव॥ आग्रयणप्रकरणे प्रायश्चित्तकारिकायां॥ अकृत्वाग्रयणोऽश्नीयान्न
वान्नं यदि वै ततः। वैश्वानराय कर्तव्यश्चरुः पूर्णाहुतिरेव वा॥ इति प्रयोगरत्ने आग्रयणप्र
योगः॥ ॥ अथ प्रस्तरारोहणप्रयोगः॥ तत्र मार्गशीर्षपौर्णमास्यां तस्य वेश्मनु दहपावाक
र्या। द्विवेदगृहकुड्यलेपनतदाच्छादननिर्माणभूतभूमीसमीकरणप्रकृष्टापामार्गाद्युत्पल्लन
कृष्णनिवेशानालंकारं विधाय फलरहितधान्यतृणाद्यपलालनिर्मितं चशयनार्थकं संपा
द्य संकल्पपूर्वकं प्रस्तरारोहणांगं नांदीश्राद्धं विधाय सूर्येऽस्तमिते सायमौपासनं हुत्वा शुचि
। पवित्रे धृत्वा देशकालौ संकीर्त्य मम स्त्रीपुत्रादिसहितस्य जलस्थानचरसर्पबाधानिवृत्त
यपरे मनसो मनस्य रूपाश्रीपरमेश्वरप्रीत्यर्थं नित्यविधिरूपं प्रस्तरारोहणारंभकर्म करि
ष्य इति संकल्प्याग्निमुपसमाधाय समिद्द्वयं त्र्यंबकाय पुनर्देशकालौ संकीर्त्य क्रियमाणप्र
स्तरारोहणहोमदेवतापरिग्रहार्थमन्वाधानं करिष्य इति संकल्प्याऽस्मिन्नन्वाहितेग्नाविः
त्यादि चक्षुषी आज्येनेत्यंतमुक्त्वाऽत्रप्रधानं द्विः श्वेतं पायसेन ध्मसेनेद्वहनेन रुद्रमित्या

दिसघोयक्ष्महलंतमुक्त्वासमिधावग्न्यावादध्यात्॥ अत्र स्विष्टकृन्नास्ति। तेनततस्तौ नेनि। प
रिसमूहनादिश्रपणपात्रनिधानांतं कृत्वस्सुतादिभिः प्रधानदेवतायैश्वेतायहविश्चतुरोऽग्नाहिमु
ष्टीस्तु ध्रुवं निरूप्यतथैवप्रोक्ष्यपयसि चरुं श्रपयित्वा उपसंस्कारादाज्यभागांतं कृत्वासुतादिभि
रन्वारब्धावदानधर्मेणावदाय॥ ॐ अथ श्वेतपदाज्जहिपूर्वेणचापरेणच। ससचावारुणादि
माः सर्वाश्च राजबांधवा स्वाहा। श्वेतायेदं नममेति त्यजेत्॥ ॐ नवेश्वेतमाधागारोहिजं
घानकिंचन। श्वेतायवैदार्वायिनमः स्वाहेति द्वे पायसाहुती हुत्वा श्वेतायेदं नममेतित्य
जेत्। ततः ॐ अभयनः प्राजापते त्वमेभ्यो भूयादित्यग्रामीक्षमाणो जपित्वा शिवोतः सुम
नाभवेसुक्तो हेमंतेतिसंबुध्यंतमनसास्मरेत्। ततोऽग्नेः पश्चाद्दर्भस्तूपलालनिर्मितं
करंकंत्रीगूयानार्थस्वयमास्तीपुत्रादिसहितस्तस्मिन्नुपविश्यस्योनाका। एवोमे
धातिथिर्भूमिर्गायत्री। जपेवि०। स्योनापृथिवीति त्र्यचं जपेत्॥ एतदारभ्यमंत्रोच्चारणाहा
:स्त्रीबालव्यतिरिक्ताः स्योनापृथिवीत्यादीनस्वस्त्ययनपर्यंतान्मंत्रान्जपेयुः। ततस्त
त्रप्राक्कुद्विराउदङ्मुखोदक्षिणापार्श्वेनश्रृण्यात्। त॥ गृहिणोनंतरंयथाज्येष्ठंसर्वेपुत्र

ना०सं०
१६०

२२

स्तथैवनूयीरन्। ततउत्थायोपविश्यप्राङ्मुखाः। अतोदेवामेधातिथिर्देवागायत्री। जपेवि०
ॐ अतोदेवा अवंतुन इत्यृचं निर्जपित्वा पुनरपितथैवरुद्धायित्वोत्थायोपविश्यदक्षिणामु
खाः। अतोदेवा अवंतुन इति प्रथमपादं सकृज्जपित्वा पुनरपितथैवरुद्धायित्वोत्थायोपवि
श्यपश्चिमाभिमुखाः। यतोविष्णुर्विचक्रम इति द्वितीयपादं सकृज्जपित्वा पुनस्तथैवरु
यित्वोत्थायोदङ्मुखा उपविश्य॥ पृथिव्याः सप्तधामभिरिति तृतीयपादं सकृज्जपेयुः। ततः कर्त्ता
स्विष्टकृद्धर्मैर्धारं उत्पहरणादिकं मस्तोषांसमाप्य पवित्रग्रंथिं विस्रस्याप्सु विदेशोप्रक्षिपेत्॥ त
तः सर्वेयथारूप्युद्धायित्वोत्थायोदितेसूर्येकृतनित्यक्रियाः संगमसोयणिस्वस्त्ययनानि च जपे
युः। तानि च॥ उदुत्यमिति त्र्यचोदशार्चस्यसूक्तस्यकण्वः पुत्रः प्रस्कण्व ऋषिः सूर्योदेवता। नवा
द्यागायत्र्योंत्यास्तिस्रोनुष्टुभः। जपेविनि०। नवर्चमिदं तज्जप्यमिति कारिकायाः। चित्रंदेवानामि
ति षडृचस्यसूक्तस्याङ्गिरसः कुत्सः सूर्यस्त्रिष्टुप्। जपेवि०। नमोमित्रस्येति द्वादशार्चस्यसूक्त
स्य सूक्तस्य सौर्योऽभितपाः सूर्योजगती। द्वाभ्यां त्रिष्टुप्। जपेवि०। सूर्योनोदिवस्पात्विति पंचर्च

स्य सूक्तस्य सूर्यः पुत्रश्चक्षुः सूर्यो गायत्री। जपे वि०। आ नो भद्रा इति दशर्चस्य सूक्तस्य राहूगणो गोत
मो विश्वेदेवाः पंचाद्याः सप्तमी जगत्यः षष्ठी विराट्स्थाना त्रिष्टुभः। जपे वि०। स्वस्ति नो मिमीता
मिति पंचदशर्चस्य सूक्तस्य श्यावाश्व आत्रेयो विश्वेदेवाः आद्यास्तिस्रस्त्रिष्टुभोऽन्त्ये द्वेऽनुष्टुभौ।। जपे वि०। परावत
इति सप्तदशर्चस्य सूक्तस्य मानवो नाभानेदिष्ठो विश्वेदेवा जगती।। अन्त्ये द्वे त्रिष्टुभौ।। जपे वि०। ए
तानि सर्वाणि जपेयुः।। अतिबहुत्वादत्र न लिखितानि।। ततो यजमानः संस्कृतान्नेन स्वादु यथा तथा पु
त्रकेन स्त्रीन धिकारान्वा शूद्रान्वा ब्राह्मणान्भोजयित्वा तैः स्वस्त्ययनं वाचयेदिति।। इदमपि कर्म केचिद्वि
त्वा कुर्वंति।। युक्तं तु पवित्रं क्षेपणं तमुपवासी कृत्वा भुक्त्वा शायी नेति।। ।। इति प्रयोगरत्ने प्र का०प्र०
स्तरारोहणप्रयोगः।। ।। अथ पिंडपितृयज्ञप्रयोगो मासि।। स चानाहिताग्निनापि कार्यः।। एवं मा १६१
नाहिताग्निर्निर्वप्य पित्र्यं तिप्रणीय जुहुयादिति सूत्रात्।। नित्ये औपासनाग्नौ विशेषः।। त
स्य चायमाहिताग्नेर्विशेषः।। हविः श्रपणं कृत्वा अतिप्रणयनं कर्तव्यं।। ततो अतिप्रणीतस्योपस
माधानं परिस्तरणं च कृत्वा ततो यं वगितिप्रणीतादिसादिसमानमस्मिन्नहोरात्रे पर्वतिपदोः

संधिस्तत्रापराह्णे यागः दिने तत्पूर्वदिने वा पिंडपितृयज्ञः कार्यः।। अहोरात्रसंधौ तिथिसंधौ तु यागः
सर्वदिन एवेति वृत्तिकृत।। उक्तापराह्णे औपासनाग्निं प्रज्वाल्य शुचिः प्राणानायम्य धृतपवित्रो दे
शकालौ स्मृत्वा पितृतृप्त्यर्थं मासि परमेश्वरप्रीत्यर्थं पिंडपितृयज्ञं करिष्य इति संकल्प्याग्नेय्या
भिमुखोऽग्निं ध्यात्वा परिसमुह्याग्नेयाग्रकैर्दर्भैः परिस्तीर्याग्निरीशान्यां वायव्यां वाग्नेयाग्रकान्दर्भा
नास्तीर्य पर्युक्ष्य तेषु सकृत्स्थालीं शूर्पं स्फ्यमुलूखलं मुसलं स्रुवं स्रुचं वा कृष्णाजिनं सकृदाच्छि
न्नं बर्हिरिध्मं मेक्षणं जलपूर्णकमंडलुं चेति यथायोगं न्यग्बिलान्येकैकशः।। आग्नेयसंस्थान्यासा
दयेत्।। काष्ठरवडुःस्पाः।। प्राङ्मधारणार्थः स्रुक् स्रुवो वा।। ततो प्रसिद्धं।। पात्राण्यन्वाभान्निकृत्वा कमंडलु
जलेन प्रोक्ष्य स्थालीं शूर्पं चादायाग्नेर्दक्षिणतो वस्थितं व्रीहिमुत्कटं दक्षिणानआरुह्य स्थालीं शू
र्पं निधाय व्रीहिभिः पूरयित्वा यथा स्थालीमुखोपरिस्थाः शूर्पे पतंति तथा निमृज्य स्थाल्या स्पद
क्षिणतः पतितान् व्रीहीन् शकटे आस्याग्नेः पश्चिमतो वायव्यतो वा आस्तीर्णे कृष्णाजिने उलूखलं नि
धायाग्नेय्याभिमुखो निष्टप्य सापत्न्या ... हस्तान् सकृत्सकृत् कृत्वा नाविविक्तमसकृत्प्रक्षालिता
न्नजीवतंडुलान् श्रपयेत्।। तत्र मनुष्यस्येवाग्नेर्नकं प्रदीप्तमनुल्मुकं गृहीत्वाग्नेराग्नेय्यां दिति

कृतेष्मबर्हिरुद्धलित्वा। ये रूपाणि प्रतिमुंचमाना असुराः संतः स्वधया चरंति। परापुरो निपुरो ये भ-
रंत्यग्निष्टाँल्लोकात्प्रणुदात्वस्मादिति मंत्रेण ज्वलंतमतिप्रणीतात्स्वमग्निमाग्नेय्यां ग्रहैः कुशै-
परिस्तीर्य दक्षिणाभिमुखः॥ अपहता असुरा रक्षांसि वेदिषद इति मंत्रेणोपासनातिप्रणीत-
योरंतराले स्प्येन सव्योत्तरपाणिद्वयगृहीतेन कुशमूलेन वाग्नेय्याभिमुखां लेखामुल्लिखेत्
सकृदिरस्य पुष्पमकृदालिन्कबर्हिषाच्छाद्य। उत्पूतमाज्यं विलापितमुत्पूतं नवनीतं वा घृताय
मासिमाग्नेर्दक्षिणतः कुशोपर्यासाद्य स्रुवं संमृज्य तेन ध्रुवास्थमाज्यमादाय चरुमभिघार्य
दक्षिणास्यानि प्रणीताग्नेः पश्चाद्दर्भेष्वासाद्य तद्दक्षिणतो अंजनाभ्यंजनकशिपूपबर्हणान्यासा-
दयेत्॥ ततोतिप्रणीताग्नेः पश्चिमत उपविश्यार्चयित्वा प्राचीनावीत्यभिघारितमरत्निमितं प-
र्वहरस्य कमिध्मं पितृतीर्थेन तूष्णीमग्नावभ्याधाय स्रुवेणाज्यमादाय मेक्षणमुपस्तीर्य
कृतचरुं द्विधा विभज्योत्तरभागमधाद्यंगुष्ठपर्वमात्रं मेक्षणेनावदाय पुनः पूर्वभागादवदाय
पात्रस्थमवत्तं वाभिघार्य समवदाय पाणिना निधाय सोमाय पितृमते स्वधा नमः इति प्रणीता
ग्नेर्दक्षिणभागे पराचीनपाणिर्हुत्वा सोमाय पितृमत इदं न ममेति त्यक्त्वा। पुनः पूर्ववद्दक्षि-

ना०व०
१६२

२५

णभागस्थचरोरवदाय अग्नये कव्यवाहनाय स्वधा नमः इत्यग्नेरुत्तरभागे पूर्ववद्धुत्वा अग्नये कव्यवाह-
नायेदं न ममेति सव्योपवीती तूष्णीं मेक्षणमग्नावनुप्रहरेत्॥ स्वधा नमः इत्यस्य स्थाने स्वाहाकारेण
वा होमः। तदा हुत्वा सव्य उपवीती च मेक्षणानुप्रहरणपर्यंतं॥ यथा॥ अग्नये कव्यवा-
हनाय स्वाहेति प्रथमाहुतिः। सोमाय पितृमते स्वाहेति द्वितीया॥ स्वाग्नप्रभा हुतिवत्॥ ततः प्रा-
चीनावीती पूर्वकृतलेखायां स्थापितकमंडलुजलं दक्षिणहस्तेन पितृतीर्थेनाग्नेय्याद्यपवर्गं शुंधंतां
पितरः शुंधंतां पितामहाः शुंधंतां प्रपितामहाः इति मंत्रैस्त्रिर्निनयेत्॥ ततो हुतशेषेण साज्येन त्री-
न्पिंडान्कृत्वा ध्रुवाज्येनाभिघार्य तत्तत्स्थाने लेखायां प्राचीनावीती पराचीनपाणिः पितृतीर्थेन त्रीन्
पिंडानाग्नेय्याद्यपवर्गं पित्रादिभ्यो दद्यात्। तद्यथा॥ एतत्ते अमुकशर्मन्मे ये च त्वामत्रानु तेभ्यश्चेति पि-
त्रे एवं पितामहप्रपितामहयोरपि। ततः। अत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति सकृत्पिंड-
ननुमंत्रणमनेन पार्श्वेनावृत्य उदङ्मुखो भूत्वा यथाशक्ति प्राणायामान्कृत्वा अमीमदंत पि-
तरो यथाभागमावृषायिषतेति पुनस्तानेनुमंत्र्योपवीती चरुस्थालीमवघ्राय प्राचीनावी-
ती पूर्ववच्छुंधंतां पितर इत्यादिभिः कमंडलुजलं पिंडोपरि निनयेत्। अमुकशर्मन्नेतत्ते इति त्रिः

मोपिपिंडेषु अंजनं तैलं घृतं वा रभेणा दत्वा । अमुकशर्मन् एते स्वत्ति तथै वांजनं दद्यात् ॥ अथ । एतद्
ः पितरो वासो मा नो तो माति सितरो युद्धं धूममिति प्रतिपिंडं मंत्रावृत्त्या नवं वासो दद्यात् पंचाशद्वर्षा
धिक वयस्क स्वस्य कोष्टस्कंदयान्तर लोमवा दत्वा कुशहस्त पवहणोनि वेधुस मो न्नरप्यांपा णि
ंगो कृतांजलिरग्न्येष्मा अभिमुख: पिंडानुपतिष्ठेत मंत्रे: । यथा । नमो व: पितरइषेनमो व: पितर ऊर्जे
नमो व: पितर: शुष्माय नमो व: पितरो घोराय नमो व: पितरो जीवाय नमो व: पितरो रसाय । स्व
धाव: पितरो नमो व: पितरो नमस्तायुष्माकं पितर इमा अस्माकं जीवा वो जीवंत इह संतस्याम । म
नो न्वाहुवामहे इति च तिसृभि: ३ । अथ परेतन पितर: सोम्यासो गंभीरेभि: पथिभि: पूर्विणेभि:
। दत्वा यास्मभ्यं द्रविणेह भद्रं रयिं च न: सर्ववीरं नियच्छतेति मंत्रेण पिंडोद्धानाग्न्येष्माभिमुखं स
कृदुत्तानेन हस्तेन — लयेत् । तत: । अग्ने तमद्याश्वं न स्तोमै: क्रतुं न भद्रं हृदिस्पृशं ॥ अधामा
त ओहैर सौ पासना ग्निसमीपं गत्वा । यदंतरिक्षं पृथिवी मुत द्यां यन्मातरं पितरं वा जिहिंसि
म । अग्निर्मा तस्मादेनसो गार्हपत्य: । प्रमुंचतु करोतु मामनेनसमिति मंत्रेण गार्हपत्यपर इर
हितं तपेत् ॥ केचित्तु धामामपि मंत्राभ्यां अग्न्युपस्थानमाहु: ॥ अथ । वारं मे दत्त पितर इति

ना०म०
१६३

२५

मंत्रेण मध्यमं पिंडमादाय सपुत्रप्रा से पत्न्या प्राशयेत् ॥ अथ आधत्त पितरो गर्भं कुमारं पुष्करस्रजं । य
थायमस्या असदिति मंत्रेणायं मंत्र: । पत्न्या: । इतरौ पिंडावप्सु ति अग्नौ ते वा क्षिपेत् ॥ आसादित
नां द्रव्यपात्राणां मध्ये सकृदाछिन्नं बर्हिरिध्मं मेक्षणानां विनियुक्तत्वात् । अवशिष्टानि पा नि
नव तेषां द्वारोत्सर्ग: ॥ अवशिष्टमेकं तूष्णीं निसृजेत् । तत्र पित्रादिनामज्ञाने न तत्राम
स्थाने एतत्ते ततासावनंतरं ततपितामहप्रपितामहे इति निर्दिष्टा: क्रमेण पिंडदानमंत्रे प्रयोज्या
: एकस्य द्वयोर्वा नामज्ञाने पि यथास्थानं ततादिरूहप्रयोगो स्यत्र नाम प्रयोग: ॥ अत्र पि
त्रादीनां मध्ये एकस्य द्वयोर्वा जीवने तस्य पिंडदानं न कार्यं किं तु पिंडदानमंत्रेण स्वाहाकारांते
न जीवद्दुहृत्त्वोनाग्नौ सव्यपाणिना पिंडहोम: । त्रयाणामपि जीवने पितृमात्र जीवने वा त्रयाणां पि
डाहोतव्या: । अथ वा पिंडदानरहितो होमो न एव पिंडपितृयज्ञ: । अनारंभो वा पिंडपितृयज्ञस्य ॥
अप्रत्त जीवनमतिक्रम्य न दद्यादिति श्रुते: । पिंतरि तदादिस्त्रिके वा जीवति त्रिष्वपि होम एव
न भूमौ पिंडदानं ॥ जीवत्पितामहस्य पित्रे पिंडं दत्वा भूमौ होम: । जीवत्प्रपितामहस्य द्वयो: पिंड:
प्रपितामहाय होम: । होमश्च यज्ञोपवीतिना सर्वत्रैसाधारणाकर्त्तव्यो ॥ अत्र च अर्पण होमयोर

धिकरणविकल्पमहापस्तंबः॥ सोयमेवं विहित एवानाहिताग्नेरौपासनाग्नेरपणं होमः॥ अति
प्रणीते वा जुहुयादिति॥ एत आर्यकारुद्रदत्तीया॥ अनाहिताग्नेर्दक्षिणाग्निस्थानीय औपासने
अपणो होमो भवतः॥ अथवा॥ औपासन एव अपयित्वा ततोग्निं दक्षिणाग्निं च प्रणीय तस्मिन्नेव जु
हुयादित्यर्थ इति। एवं चौपासनाग्नावेव होमः अतिप्रणीतस्य दृष्टार्थ इति केचित्॥ अन्ये तु नित्यमप
यित्वा अतिप्रणीये जुहुयादित्याश्वलायनीयाः वाक्यसमभिव्याहारात्सन्निधानादतिप्रणीते दृष्टार्थत्वा
ज्ञातिप्रणीत एव होम इति॥ हरदत्तभाष्यमप्येवं॥ अत्र बहुलेखनभयात् पिंडपितृयज्ञातिप्रणीतलिखितं। संप्रति
कल्पात्तु अतिप्रणीते होम इत्युक्तं। यथाच्छायधासप्रदाय विचार्य कार्यं। सकृदाच्छिन्नकं स्तरणमपिं
डबर्हिरभावे काशादिग्राह्यं॥ एतदुक्तं विष्णुधर्मोत्तरे॥ पिंडनिर्वपणं कार्यं कुशाभावे विचक्षणैः॥ का
शैः कुशाग्रदूर्वासु पवित्रं परमं स्मृतं॥ इति। राजदूर्वाश्चानि दीर्घदूर्वाः॥ योनाहिताग्निरौपासनाग्निमा
न् अपि तकः सः वक्ष्यमाणं पार्वणश्राद्धं पिंडपितृयज्ञं च अतिप्रयोगेण कुर्यात्॥ अतिप्रयोगनाम
योविच्छिद्य सहानुष्ठानात्मकस्तत्र विशेषः॥ तत्र पार्वणश्राद्धं पितृयज्ञं च अतिप्रयोगेणाकरिष्य इति सं
कल्प्य धाधाधाना आकृत्य अपिंडपितृयज्ञं कृत्वा ब्राह्मणपादप्रक्षालनादि आच्छादनांतं श्राद्धं पुनरिध्मा

ना०भ०
१६५

३५

धानादि पिंडपितृयज्ञप्रोक्षणानुप्रहरणमथ पार्वणमन्वाकुतानादर्शोभयहोमं क्रमेण समापयेदिति क्र
मः॥ आहिताग्निस्तु सर्वाधानपक्षे आधानादक्षिणाग्नावेव पिंडपितृयज्ञं कृत्वा पार्वणश्राद्धं पृथगे
व कुर्यात्॥ तस्मात्कौरेतु आरुप्रयोगं वक्ष्यामः॥ इति प्रयोगरत्ने पिंडपितृयज्ञप्रयोगः॥ अ
थाल्पवक्तव्यावात्सार्वणाश्राद्धात्पूर्वमष्टकाप्रयोग उच्यते। हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीषु चतु
र्षु मासेषु कृष्णपक्षे सप्तम्यादि अहस्त्रयं अष्टकाश्राद्धं कुर्यात्॥ अशक्तौ माघमास एव कुर्यात्
। तत्रायं क्रमः॥ सप्तम्यां सायंहोमानंतरं सप्तम्यां प्रातर्होमानंतरं दर्शाकालेप्सं कालदर्शवल्लि
श्रादाम्नाता महारात्रिः सपत्नीकानन्दघ्नि सा विधिस्तु समष्टकाश्राद्धं कर्तुकामः सर्वैः श्राद्धं क
रिष्य इति संकल्प्य ब्राह्मणनिमंत्रणादि हृदिस्थाय संकल्प्यो सांतं कृत्वा विप्रान्संनिधाप्याग्निसमि
धनादि परिषेचनांतं कृत्वा स्थालीत्रयं अपूपार्थानि पिंडपितृयज्ञवत् सादनोपासादिस्थालीपुत्रीहि
स्तरणादि तं लम्बसालनांतं कृत्वा तंदुलानतिसृष्ट विभज्यपशुदोदनं तिलमिश्रौदनं पापसं च श्रप
यित्वातिप्रणीयान्वादि कृत्वाज्यभागानिर्वचनांतं कृत्वा चरुत्रयं क्रमेण अभिघार्योदगुद्वास्यातिप्र
णीताग्नेः पश्चिमात्तो दक्षिणासिद्धं क्रमेणासाद्य अनंतरं दक्षिणतो भंजनाज्ञनकशिपुपबर्हणानि

धानादिभस्ममर्यादाकरणोत्तरकर्तव्यपाणिशोधनांतं कृत्वा चरुत्रयं पात्रांतरेषु द्व्यगुद्धृत्य घृता
क्तं कृत्वा प्राचीनावीती सव्योक्करिष्य इति पित्र्यब्राह्मणाननुज्ञाप्य कुरुष्वेति तैरुक्तः तिम्रणीताग्रावि
धमपसमाधाय ध्रोवाज्येन मेक्षणमुपस्तीर्य घृतोदनं मध्यादंगुष्ठपर्वमात्रं मेक्षणेनावदाय पृ
वुर्धोत्तरतश्चैवावदाय कृसरान्नात्सायसाज्यवतश्चैवावदाय पश्चाल्लोत्रयेहिष्टष्टथगभिघार्याविवतं
चैकवारमभिघार्योदीरतामित्यष्टर्चःशंखः पितरस्त्रिष्टुप्॥ स्वधेत्युहोमे वि०। ॐ उदीरतामवर उ
त्परासः० पितरो हवेषु स्वधानमः पितृभ्य इदं०। इतिमेक्षणेन हुत्वा पुनश्चरुत्रयात्तथैवावदाय वरा
य। ॐ इदं पितृभ्यो नमः० येचान्नं सुहृज्जेना सुविक्षुस्स्वधानमः पितृभ्य इदं०। ॐ आहं पितृन्
०भजंतं पित्वस्त इहागमिष्ठास्स्वधानमः। पितृभ्य इदं० ॐ बर्हिषदः पितरः० ऊंयोरस्पोरधात
स्वधानमः। पितृभ्य इदं०। ॐ उपहूताः पितरः० अग्निष्वात्ताः ... तस्मान्स्वधानमः। पितृभ्य
इदं० ॐ आमाजानुदक्षिणतः० आग्नःपुरुषताकराम तस्स्वधानमः। पितृभ्य इदं०। ॐ आ
सीनासो अरुणीनामुपस्थे० प्रयच्छत तद्दधोर्जं दधातस्वधानमः पितृभ्य इदं० ॐ येनः पूर्वे पि
तरः सोमासः० उशंतानुशान्ति अतिकाममत्तुस्स्वधानमः। पितृभ्य इदं०। एवमष्टाहुतिर्हु

ना०म०
२८५

त्वायज्ञोपवीती मेक्षणमनुप्रहृत्य लोपस्पृश्य प्राचीनावीती हुतशिष्टं चरुत्रयं परिवेषणादि संपन्नव
चनांतं सर्वं कृत्वा चरुत्रयशेषं पिंडार्थं पृथक्कृतेषु अन्नेषु निक्षिप्य शेषनिवेदनादिविप्रविसर्जनांतं
पार्वणश्राद्धवत्कृत्वा तद्दहरेव पितृमातामहवर्गद्वयस्य सपत्नीकस्य श्राद्धांगतिलतर्पणं
कृत्वा पार्वणविधिनियमेन दिवसशेषं निनयेत्॥ आहिताग्निस्तु निमंत्रणाद्याल्हादनांतं कृत्वा
दक्षिणाग्नौ धनादिहविरासादनांतं कृत्वा पूर्ववदन्वष्टकां ब्राह्मणाननुज्ञाप्य दक्षिणाग्नावि ध्ममुपस
माधायोदीरतामित्यादिभिरष्टाहुतिर्हुत्वा मेक्षणानुप्रहरणहोमशेषपरिवेषणादि ब्राह्मण
विसर्जनांतं अनाहिताग्निवत्कुर्यात्॥ यस्मिन्ते पितृपितृयज्ञे औपासने होमस्तेषामत्रापि त
त्रैवहोमः॥ इति प्रयोगरत्ने सप्तमी श्राद्धप्रयोगः॥ अथाष्टमीश्राद्धप्रयोगः॥ सप्तम्यां
सायमौपासनहोमानंतरं श्वः प्रातर्होमानंतरं देशकालौ संकीर्त्य प्राचीनावीती श्वः
वक्ष्यमाणान्वष्टक्यसपत्नीकान्पितृननुद्दिश्य सविधिसमष्टकाश्राद्धं करिष्य इति संकल्प्य
ब्राह्मणनिमंत्रणादि द्वितीयसंकल्पांतं कृत्वौपासनाग्निं प्रज्वाल्य प्रणीतानायम्पति ष्पादि
संकीर्त्याष्टकाश्राद्धांगहोमं करिष्ये तत्र देवतापरिग्रहार्थमन्वाधानं करिष्य इत्यादि चक्षुषी

आज्येनेसंतमुक्काविश्वान्देवान्सप्रवारंचरुदेशेणत्रोमेणस्विष्टकृतमित्यादिसद्योयश्च्युरंसंत
मुक्कासमिद्वयमग्नावाधायपरिसमूहनादिपूर्णपात्रनिधानांतंकृत्वासपवित्रंशूर्पमग्नेःपश्चि
मतोनिधायतस्मिंश्चतुरश्चतुरोमुष्टीनादायेतिसंख्ययाविश्वान्देवान्ध्यायन्तूष्णींनिरूप्य
तथैवप्रोक्ष्यावाहननाद्याज्यभागांतंकृत्वाग्नौहोमंकरिष्यइतिपितृयज्ञब्राह्मणाननुज्ञाप्यकु
र्यादितितैरुक्ष्मतुरोरुक्षरंमंत्रैर्होमंकुर्यात्॥ तत्रमंत्राः॥ अग्नेनयेतिमंत्रद्वयस्यागस्त्योऋषि
स्त्रिष्टुप्॥ अष्टकाहोमेवि०॥ नु अग्नेनयसुपथारायेअस्मान्० नमउक्तिंविधेमस्वाहा॥ अग्नयइद
दं०नु अग्नेत्वंपारयानव्योअस्मान्० तनेपायद्रूंयोःस्वाहा॥ अग्नयइदं०२ नु आग्नेयोहमंत आतव
:शिवानोवर्षाःशिवाअभयाःशरन्नः॥ संवत्सरोधिपतिःप्राणदोनोहोरात्रैकृणुतांदीर्घमस
:शिवानोवर्षाःशिवाअभयाःशरन्नः॥ संवत्सरोधिपतिःप्राणदोनोहोरात्रैकृणुतांदीर्घमस्तु॥ शिवादिशः
:स्वाहा॥ विश्वेभ्योदेवेभ्यइदं० नु अग्नाताप्रथिवीवायुरावमंतरिक्षंद्यौर्नोदिशश्चभयंनोअस्तु॥ शिवादिशः
प्रदिशउद्दिशोनआपोविद्युतःपरिपांतुविश्वतःस्वाहा॥ विश्वेभ्योदेवेभ्यइदं०४॥ नु आपोमरी
चीःप्रवहंतुनोधियोधातासमुद्रोवहंतुपापं॥ भूतंभविष्यदभयंविश्वमस्तुमेब्रह्माधिगुप्त
:स्वाराक्षराणिस्वाहा॥ विश्वेभ्योदेवेभ्यइदं०५॥ नु विश्वआदित्यावसवश्चदेवारुद्रागोप्तारो

मरुतःसदंतु॥ ऊर्जंप्रजाममृतंपिन्वमानःप्रजापतिर्मयिपरमेष्ठीदधातुस्वाहा॥ विश्वेभ्योदेवेभ्य
इदं०६॥ एतैर्मंत्रैरेकश्चरुमापविलेपनस्तत्सआहुतीर्हुत्वा॥ प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्
॥ अष्टकाहोमेवि०॥ नु प्रजापतेनत्वत्० रयीणांस्वाहा॥ प्रजापतयइदं०७॥ एवंसप्ताहुतीर्हुत्वा
स्विष्टकृदादिहोमशेषंसमाप्यस्वागतोन्नाद्यर्घ्यदिग्बंधसमवायनांतंकृत्वाब्राह्मणेभ्योनिधाय
ग्रेष्यांदिशिभुवंप्रोक्ष्यदर्भानास्तीर्यतत्रधर्मपात्रमनुज्ञाकृत्सगंधदानादिपाणिहोमधर्मांतंकृत्वा
भोजनार्थमित्वाद्रुत्सघृतान्नंकृत्वापितृयज्ञब्राह्मणसमीपेउपविश्यतस्माणिपर्युक्ष्यतत्रप्रा
चीनावीतीदक्षिणेजानुभूनिन्यस्तोयमिक्षणउपस्तीर्यमिक्षणेन्नंद्विवारमवदायपात्रस्थमवतं
चाभिघार्यसोमायपितृमतेस्वधानमइतिपाणौहुत्वापुनःपूर्ववदवदायाग्नयेकव्यवाहनाय
स्वधानमइतितथैवजुहुयात्॥ एवंसर्वत्रजुहुयात्॥ ततोद्विजाहुतमन्नंभोजनभाजनेषुनिक्षि
प्यऽवशिष्टंविद्वद्वद्भ्योपविश्येयुः॥ ततःकर्तान्नंपरिवेष्यश्रद्धयानिरङ्गः॥ ओष्ठपितृभ्योदत्तंवित्
सत्कापिंडदानकालेपूर्वपात्रमितोद्दिनेरवेद्विजसमीपेकृत्वाक्रमेणसकृदाछिन्नद्वयेनास्त
र्यप्राचीनावीतीशुंधंतांपितरःसपत्नीकाइत्यादिअग्न्युपस्थानवर्ज्यंद्विजविसर्जनांतंसर्वंदः

र्द्धश्राद्धवत्कृत्वापरेद्युरेववर्गद्वयस्यतिलतर्पणंकुर्यात्॥ अत्रकामकालौविश्वेदेवौ॥ इष्टिश्रा
द्धेक्रतुदक्षौ॥ अष्टम्यांकामकालकौइतिशंखस्मृतेः॥ अत्रगृह्योक्तेष्टकाः पशुनास्थाली
पाकेनवेतिविकल्पाभिधानेपिलोकविद्विष्टत्वात्स्थालीसंयोगेनैवघृतमेवपशुनातुष्टा
नाभावासत्पुपक्षेप्रयोगेनोक्तः॥ ॥इत्यष्टम्यांश्राद्धप्रयोगः॥ ॥ अथान्वष्टकाख्यनवमीश्रा
द्धप्रयोगः कर्त्ताप्रवेद्युःपरेद्युःपरेद्युर्वोक्तकालेप्राणानायम्यदेशकालौसंकीर्त्यप्राचीनावीतीद
क्षिणामुखःसभार्योअपितृवर्गमातृवर्गमातामहवर्गत्रिसपत्नीकमष्यंतेनिर्दिष्टपनि
सविधिस्तुपमन्वष्टकाश्राद्धंपिंडपितृयज्ञकल्पातिदेशिकपार्वणविधानेनाहंनहविषाएकोद्धवाकृ
रिष्यइतिसंकल्प्यनिमंत्रणादिद्वितीयसंकल्पांतंपूर्वश्राद्धवत्कृत्वाश्रास्तरणान्तंनिधायदक्षि
णपूर्वदेशेऔपासनाग्निंविधिवत्प्रतिष्ठाप्यपरिसमुह्यप्राक्दक्षिणाग्रैःसमूलैर्दर्भैरेकं
पर्यस्त्रिर्वारमप्रदक्षिणंपरिस्तीर्यपात्रासादनार्थदर्भानास्तीर्यचरुस्थालीत्रयस्फ्योलू
खलमुसलस्रुवश्रुवकृष्णाजिनसक्त्वाच्छिन्नत्रयेधर्ममेक्षणकमंडलुन्नेकेक्षणाज्याग्नि
यसंस्थानासादयस्थालीत्रयेहिरण्यादितंदुलप्रक्षालनांतंकृत्वास्थालीपुत्तंदुलान्वि

ना०प्र०
१६३

वेदनेप्रतीक्षाकालमाहमनुः॥ वंध्याष्टमेधिवेद्याब्दे दशमेतुमृतप्रजा॥ एकादशेस्त्रीजननीसद्यस्
त्वप्रियवादिनी॥ संग्रहे॥ अप्रजांदशमेवर्षेस्त्रीप्रजांद्वादशेत्यजेत्॥ मृतप्रजांपंचदशेसद्यस्त्वप्रिय
वादिनीं॥ एतत्सर्वंतुद्विजातीनांरतिविशेषः॥ एकामुत्क्रम्यकामार्थमन्यांलब्धुंयदीच्छति॥ समर्थस्तोषयि
त्वार्थैःपूर्वोढामपरांवहेत्॥ याज्ञवल्क्यस्तु॥ आज्ञासंपादनींदक्षांवीरसूंप्रियवादिनीं॥ त्यजन्दाप्य
स्तृतीयांशमद्रव्योभरणंस्त्रियाः॥ सधनोधनतृतीयांशमधनोग्रासाच्छादनात्मकंभरणंदाप्यइत्यर्थः॥
यावत्तावताअपरितुष्टागृहान्निर्गच्छेत्तामप्याहमनुः॥ अधिविन्नातुयानारीनिर्गच्छेद्रुषितागृहा
त्॥ सासद्यःसंनिरोद्धव्यात्याज्यावाकुलसन्निधौइति॥ यदिबहुद्रविणवान्सर्वाःस्त्रियःवस्त्राल
करणादिभिःसंतोषयितुंक्षमःअतिबालिष्टत्वात्रतिकामुकत्वात्प्रसह्यएकस्यामितिशायित्वतस्त्रो
पिस्त्रियःयथातासांसमाधानंस्यात्तथासंभोक्तुंसमर्थस्तदाबह्वीःस्त्रियःपरिणयेत्॥ अन्यथा॥ ए
षकृष्णाचनारीणामन्यास्त्ववध्यन्ते॥ इतिदोषोक्तेः॥ ॥ बहुभार्योपिश्रेष्ठयैवसहधर्मंपत्नीसा
र्धंकुर्यादितिहेमाद्रौ॥ कात्यायनः॥ अग्निशुश्रूषादिशुश्रूषांबहुभार्यःसवर्णया॥ कारयेत्तद्बहुत्वे
ज्येष्ठयागर्हितानचेत्॥ शिष्टशुश्रूषाआतिथ्यादिरूपा॥ साचपत्नीसंपाद्याधर्मसाध्योपलक्षणार्थं

॥ गर्हिता धर्मार्योगपत्न्यापादकपातित्यादिदोषवत्त्वान्नचेदित्यर्थः॥ तादृशीं नचेतरां अनेनेवंविधयाकृति
श्रयमकारयेत्॥ यद्यपिब्राह्मणस्यक्षत्रियादिकमाद्विवाहोपिशास्त्रसंमतस्तथापिअसवर्णासुक
न्यासुविवाहस्यद्विजातिथितिकलिनिषिद्धेषुपरिगणितत्वेन सांप्रतमनुपयोगात्अपचोनक्रिय
ते। तस्माद्ब्राह्मणेनवक्ष्यमाणेषुसमंतासुब्राह्मणैरपरावकर्त्तव्या॥ नृक्षत्रियाद्यः।
बर्काीनंगपत्ना नामतपोगप घेगमपद्येनुतीध्यानीविवाहक्रमशोभजेत। रक्षणार्थमपुत्राव्यगृह
स्थक्रमशोपिवृति॥ नीर्यक्रतुः॥ तार्थशास्त्राध्वरक्षेत्रोपायोपाध्यायमंत्रिषु। योनोज्ञलावतारेचेति
निधुतुबलेनयोनिवाम्वकस्यतद्धर्मान्नरक्रत्वात्॥ सवर्णासुविवाहक्रमेणालेत्॥ यदातुकदाचिद
पुत्रोएकापुत्रवस्यदत्तयोराः॥ तदाअपुत्रोऽग्रतोगच्छेत्तत्रहणक्रमशोवेतिअस्यार्थः। क्रतुयोग
नृघेसतिअसवर्णासुग्रहणक्रमन्नः। वर्णक्रमेणाममनंकुर्यादित्यर्थः॥ इतिमाधवः। वर्णक्रमप्र
संगस्तुअनुपयोगान्नप्रपञ्चते। सवर्णास्विवबव्हीषुपत्नीषुसहधर्मचारिणी। निर्धारयतियाज्ञव
ल्क्यः॥ सत्यामन्यांसवर्णायांधर्मकार्यंनकारयेत्॥ सवर्णासुविधौधर्मेज्येष्ठयानविनेतरा इति। सव
र्णायांसत्यामित्युक्त्वातदभावेण्यसवर्णाप्यनुज्ञातातत्रापिशूद्रांनिषेधयतिवसिष्ठः। कृष्णवर्णा

ना०सं०
१८८

मजमधुरोदनंतिलमिश्रोदनंपायसंचक्षपयित्वाकिंचिदोदनाग्रद्रव्यंमंडपसंस्थात्रांतरेणादायसंभृत्वा
ग्निमतिप्रणीयंतस्यर्वतारिस्तीर्यस्योनपित्रादिवर्गत्रयार्थपश्चिमापवर्गलेखात्रयमुल्लिख्यप्रत्येक
मन्निरभ्युक्ष्यसकृदाछिन्नेनैकैकांलेखांस्तृत्वा कृत्वायामाज्यंस्थितोपासनाग्नेर्दक्षिणतः कुशे
ष्वासाद्यस्रुवेणाज्यमादायचरुद्वत्रयंप्रत्येकमभिघार्यमेरुदगुद्वास्याग्निप्रणीताग्नेः पश्चिमतोदर्भे
ष्वासाद्यस्रुवेणाज्यमादायचरुद्वत्रयंप्रत्येकमभिघार्य
पुक्रमेणादक्षिणसंस्थमासाद्यदधिमिश्रवपिष्टस्त्रसकृद्दधिमंथारव्यान्मधुमिश्रयवपिष्टरू
पसक्तूनमधुसंथारव्यासात्रयंसंभृत्यदधिमंथसक्तूनोपासनेधिश्रित्याभिघार्योद्वास्यपा
यसादृक्षिणतश्चासाद्याभ्यंजनांजनकशिपुयवबर्हणानांप्रत्येकंत्रयमोपासनाग्नेर्दक्षिणतःआ
साद्यपित्रोऽर्थत्रयं। लणानांस्वागतवचनादीनतायुनिमंत्रणांतं कृत्वाअस्मिन्नकालेत्वेजस
दानित्ववसंख्याकानिपात्राण्यासादयेत्॥ मातृद्विलेवकृत्वापितामहीप्रपितामहीद्विलेव
कृत्वानत्रसंख्याकानितद्वर्गपात्राण्यासादयेत्। देवतासंख्यानिपात्राण्यासाद्यमोक्षतानां
नकृत्वाप्रतिपात्रंदर्भत्रयंनिधायजलंसंस्पृश्यशंनोदेवीरितिमंत्रेणैकैकवर्गपात्रस्थंजलंस
कृदनुमंत्र्यतिलोसीतिमंत्रेणमातमातामहादिरूपानुकेहितेयथापावित्रापतत्राष्ट्रवताप्रतिपा

त्र्यंमंत्रात् सातिज्ञा त्रिः क्षिप्य गंधपुष्पाणि च निक्षिप्य पितृपात्रं संपन्नं च मे स्वादि यथालिंगं अभिमृश्य दत्वा
च स्मिन्नारी त्राम गोत्र रूप सर्वकं मुत्का वा हा चैत्र सिलोपवीती सर्वेषां नाम गोत्र रूपाण युज्ञ्याय संपादि
ताव: स्वधा अर्घ्या इति तन्न सात्रं तत्तस्मुरतः क्रमेण संस्थाप्य दर्शवित्ता हत्राम अर्घं दत्वा मातारद
तेर्घ्यस्त्वधानमोन मेहत्सादिनामुमातृवर्गस्य दत्वा मातामहवर्गस्य च दत्वा वृहत्वा सर्वे त्रिरपाच
स्कंज जपित्राद्रियात्रेक्षित्ता तज्जलेन मुखं वमङ्· लोमविलपात्रं कुरणादिपाणिष्ठोधनातं कृत्वाम्
रुत्रयादृथिसंयाम्यमात्र चतुष्टये क्रमेण हविः पृथेव कृत्य घृताक्तं कृत्वा अग्नौ करिष्य इति पित्रर्थब्राह्म
ननुज्ञा प्रक्रियतामिति विरुक्तेऽग्निप्रणीता आविधम् उपसमाधाय मेक्षणम् उपस्तीर्य नैनाग्यु
ष्टपर्वमात्रं के क्रमेण हविष्यतुष्टयस्य मधात्कृर्वाद्यां च्युष्टयकर्पृथगवदाय पात्रस्थं हविष्यतुष्ट ना०म०
यं पृथक् पृथगभिघार्य वृत्तं चाभिघार्य सोमाय पितृमते स्वधानम इति अग्नौ दक्षिणदेशे जुहु १८८
द्रह्मसागो कृत्वा पुनः पूर्ववद् दक्षिणभागस्थ हविष्यतुष्टपादवदायापरं ये कमवाहनाय स्वधा
नम इति वह्निरुत्तरभागे दुत्वा द्रह्मसागोग्रं कृत्वा यज्ञोपवीतमिति तूष्णीं मेक्षणमनुप्रहृत्साय
स्तद्रेपोभाम्यां हस्ताभ्यां परिविष्य दुत्वा शिष्टं पात्रचतुष्टयस्थं हविः सर्वं किंचिद्विके पं वर्गत्रयपदि

जमोजनभाजनेषु परिष्यान्नात्यागादिसंपन्नं वचनांतं कृत्वा पिंडार्थमुद्धृत्य आग्नीयसव त्रिषु स्थाने
चतुष्टयस्थं तं हविश्चतुष्टयं सर्वं मधुमध्याभ्य प्रक्षिप्य पुनः प्रकिरणार्थं सर्वस्मादन्नादुद्धृत्य सर्वोपि
निर्वेद्य द्विजैरुत्तरापोशाने हस्तप्रक्षालने च कृते तेन यमाचम्य स्ववास्तीर्णकुशेषु पुत्रः शुंधंतां पितर
: शुंधंतां पितामहाः शुंधंतां प्रपितामहाः शुंधंतां मातरः शुंधंतां पितामह्यः शुंधंतां प्रपितामह्यः
: शुंधंतां पितामहाः शुंधंतां प्रपितामहाः शुंधंतां सपत्नीकाः मातृपितामहाः शुंधंतां
शुंधंतां प्रपितामह्यः शुंधंतां सपत्नीका मातामहाः शुंधंतां सपत्नीकाः मातृपितामहाः इत्यादि
सपत्नीकाः मातृप्रपितामहाः इति मंत्रैः सलिलकमंडलुजलेनिनयनं कृत्वा मुकलावरादूत्सादिद पिंडा
र्थं अन्नाद्वस्प्रमाणं वस्त्रादि देव ध्यानं कृत्वा दूर्मिलक प्रमाणान्नधुसर्पिस्तिलयुतान्त्व पिंडाने
कृत्वा धृत्वा देवेनाभिवार्य एतत्ते इत्यादिना यथालिंगं वर्गत्रयपिंडेदत्वै मन्त्रमित्युक्तिसर्वं कं पिंडाने
र्वकं पिंडानेवर्पणं कृत्वा सुपिंडेषु दर्शसंभृतमोदनात् ऊर्ध्वं निषिच्य करएव घर्षणा धारभुपस्थाना
तं कृत्वा वीरमेदत्तापितर इति त्रिरा वृत्सा पितरावृत्स्थाने नवर्गत्रयपितृन्मस्केकं प्रार्थ्य मधमपि
दत्रयं पल्ली प्राश्य मिलापिंडी द्रासनादिविप्रविसर्जनांत दह्यो श्रा कृत्वा तरहरे वर्गत्रयस्यातिल
तर्पणं कुर्यात् । मातृद्विलेपिंडदानकालेएतद्वा ऽस्मात्मातरोयत्तद्ध्याद्देः मुकगोत्रे वसरूपेये

चपुत्रमेत्रान्विति पिंडदानं कृत्वा ऽस्मन्मातर्मायत्तराश्राद्धायाथ्य अमुकगोत्राभ्यां मयं पिंड: स्वधा
नमस्ते अम्बगयायां विष्णुपदे रुद्रपदे वा दत्तमस्त्विति यथावासनमुच्चारयेत्॥ अभ्यंजनदाने यद्दे
श्री देद्दस्युखायाम्भंजाय्यामिति तैलं क्षिपेत्॥ अंजनदाने ज्याथ्यामिति प्रत्येकं द्विवारं अंजनं क्षिपेत्॥
वासोदाने एतद्वः पितरो वासइत्यादिना पितृश्राद्धान् हेन मंत्रावृत्त्या सर्वासां वासो दद्यात्॥ एवं पि
तामही प्रपितामह्योर्द्वितीयि॥ मातृबहुत्वे पिंडदाने एतद्वोयत्तदेश्या हैरुद्र हे अमुकगोत्रा वसुरूपा ये
चपुष्पान्वत्रान्विति पिंडं दत्वास्मन्मातृ मायत्तराश्राद्धारुद्रदाभ्यां यं पिंड: स्वधा नमो नम गयायां
मित्यादि सर्ववत्॥ अभ्यंजनदाने सर्ववत्रामास्तु [illegible] अड्. ध्वमिति तैलं क्षिपेत्॥ अंजनदाने ऽ ध्व
मित्यंजनमंत्रावृत्त्या प्रत्येकं द्विवारं क्षिपेत्॥ वासोदाने एतद्वः पितरः सोदानानं हेन सर्वासां वासो
दद्यात्॥ पितामही प्रपितामही बहुत्वे एवं कुर्यात् सर्वेषु पिंडदानादिषु मात्रादीनां द्वित्वे एकन
मत्वे च द्विवचनांतं तन्नाम निर्देशं। बहुत्वे एकनामत्वे च बहुवचनांतं॥ अत्र यद्यपि सप्तम्या
दितिथित्रये श्राद्धकत्वं मतो क्रांतयापि गद्य सत्रे अष्टमी षष्टेका इत्युपक्रम्यापरेद्यु: पितृभ्यो द
द्यात्॥ अपरेद्युरन्वष्टकामिति सप्तमीनवमीश्राद्धयोरष्टमीमुपजीव्य कृतत्वात् तस्यां एव सांवत्से

ना०भ०
१९०

एकेवत्पत्पराकाधिकादिकं विचार्य तदनुरोधेन सप्तमी नवमी श्राद्धं पूर्वेद्यु अकार्यं। न तु तयोरप
राह्णाधिकादिकं स्वातंत्र्येण विचार्यमिति॥ यदि मार्गशीर्षादिचतुर्षु मलमास: स्यात्तदा शुद्धमासएव
वा: कार्या। न तु मलमासे। हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामिति चतुर्ग्रहणादित्याद्याकरतो
ज्ञेयं॥ अष्टकाश्राद्धाकरणे प्रत्यवाय उक्त: कूर्मपुराणे यस्तु तेप्रतिगच्छेत्पुरस्कारनिरर्पिता: माघा
त्वस्य भवसाश्रा: परत्रैवत्र सर्वदा इति। एतदकरणे प्रायश्चित्तं श्राद्धविधाने। एभिर्द्युभिर्जपेन्मंत्रं त्रात
वारं तु तद्दिने॥ अनष्टकांय दाहन्मंस्तं सूर्णयितिसर्वोदा इति॥ इति प्रयोगरत्ने अन्वष्टकाप्रयोग:
॥॥ अथाष्टका विकृतिभूतमाघावर्षश्राद्धप्रयोग:॥ तच्च भाद्रपदापरपक्षे महालयपक्षे सप्तम्यां
दिषु त्रिषु ह: स्वयष्टकावत्सर्वं कुर्यादिति वृत्तिकृत् हरदत्तस्तु तत्रैव पक्षे मघायुक्तायां त्रयोदश्यां
संकल्पविधानेन माघावर्षारिश्राद्धमिस्याह॥ ॥ इति प्रयोगरत्ने माघावर्षश्राद्धप्रयोग:॥ ॥ अथ
प्रतिमाससमपरपक्षश्राद्धप्रयोग:॥ ॥ प्रतिकृष्णपक्षं प्रतिपदादि अमावास्यांतिथिषु षट्पक्षमातृश्रा
द्धं सर्वं सपत्नीकपितृमातामहवर्गद्वयस्यान्वष्टकावत्सरचामवर्जं सर्वं कार्यं॥ इति प्रतिमासप
रपक्षश्राद्धप्रयोग:॥ अथापरपक्षश्राद्धप्रयोग:॥ कृत्तिकादिषु काम्यश्राद्धं कृत्तिकारमतेनाष्ट

मीमांसावत्सर्वकार्यं ॥ यद्वा श्रौतकौशिकरीत्या द्विकृत्स्विष्टाद्भवतु ॥ ॥ इति श्रीविद्वन्मुकुटमाणिक्यरा
मेश्वरभट्टसूरिसूनुनारायणभट्टविरचिते प्रयोगरत्नेऽष्टकाविकृतिश्राद्धप्रयोगः ॥ ॥ श्रीः ॥

ना० सं०
१८१